सोनु-इन प्रयोगलिङ्गों से 'इ सूतिन्' प्रत्यय और उवर्णान्तानामिकार: (सू० २।१।३०) से 'उ' मात्रा को 'इकार' तथा 'इतो लोपः' (सू० २।१।६) से 'इ' प्रत्यय का लोप एवं इससे उपधा को 'आ' हुआ। च्यानि सन्दि सूतिन्-त्वदीयेन-तेरे से। म्यानि सन्दि सूतिन्-मदीयेन-मेरे से। यहां 'च्योनु-म्योनु' शब्दों से पूर्व 'सन्दु' प्रत्यय और 'उवर्णान्तानाम्' (सू० २।१।३०) से 'इकार' तथा इससे उपधा का 'आकार'। षष्ठीप्रयोग से 'इ सूतिन्' प्रत्यय हुआ। बाकी पहले की तरह। बहुवचन में तो च्यान्यौ सूतिन्-त्वदीयै:-तुम्हारों से। म्यान्यौ सूतिन्-मदीयै:-हमारों से। तुहन्द्यौ सूतिन्-युष्मदीयै:-तुम्हारों से। सान्यो सूतिन्-अस्मदीयै:-हमारों से। तृतीया का 'औ सूतिन्' प्रत्यय ही होता है। तुहन्दि सन्द्यौ सूतिन्। इस प्रकार सर्वनामशब्दों में सब जगह जानना।

त्वह्यस्यौ बहुत्वे ॥ १५ ॥

च्ह्-ब्वह् शब्दयो: सर्वत्र बहुत्वे त्वहि असि आदेशौ भवतः। त्वहि। यूयम्। असि। वयम्। त्वह्य। युष्मान्। अस्य। अस्मान्। द्वितीयायां न्प्रत्यये सर्वत्र (सू० २।१।११) इत्यकारागमे कृते प्रत्ययस्य लोप: (सू. ६) इत्यादिसूत्रेण नकारलोप:। यत्वम्।

'च्ह्-ब्वह्' शब्दों में हर जगह बहुवचन में 'त्वहि-असि' आदेश होते हैं। त्वहि-यूयम्-तुम। असि-वयम्-हम। त्वह्य-युष्मान्-तुम्हें। अस्य-अस्मान्-हमें। द्वितीया में 'न्प्रत्यये सर्वत्र' (सू० २।१।११) से 'अकार' का आगम करने पर 'प्रत्ययस्य लोप:' (सू ६) इत्यादि सूत्र से 'नकार' का लोप और 'य' हुआ।

तिम् यिम् कम् इम् हुमश्चोभयेषाम् ॥ १६ ॥

उभयेषां प्राणिवाचिनामप्राणिवाचिनां च शब्दानां सर्वत्र बहुत्वे तिम् आदय आदेशा भवन्ति। तिमन्। तान्। तानि। यिमन्। यान्। यानि। कमन्। कान्। कानि। इमन्। इमान्। इमानि। हुमन्। अमून्। अमूनि। तिह् आदिशब्देभ्यो। द्वितीयायां स्नाव् (सू० २।१।३८) इति न् प्रत्ययः। अनेन तिम् आदय आदेशाः। न्प्रत्यये सर्वत्र (सू० २।१।१२) इत्यकारागम:। एवं तिमौ सूतिन्। तिहन्दि पुछ्य। तिमौ प्यठ। तिहन्दु। तिमन् प्यठ्। इत्यादि विज्ञेयम्।

दोनों प्राणिवाचक और अप्राणिवाचक शब्दों के सब जगह वहुवचन में 'तिम्' आदि आदेश होते हैं। तिमन्-तान्-तानि-उन्हें। यिमन्-यान्-यानि-जिन्हें। कमन्-कान्-कानि-किन्हें। इमन्-इमान्-इमानि-इन्हें। हुमन्-अमून्-अमूनि-उन्हें। 'तिह्' आदि शब्दों मे 'द्वितीयायां स्नाव्' (सू० २।१।३८) से 'न्' प्रत्यय और इससे 'तिम्' आदि आदेश तथा 'न्प्रत्यये सर्वत्र' (सू० २।१।१२) से 'अकार' का आगम हुआ। इसी तरह-तिमौ सूतिन्, तिहन्दि पुछ्य, तिमौ प्यठ, तिहन्दु, तिमन् प्यठ्, इत्यादि जानना चाहिए।

स्प्रत्यय इकारागमः ॥ १७ ॥

तिह् आदिशब्दानां सकारे परे इकारागमो भवति। तमिस्। तम्। एवं सर्वेषाम्। अत्र लोपविधेर्वलीयस्त्वात् अप्राप्तिविषये सकारस्य लोपे कृते प्रोक्त आगमो न भवतीति।

'तिह्' आदि शब्दों को 'सकार' परे रहते 'इकार' का आगम होता है। तमिस्-तम्-उसे। इसी तरह सभी के। यहां लोपविधि के शक्तिशाली होने से अप्राप्तिविषय में 'सकार' का लोप कर देने पर कहा गया आगम नहीं होता है।

त्वहेर्हन्दौ हिलोपः पुंस्त्रियोर्वस्योत्वं च ॥ १८ ॥

च्हह् शब्दवहुत्वनियतस्य त्वहेः पुंल्लिङ्गे स्त्रीलिङ्गे च हन्दौ परे हिलोपो भवति वकारस्य च उत्वं भवति। पुंल्लिङ्गकथनात् इकारस्य सकारनिषेधः। तहन्दुः। युष्माकं पुं०। तुहन्जू। युष्माकं स्त्री। स्हन्द् स्हन्जू प्रत्ययौ। एकत्र सश्च (सू० १०) इति। अपरत्र स्लोपः स्त्रियां सर्वत्र (सू० २।१।४०) इति स् लोपः। अनेन हिलोपः वकारस्य उत्वं च।

च्हह् शब्द के वहुवचन में निश्चित 'त्वहेः' पुंल्लिङ्ग और स्त्रीलिङ्ग में 'हन्दौ' परे रहते 'हि' का लोप होता है और वकार को 'उ' हो जाता है। पुंल्लिङ्ग कहने से 'इकार' को 'सकार' का निषेध। तहन्दुः-युष्माकं (पुंल्लिङ्ग)-तुम्हारा। तुहन्जू-युष्माकं स्त्री-तुम्हारी स्त्री। स्हन्दु और स्हन्जू प्रत्यय। एक जगह 'सश्च' (सू० १०) इति। दूसरी जगह 'स्' का लोप। 'स्त्रियां सर्वत्र' (सू० २।१।४०) से 'स्' का लोप। इससे 'हि' का लोप और 'वकार को 'उ' हुआ।

असेराद्यन्तस्वरयोर्लोपाकारावुनुञोः ॥ १६ ॥

ब्वह् शब्दस्य वहुत्वे नियतस्य असि पदस्य उनु ञ् इत्येतयोः परयोरादिस्वरस्य लोपः अन्त्यस्वरस्य चाकारो भवति । सोनु । अस्माकम् । एकवचनम् । सानि । अस्माकं । वहुवचनम् । ब्वह् शब्दात् उनु नि प्रत्ययौ । त्वह्यस्यौ वहुत्वे (सू० १५) इति असि आदेशः । अनेनाकारस्य लोपः । इकारस्य च अकारः । एकत्र प्रत्ययादेरोत्पुंसि (सू० १३) उकारस्य ओकारः । षष्ठ्यामन्त्यस्वरस्य (सू० ११) इत्यादिना अकारलोपः । अपरत्र स्त्रियामाकारः पुं. वहुत्वे च (सू० १२) इति आकारः । स च इदन्तत्वादप्रसिद्धः (सू० २।१।७०) । एवं । साञ् । अस्माकम् । एकवचनं स्त्रीलिङ्गवाचकम् । सात्र । अस्माकम् । वहुवचनं स्त्रीलिङ्गवाचकम् । साधनं पूर्ववत् ।

ब्वह् शब्द के वहुवचन में नियत असि पद के 'उनु ञ्' ये परे होने पर आदि स्वर का लोप और अन्त के स्वर को 'अकार' होता है । सोनु-अस्माकम्-हमारे । एकवचन । सानि-अस्माकम्-हमारे । वहुवचन । ब्वह् शब्द से 'उनु-नि' प्रत्यय । त्वह्यस्यौ वहुत्वे (सू० १५) से 'असि' आदेश और इससे 'अकार' का लोप और 'इकार' को 'अकार' हुआ । एक जगह 'प्रत्ययादेरोत्पुंसि (सू० १३) से 'उकार' को 'ओकार' हुआ । षष्ठी में अन्त के स्वर के (सू० ११) इससे 'अकार' का लोप और दूसरी जगह स्त्रीलिङ्ग में 'आकार' पुंल्लिङ्ग-वहुवचन में होता है (सू० १२) के नियमानुसार 'आकार' हुआ और वह इदन्त होने से अप्रसिद्ध है (सू० २।१।७०) इस तरह । साञ् अस्माकम्-हमारे । एकवचन-स्त्रीलिङ्गवाचक । सात्र-अस्माकम्-हमारे । वहुवचन स्त्रीलिङ्गवाचक । साधन पहले की तरह ।

प्राणिनि मिलोपो वा सकारे ॥ २० ॥

प्राणिवाचिनां तदादिशब्दानां सकारे परे मिकारस्य बिकल्पेन लोपो भवति । तस् । तम् वा तस्य । तमिस् । तम् वा तस्य । तसन्दु । तस्य । तमि सन्दु । तस्य । सुह् शब्दात् स्प्रत्ययः । उभयेषाम् (सू० ५) इति तम् आदेशः । स्प्रत्यये इकारागमः (सू० १७) । अनेन एकत्र मिलोपः । एवं । यस् । यम् वा यस्य । यमिस् । यम् वा यस्य । यसन्दु । यस्य । यमि सन्दु । यस्य । कस् । कम् वा कस्य । कमिस् । कम् वा कस्य । कसन्दु । कस्य । कमि सन्दु । कस्य ।

प्राणिवाचक तदादि शब्दों के 'सकार' परे रहते 'मिकार' का विकल्प से लोप होता है। तस्-तम् वा तस्य-उसे वा उसके। तमिस्-तम् वा तस्य-उसे वा उसके। तसन्दु-तस्य-उसके। तमि सन्दु-तस्य-उसके। 'सुह्' शब्द से 'स्' प्रत्यय और 'उभयेषाम्' (सू० ५) इससे 'तम्' आदेश। 'स्प्रत्यये इकारागमः' (सू० १७)। इससे एक जगह 'मि' का लोप। इसी तरह। यस्-यम् वा यस्य-जिसे वा जिसके। यमिस्-यम् वा यस्य-जिसे वा जिसके। यसन्दु-यस्य-जिसके। यमिसन्दु-यस्य-जिसके। कस्-कम् वा कस्य-किसे वा किसके। कमिस्-कम् वा कस्य-किसे वा किसके। कसन्दु-कस्य-किसके। कमि सन्दु-कस्य-किसके।

इम् हुम् शब्दयोः संबन्धषष्ठयामेव। इसन्दु। अस्य। इमिसन्दु-अस्य। हुसन्दु-अमुष्य। हुमि सन्दु। अमुष्य। असन्दु। अस्य। अमि सन्दु। अस्य।

बहुत्वे तु सर्वेषां मन् इत्यस्य विकल्पेन लोप इष्यते। तिहन्दु वा तिमन् हन्दु। तेषाम्। यिहन्दु वा यिमन् हन्दु। येषाम्। कहन्दु वा कमन् हन्दु। केषाम्। इहन्दु वा इमन् हन्दु। एषाम्। हुहन्दु वा हुमन् हन्दु। अमीषाम्।

संबन्धषष्टयां किम्। इमिस्। इमं वा अस्य। हुमिस्। अमुं वा अमुष्य। अत्र विकल्पाभावः। प्राणिनि किम्। तम्युकु। तस्य वस्तुनः।

'इम्-हुम्' शब्दों के संबन्धषष्ठी में ही। इसन्दु-अस्य-इसका। इमि सन्दु-अस्य-इसका। हुसन्दु-अमुष्य-उसका। हुमि सन्दु-अमुष्य-उसका। असन्दु-अस्य-इसका। अमि सन्दु-अस्य-इसका।

बहुवचन में तो सभी को 'मन्' इसका विकल्प से लोप हो जाता है। तिहन्दु वा तिमन् हन्दु-तेषाम्-उनका। यिहन्दु वा यिमन् हन्दु-येषाम्-जिनका। कहन्दु वा कमन् हन्दु-केषाम्-किनका। इहन्दु वा इमन् हन्दु-एषाम्-इनका। हुहन्दु वा हुमन् हन्दु-अमीषाम्-उनका।

संबन्धषष्ठी में क्या? इमिस्-इमं वा अस्य-इसे वा इसके। हुमिस्-अमुं वा अमुष्य-उसे वा उसके। यहां विकल्प का अभाव है। प्राणि में क्या? तम्युकु-तस्य वस्तुनः-उस वस्तु का।

निश्चयार्थे धातुलिङ्गस्वरूपान्ते यः प्रत्यययोर्मध्ये वा ॥ २१ ॥

धातुस्वरूपस्य वर्तमानादिषु लिङ्गस्वरूपस्य च प्रथमादिषु तद्धितादिषु च निश्चयार्थे गम्यमाने अन्ते यः प्रत्ययो भवति । द्वयोः प्रत्यययोर्मध्ये वा भवति । तसन्दुय् । तस्यैव । तमि सन्दुय् । तस्यैव । ग्वरसूय् अन्दर । गुरावेव । ग्वरनूय् अन्दर् । गुरुष्वेव । एवं सर्वेषां लिङ्गानां सर्वासु विभक्तिषु बोध्यम् । प्रत्यययोर्मध्ये यथा । ग्वरबूथ् हन्दि पुछ्य् । गुरुभ्य एव । ग्वर सन्दिय् पुछच । गुरवे एव । अत्र एकवचने स् प्रत्ययस्य लोपे कृते सन्दु पुछच । इत्येतयोर्मध्ये य् प्रत्ययः । ग्वरन् हन्दिय् पुछ्य । वा ग्वरन् हन्दि पुछिय् । इत्यपि साधु । तद्धितप्रत्ययेभ्यो यथा । गाटलुय् । दक्ष एव । धातुस्वरूपेभ्यो यथा । करानूय् छ्ह् । करोत्येव । कर्योनूय् । अकृतैव तेन । करिय् । करिष्यत्येव । उपमायामपि क्वचिद्व्यवह्रियते । यथा चाट् ति गौव् न्यचिवुय् । शिष्योऽपि पुत्र एवास्ति ।

धातुस्वरूप और वर्तमानादि में लिङ्गस्वरूप का प्रथमादि में और तद्धितादि में निश्चयार्थ गम्यमान अन्त में जो प्रत्यय होता है अथवा दोनों प्रत्ययों के मध्य में होता है । तसन्दुय्-तस्यैव-उसी का । तमि सन्दुय्-तस्यैव-उसी का । ग्वरसूय् अन्दर्-गुरावेव-गुरु में हो । ग्वरनूय् अन्दर्-गुरुष्वेव-गुरुओं में ही । इस तरह सभी लिङ्गों के सभी विभक्तियों में जानना । प्रत्ययों के मध्य में जैसे-ग्वरनूय् हन्दि पुछ्य्-गुरुभ्य एव-गुरुओं के लिए ही । ग्वर सन्दिय् पुछ्य-गुरवे एव-गुरु के लिए ही । यहां एकवचन में 'म्' प्रत्यय का लोप करने पर सन्दु पुछ्य् इन दोनों के मध्य में 'य्' प्रत्यय । ग्वरन् हन्दिय् पुछ्य वा ग्वरन् हन्दि पुछिय् यह भी ठीक है । तद्धितप्रत्ययों से जैसे-गाट्लुय्-दक्ष एव-दक्ष ही । धातुस्वरूपों से जैसे—कराबूय्-छ्ह्-करोत्येव-करता है ही । कर्योनूय्-अकृतैव तेन-उसने नहीं किया ही । करिय्-करिष्यत्येव-करेगा ही । उपमा में भी कहीं व्यवहृत है । यथा-चाट् ति गौव् न्यचिवुय्-शिष्योऽपि पुत्र एवास्ति-शिष्य भी पुत्र ही है ।

सोरु शब्दस्वरूपेभ्यो नित्यमेव ॥ २२ ॥

सोरु शब्दस्य यानि स्वरूपाणि तेभ्यः प्रायशो नित्यमेव य्

प्रत्ययो भवति। सोरु्। सर्वः सोरुय्-सर्वं एव। सारि-सर्वे। सारिय्-सर्वे एव।

'सोरु्' शब्द के जितने स्वरूप हैं, उनसे प्रायशः सदा ही 'य्' प्रत्यय होता है। सोरु्-सर्वः-सब। सोरुय्-सर्वं एव-सब ही। सारि-सर्वे-सब। सारिय्-सर्वे एव-सभी।

य प्रत्यये औकारस्याव् ॥ २३ ॥

प्रत्ययसंबन्धिन औकारस्य य् प्रत्यये परे अव् भवति। गुर्यवूय् सूतिन्। घोटकैरेव। नमवूय् सूतिन्। नखैरेव। गुर्यौ सूतिन्। नमौ सूतिन्। इत्यनयोर्मध्ये य् प्रत्यये कृते अनेन औकारस्य अव्। व्यञ्जनं परेण संधेयम् (सू. १।३)।

प्रत्यय से सम्बद्ध 'औकार' को 'य्' प्रत्यय परे रहते 'अव्' होता है। गुर्यवूय् सूनिन्-घोटकैरेव-घोड़ों से ही। नमवूय् सुतिन्-नखैरेव-नाखूनों से ही। गुर्यौ सूतिन्, नमौ सूतिन्, इन दोनों के मध्य में 'य्' प्रत्यय करने पर इससे 'औकार' को 'अव्' हुआ। व्यञ्जन को अपने से परे के साथ मिला देना चाहिए (सू. १।३)

ब्याख्शब्दस्य बिय् प्रथमाबहुत्वादिषु ॥ २४ ॥

स्पष्टम्। ब्यिय्। अपरे। बियन्। अपरान्। बियौ। अपरैः। अनेन बिय् आदेशे कृते व्यञ्जनान्तलिङ्गवत्साधनम्।

स्पष्ट है। बिय्-अपरे-दूसरे। बियन्-अपरान्-दूसरों को। बियौ-अपरैः-दूसरों से। इससे 'बिय्' आदेश करने पर व्यञ्जनान्तलिङ्ग की तरह साधन।

कूतुशब्द स्योपधायाः प्रथमाबहुत्वे द्वितीयाद्येक वचनादिषु चाप्रसिद्धता ॥ २५ ॥

स्पष्टम्। कूति। कियन्तः। कूतिम्। कियन्तम्। कूति। कियता।

स्पष्ट है। कूति-कियन्तः-कितने। कूतिम्-कियन्तम्-कितने को। कति-कियता-कितने से।

बहुत्वे वैत्वम् ॥ २६ ॥

कूतु शब्दस्य द्वितीयादिबहुत्वे वा ऐत्वं भवति विकल्पेनाप्रसिद्धता च। कूत्यन्। कियतः। कैत्यन्। कियतः। कूत्यौ सूतिन्। कियद्भिर्हेतुभिः। कैत्यौ सूतिन्-कियद्भिर्हेतुभिः। एवं सर्वत्र विज्ञेयम्।

'कूतु' शब्द को द्वितीयादि वहुवचन में 'ऐत्व' होता है और विकल्प से अप्रसिद्धता। कूत्यन्-कियतः-कितनों को। कैत्यन्-कियतः-कितनों को। कूत्यौ सूतिन्-कियद्भिर्हेतुभिः-कितने हेतुओं से। कैत्यौ सूतिन् कियद्भिर्हेतुभिः-कितने हेतुओं से। इस तरह सब जगह जानना।

य्यूतुत्यूतुयूतुशब्दानामीत्वमप्रथमैकवचने ॥ २७ ॥

प्रथमैकवचनं वर्जयित्वा एषां शब्दानां यूकारस्य ईत्वं भवति। यीति। यावन्तः। तीति। तावन्तः। ईति। इयन्तः। एवं सर्वत्र ज्ञेयम्।

प्रथमा के एकवचन को छोड़कर इन शब्दों के 'यू' को 'ई' होता है। यीति-यावन्तः-जितने। तीति-तावन्तः-उतने। ईति-इयन्तः-इतने। इस तरह सब जगह जानना।

मूँष् ऐत्वम् ॥ २८ ॥

मूँष् शब्दोपधायाः प्रथमावहुत्वादिषु ऐत्वं भवति। मैँष। महिष्यः। मैँषन्। महिषीः। मैँषो सूतिन्-महिषीभिः।

'मूँष्' शब्द उपधा का प्रथमा वहुवचन आदि में 'ऐत्व' होता है। मैँष-महिष्यः भैंसे। मैँषन्-महिषीः-भैन्सों को। मैँषो सूतिन्-महिषोभिः-भैन्सों से।

कूँहोऽन्त्यस्य सश्च ॥ २९ ॥

कूँह शब्दस्य उपधाया ऐत्वं भवति अन्त्याक्षरस्य च सकारो भवति। कैँसि दप्। कंचिद्वद। कैँसि दपु। केनचिदुक्तम्। कैँसि हुन्द्। कस्यचित्। इत्यादि। साधनं पूर्ववत्। कूँह् शब्दापरपर्यायस्य काँह् शब्दस्य चेत्थं बोध्यम्। किंचानयोः शब्दयोरुभयलिङ्गत्वात् द्वितीयायां स् प्रत्ययः। स्त्रियामिकारः (सू.२।१।३७) इति इकारागमः। स्लोपः स्त्रियां सर्वत्र (सू.२।१।४०) इति स् लोपः।

'कूँह्' शब्द की उपधा को 'ऐ' होता है और अन्त के अक्षर को 'सकार' होता है। कैँसि दप्-कंचिद्वद-किसी को कह। कैँसि दपु-केनचिदुक्तम्-किसी ने कहा। कैँसि हन्दु-कस्यचित्-किसी का। इत्यादि, साधन पहिले की तरह। 'कूँह्' शब्द के दूसरे पर्याय 'काँह्' शब्द को भी इसी तरह जानना और इन शब्दों में उभयलिङ्ग

होने से द्वितीया में 'स्' प्रत्यय। स्त्रियामिकारः (सू. २।१।३७) इससे 'इकार' का आगम। स्लोपः स्त्रियां सर्वत्र (सू. २।१।४०) इससे 'स्' का लोप हुआ।

केन्च् शब्दो नित्यं वहुत्वे ॥ ३० ॥

स्पष्टम्। केन्च्। केचित्। केन्चन। कांश्चित्। केन्चौ। कैश्चित्।

स्पष्ट है। केन्च्-केचित्-कई। केन्चन-कांश्चित्-किसी स्त्री को। केन्चौ-कैश्चित्-कइयों से।

काँछाह् केंछाह् शब्दावेकत्वे ॥ ३१ ॥

स्पष्टम्। काँछाह्। कश्चित्। केंछाह्-किंचित्।

स्पष्ट है। काँछाह्-कश्चित्-कोई। केंछाह्-किंचित्-कुछ।

जह् शब्दस्य दु द्वितीयादिषु ॥ ३२ ॥

द्विवाचकस्य ज़्ह् शब्दस्य द्वितीयादिविभक्तिषु दु आदेशः स्यात्। दून्। द्वौ। द्वयो सूतिन्। द्वाभ्याम्।

द्विवाचक 'ज़्ह्' शब्द के द्वितीया आदि विभक्तियों में 'दु' आदेश होता है। दून-द्वौ-दो। द्वयो सूतिन्-द्वाभ्याम्-दो से।

अयागमः स्वरे ॥ ३३ ॥

तस्मादादेशकृतात् दु शब्दात्स्वरे परे अयागमो भवति। द्वयि सूतिन्। द्वयेन। द्वयौ सूतिन्-द्वाभ्याम्। ज़ह् शब्दात् औ सूतिन् प्रत्ययः। पूर्वसूत्रेण दु आदेशः। अनेन अय् आगमः। व्यञ्जनं परेण सन्धेयम् (सू. १।३)।

उस आदेशकृत 'द्' शब्द से स्वर परे रहते 'अय्' का आगम होता है। द्वयि सूतिन्-द्वयेन-दो से। द्वयौ सूतिन्-द्वाभ्याम्-दो से। 'ज़्ह्' शब्द से 'औ सूतिन्, प्रत्यय और पूर्वसूत्र से 'दु आदेश। इससे 'अय्' का आगम। व्यञ्जन अपने से परे के साथ मिल जाते हैं (सू. १।३)

त्रिह् षहोरन्त्यलोपश्च ॥ ३४ ॥

त्रिह् षह् शब्दाभ्यां स्वरे परे अयागमो भवति। अन्त्याक्षरस्य च लोपो भवति। त्र्ययौ सूतिन्। त्रिभिः। षयौ सूतिन्। षट्भिः।

त्रिह् और षह् शब्द से स्वर परे रहते 'श्रय्' का आगम होता है और अन्त के अक्षर का लोप होता है। त्र्ययौ सूतिन्-त्रिभिः-तीनों से। षयौ सूतिन्-षट्भिः-छेग्रों से।

वा चोर्शब्दस्य न्प्रत्यये ह्रस्वश्च ॥ ३५ ॥

चोर शब्दस्य न्प्रत्ययें परे विकल्पेनान्त्याक्षरस्य लोपः श्रोकारस्य च उकारो भवति। च्वन्। चतुरः। वा। चोरन्। चतुरः। चोर-शब्दात् द्वितीयायां न् प्रत्ययः अनेन रकारलोपः ओकारस्य च उकारः। उकारो वः (सू. १।११) इति वत्वम्। व्यञ्जनं परेण संधेयम् (सू. १।३)। अन्यत्र न्प्रत्यये (सू. २।१।१२) अकारागमः।

'चोर शब्द के 'न्' प्रत्यय परे रहते विकल्प से अन्त के अक्षर का लोप और 'ओकार' को 'उकार' होता है। च्वन्-चतुरः-चतुर। वा। चोरन्-चतुरः-चतुर। चोर शब्द से द्वितीया में 'न्' प्रत्यय। इससे 'रकार' का लोप और 'ओकार' को उकार तथा 'उकारो वः' (सू. १।१२) से 'व'। व्यञ्जन को परे से मिला दो (सू. १।३)। दूसरी जगह 'न्प्रत्यये' (सू. २।१।१२) से 'अकार' का आगम।

पानशब्दादिप्रत्ययलोपः ॥ ३६ ॥

अयं शब्दो नित्यमेकवचन एव। देहार्थवाचकस्य पानशब्दस्य तु एकानेकत्वं भवति। पान। स्वयम्। पानस्। स्वम्। पान। स्वेन।

यह शब्द नित्य एकवचन ही है। देहार्थवाचक पान्' शब्द का तो एकवचन भी बहुवचन हुआ करता है। पान-स्वयम्-खुद। पानस्-स्वम्-अपने को। पान-स्वेन-अपने से।

अकारलोपोपधाह्रस्वौ चोनुञोः ॥ ३७ ॥

तस्यैव पानशब्दस्य उनु ञ् इत्येतयोः प्रत्यययोः परयोरकारस्य लोप उपधायाश्च ह्रस्वो भवति। पननु। स्वस्य पुंल्लिङ्गे। पनञ्। स्वस्य स्त्रीलिङ्गे। साधनं पूर्ववत्। देहार्थवाचकस्य पान् शब्दस्य। पानकु। देहस्य पुंल्लिङ्गे। पानचू। देहस्य स्त्रीलिङ्गे। इत्यादि स्वरूपाणि भवन्ति।

उसी 'पान' शब्द के 'उनु-ञ्' इन प्रत्ययों के परे होने पर 'अकार' का लोप और उपधा को ह्रस्व होता है। पननु-स्वस्य-

अपने का-पुंल्लिङ्ग में। पनञ्-स्वस्य - अपने का-स्त्रीलिङ्ग में। साधन पहिले की तरह। देहार्थवाचक 'पान्' शब्द का-पानकु-देहस्य-शरीर का-पुंल्लिङ्ग में। पानचू-देहस्य-शरीर का-स्त्रीलिङ्ग में, इत्यादि स्वरूप होते हैं।

अखजोरयोराहागमो निश्चयसामान्ये ॥ ३८ ॥

अख्शब्दात् द्विवाचकाज्जोरशब्दाच्च निश्चयसामान्ये गम्यमाने आह् आगमो भवति। अखाह्। एककः। जोराह्। द्विकम्। अख्-शब्दस्य प्रथमायामेव विज्ञेयम्। अपरस्य सर्वासु विभक्तिषु। अख्-शब्दग्रहणात्प्रथमैकवचनान्तेभ्यः सर्वेभ्यः शब्देभ्यो भवति। कथाह्। एक आलापः। जोराहौ सूतिन्। द्विकेन।

'अख्' शब्द से और द्विवाचक 'जोर' शब्द से निश्चयसामान्य गम्यमान में 'आह्' का आगम होता है। अखाह्-एककः-एक। जोराह्-द्विकम्-दो। 'अख्' शब्द का प्रथमा में ही जानना। दूसरे का सभी विभक्तियों में। 'अख्' शब्द के ग्रहण से प्रथमा के एकवचनान्त सभी शब्दों से होता है। कथाह्-एक आलापः-एक बात। जोराहौ सूतिन्-द्विकेन-दो से।

त्रिहस्तारादेशः ॥ ३९ ॥

निश्चयसामान्ये त्रिह् शब्दस्य तार आदेशो भवति। तार। त्रिकम्। निश्चयसामान्ये किम्। त्रिय्। त्रय एव।

निश्चयसामान्य में 'त्रिह्' शब्द को 'तार' आदेश होता है। तार-त्रिकम्-तीन। निश्चयसामान्य में क्या? त्रिय्-त्रय एव-तीन ही।

चोरश्चवमरः ॥ ४० ॥

चोर् शब्दस्य च्वमर आदेशो भवति निश्चयसामान्ये। च्वमर। चतुष्कम्। निश्चयसामान्ये किम्। चोरय्। चत्वार एव।

'चोर्' शब्द को 'च्वमर' आदेश निश्चयसामान्य में होता है। च्वमर-चतुष्कम्-चार। निश्चयसामान्य में क्या? चोरय्-चत्वार एव-चार ही।

पान्चः पँशः ॥ ४१ ॥

पान्च् शब्दस्य पँश आदेशो भवति। निश्चयसामान्ये। पँश। पञ्चकम्। निश्चयसामान्ये किम्। पान्चय्। पञ्चैव।

पान्च् शब्द को 'पँश' आदेश होता है निश्चयसामान्य में। पँश-पञ्चकम्-पांच। निश्चय सामान्य में क्या? पान्चय्-पञ्चैव-पांच ही।

षहोऽन्त्यस्य खाह्॥ ४२॥

षह् शब्दस्यान्त्याक्षरस्य खाह् आदेशो भवति निश्चयसामान्ये। षखाह्। षट्कम्। निश्चयसामान्ये किम। षय्। षडेव।

'षह्' शब्द के अन्त के अक्षर को निश्चयसामान्य में 'खाह्' आदेश होता है। षखाह्-षट्कम-छः। निश्चयसामान्य में क्या? षय्-षडेव-छः ही।

सतष्ट एठागमश्च॥ ४३॥

सत् शब्दस्यान्त्याक्षरस्य टकारो भवति एठ आगमश्च निश्चयसामान्ये। सटेठ। सप्तकम् निश्चयसामान्ये किम्। सतय। सप्तैव।

'सत्' शब्द के अन्त के अक्षर को 'टकार' और निश्चयसामान्य में 'एठ' का आगम होता है। सटेठ-सप्तकम्-सात। निश्चयसामान्य में क्या? सतय-सप्तैव-सात ही।

ऐठादिभ्योऽमरागमश्च॥ ४४॥

ऐठ आदिभ्यः संख्याभ्यो निश्चयसामान्ये अमर आगमो भवति। ऐठमर। अष्टकम्। नवमर। नवकम्। दहमर। दशकम्। निश्चयसामान्ये किम्। ऐठय्। अष्टावेव। नवय्। नवैव।

'ऐठ्' आदि संख्यावाचक शब्दों से निश्चयसामान्य अर्थ में 'अमर' का आगम होता है। ऐठमर-अष्टकम्-आठ। नवमर-नवकम्-नौ। दहमर-दशकम्-दस। निश्चयसामान्य में क्या? ऐठय्-अष्टावेव-आठ ही। नवय्-नवैव-नौ ही।

एकत्वनिर्दिष्टपरिमाणादिशब्दात्खण्डा च॥ ४५॥

एकवचनेन निर्दिष्टो यः संख्यापरिमाणादिशब्दस्तस्मान्निश्चयसामान्ये खण्डाप्रत्ययो भवति। च शब्दात् आह् आगमोऽपि भवति। अखाह् खण्डा। एकमात्रम्। चाखाह् खण्डा। चतुष्टय मात्रम्। दहाह् खण्डा। दशकमात्रम्। हथाह् खण्डा। शतमात्रम्। क्रुहाह् खण्डा। क्रोशमात्रम। द्वहाह खण्डा। दिनमात्रम। ऋथाह खण्डा।

ऋतुमात्रम् । रुपयाह् खण्डा । मुद्रिकामात्रम् । एकत्वनिर्दिष्टात्किम । तार । त्रयः । च्वमर । चत्वारः । चोराह खण्डा । इति तु न भवति । चाख् शब्दस्य त्वेकत्वनिर्देशाद्भवत्येव । परं तु यत्रैव आह् आगमो भवति तत्रैव खण्डा प्रत्ययः सस्वरः स्यात् । यत्र तु केवलः स्यात्तत्र खण्ड प्रत्ययो भवति । यथा । क्रुह् खण्ड् । क्रोशमात्रम् ।

एकवचन से निर्दिष्ट जो संख्यापरिमाणादिशब्द है, उससे निश्चय सामान्य अर्थ में 'खण्डा' प्रत्यय होता है और शब्द से 'आह्' का आगम भी होता है। अखाह् खण्डा-एकमात्रम्-एकमात्र । चाखाह् खण्डा-चतुष्टयमात्रम्-चार मात्र। दहाह् खण्डा-दशकमात्रम्-दसमात्र। हथाह् खण्डा-शतमात्रम्-सौ मात्र। क्रुहाह् खण्डा-क्रोशमात्रम्-कोस मात्र। द्वहाह् खण्डा-दिनमात्रम्। दिनमात्र। ऋथाह् खण्डा-ऋतुमात्रम्-ऋतुमात्र । रुपयाह् खण्डा-मुद्रिकामात्रम्-मुद्रिकामात्र । एकत्वनिर्दिष्टात्मक । तार-त्रयः-तीन। च्वमर-चत्वारः-चार। चोराह खण्डा-यहां नहीं होता है। 'चाख्' शब्द के एकत्वनिर्देश से होता ही है। पर यहां पर 'आह्' का आगम होता है, वहां पर ही 'खण्डा' प्रत्यय सस्वर होता है। यहां पर तो केवल हो, वहां 'खण्ड' प्रत्यय होता है। जैसे– क्रुह् खण्ड्-क्रोश-मात्रम्-कोसमात्र।

सर्वेभ्यो वहुवचनान्तेभ्यो जू ॥ ४६ ॥

वहुवचनान्तेभ्यः सर्वेभ्यः शब्देभ्यो निश्चयसामान्ये जू प्रत्ययो भवति । कटजू । मेषाः । गुरिजू । अश्वाः । रुपयजू । रूपिकाः । कञजू । शिलाः-इत्यादि ।

वहुवचनान्त सभी शब्दों से निश्चयसामान्य अर्थ में 'जू' प्रत्यय होता है । कटजू-मेषाः-भेड़ें । गुरिजू-अश्वाः-घोड़े । रुपयजू-रूपिकाः-रुपए । कञजू-शिलाः-शिलायें, इत्यादि ।

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
लिङ्गप्रकरणे सर्वनामपादस्तृतीयः ॥ ३ ॥
समाप्तं चेदं लिङ्गप्रकरणम् ॥ २ ॥

अथ समासप्रक्रिया ॥ ३ ॥

शब्दाः संज्ञाविभक्त्यव्ययधातुभेदाच्चतुर्धा भवन्ति । तत्र विभक्तिः केवलं स्वयमर्थदानाभावात्संज्ञया संगत्य कारकार्थं जनयति । धातुना च संगत्यातीतादिकालबोधिनी क्रिया भवतीति । अव्यया हि स्वार्थ-दाने विभक्तिनिरपेक्षा इति । विभक्तियोगात्संपन्नयोः क्रिययोर्वक्ष्य-माणसमासरीतिवत्संयोगोऽसंभाव्योऽस्ति किंत्वव्ययभूतैः कृत्प्रत्ययैरे-वेति । संज्ञा तु विशेष्यपदविशेषणपदभेदाद्द्विविधा । तत्र द्वयोर्विशे-ष्यपदविशेषणपदयोः परस्परसंयोगो युक्तः विशेष्याद्विशेषणस्य बहि-रनवस्थानादिति । विशेष्ययोस्तु पदयोः संयोगः कदाचित्संभाव्यः स्यात् । संयोगसंभवे तु पदे विशेष्ये वा भवतां । विशेष्यविशेषणे वा भवतामिति तुल्यमस्ति । कदाचित्त्वसंभाव्यः । इति द्वे स्वरूपे । तयो-स्तु तुल्यातुल्यविभक्तिसंयोजनया चत्वारि स्वरूपाणि भवन्तीत्यतः समासाश्चत्वार एव भवितुमर्हन्त्येतदर्थं युक्तायुक्तेति समासलक्षणं सूत्रयति ।

संज्ञा, विभक्ति, अव्यय और धातु भेद से शब्द चार प्रकार के होते हैं । वहां विभक्ति केवल स्वयं अर्थज्ञान न करा सकने से संज्ञा के साथ मिल कर कारक-अर्थ को पैदा करती है और धातु से मिल कर अतीत आदि काल का बोध कराने वाली क्रिया होती है । अव्यय अपने अर्थ का ज्ञान कराने में विभक्ति की सहायता नहीं चाहते । विभक्ति के योग से युक्त क्रियाओं में वक्ष्यमाण समासरीति की तरह संयोग असंभावित हैं, किन्तु अव्ययभूत कृत् प्रत्ययों से ही । संज्ञा तो विशेष्य और विशेषण पदभेद से दो प्रकार की होती है । वहां दोनों विशेष्य और विशेषण पदों में परस्पर संयोग उचित है, विशेष्य से विशेषण के बाहर न होने से । विशेष्य पदों में संयोग कभी संभा-वित है । संयोग होने पर तो 'पदे विशेष्ये वा भवतां, विशेष्यविशेषणे वा भवतां' यह समान है । कभी असंभावित है । ये दो स्वरूप हैं ।

उनमें तुल्य, अतुल्य, विभक्ति और संयोजना से चार स्वरूप होते हैं, इसलिए समास चार ही हो सकते हैं, इसके लिए 'युक्ता-अयुक्ता' यह समास का लक्षण सूत्ररूप में उपस्थित है।

युक्तायुक्तपदविभक्तीनां संगतिकृत्समासः॥ १ ॥

युक्तानां योग्यानामयुक्तानामयोग्यानां पदानां विभक्तीनां च संगतिकृत्संयोगकारकः समासोऽवगन्तव्यः। तत्रायुक्तपदसमविभक्तीनां संधायको द्वन्दः। युक्तपदसमविभक्तीनां योगकारी कर्मधारयः। युक्तपदभिन्नविभक्तीनां संधायकस्तत्पुरुषः। अयुक्तपदायुक्तविभक्तीनां संयोगकारको वहुव्रीहिरिति। संबन्धसंज्ञायां समासे विशेषः। तत्र सम्बन्धसंज्ञा द्विविधा। एका सामान्यसंबन्धसंज्ञा। द्वितीया विशेषसंबन्धसंज्ञा। तत्र तदादिशब्दाः सामान्यसंबन्धसंज्ञकाः। यथैकस्मिन्नेव मनुष्ये स्वयं वक्तरि सति अहमिति संज्ञा कथ्यते। तस्मिन्नेव श्रोतृतया संनिधिस्थेन येन केनचित्प्रोक्ते त्वमिति संज्ञा। अश्रोतृतया संनिधिस्थेन प्रोक्ते अयमिति संज्ञा। असंनिधिस्थेन येन केनचित्प्रोक्ते स इति संज्ञा। द्वापरतया क इति संज्ञा। सामान्यतया य इति संज्ञा। इति सामान्यसंबन्धसंज्ञा। अत्र संबन्धषष्ठीतत्पुरुषं विना समासावाप्तिर्नावधार्येति। विशेषसंबन्धसंज्ञापि सामान्यविशेषाभ्यां द्विविधा। तत्राद्या शिल्पवशात्सूपादिसंज्ञा तस्मिन्सूपत्वशिल्पस्य समवायिसंबन्धान्न हि तदादिशब्दवदेकेन सूप् इत्युच्यते अपरेण स्वर्णकार इत्युच्यत इति विशेषत्वम्। परं तु सर्वैः सूप इत्युच्यत इति सामान्यत्वमिति। अपरा पितृपुत्रादिवत्संबन्धसंज्ञा। यथा हे पितरिति पुत्रेणैव कथ्यते पैत्रिकसंबन्धात् नान्येन। स एव सहोदरेण भ्रातेति कथ्यते समानोदर्यत्वात्। इत्यादयो विशेषसंबन्धसंज्ञकाः अत्र समासावाप्तिर्धीमद्भिरवधार्या इति।

द्वन्दोदाहरणं यथा। ताफ् गट। आतपान्धकारौ। अत्रातपेन साकं न कोऽपि ध्वान्तस्य संबन्धः किंतु सवविभक्तित्वात् द्वन्देन संबन्धः सपन्तः।

कर्मधारयोदाहरणं यथा। म्वटि गुरि सूतिन् गौव्। स्थूलघोटकेन गतः। अत्र य एव स्थूलः स एव घोटक इति युक्तपदत्वम्। स्थूलेन घोटकेन गत इति समविभक्तित्वमित्यतः कर्मधारयेण संगतिः।

तत्पुरुषोदाहरणं यथा। राज़ न्यच्युवु। राजपुत्रः। अत्र राज्ञा सह पुत्रस्य योग्यत्वेऽपि राज्ञः पुत्र इत्यनयोर्भिन्नविभक्तित्वमित्यत स्तत्पुरुषेण संगतिः।

वहुव्रीह्यु दाहरणं यथा। हूनि बुथु। श्वमुखः। अत्र श्वन्शब्द-मुखशब्दयोर्न च योग्यत्वसंबन्धः नापि श्ववन्मुखं यस्य स श्वमुख इति निरुक्त्या विभक्तिसंबन्ध इत्यतो वहुव्रीहिना संगतिः।

युक्त-योग्य, अयुक्त-अयोग्य पदों और विभक्तियों के संगतिकृत् संयोगकारक को समास जानना। वहां अयुक्तपद समविभक्तियों के संधायक को 'द्वन्द' नाम से पुकारा जाता है। युक्तपदसमविभक्तियों के योगकारी को 'कर्मधारय' कहते हैं। युक्तपदभिन्नविभक्तियों के संधायक को 'तत्पुरुष' कहते हैं। अयुक्तपद-अयुक्तविभक्तियों के संयोगकारक को 'वहुव्रीहि' कहा जाता है। संवन्धसंज्ञा में समास में विशेष है। वहां सम्बन्धसंज्ञा दो प्रकार की होती है—एक सामान्य-सम्बन्धसंज्ञा और दूसरी विशेष सम्बन्ध संज्ञा। वहां तदादिशब्द सामान्यसम्बन्धसंज्ञक हैं। जैसे एक ही मनुष्य के स्वयं वक्ता होने पर 'अहम्' यह संज्ञा कही जाती है। उसी में श्रोता के निकटस्थ होने से जिस-किसी से कहने पर 'त्वम्' यह संज्ञा होती है। अश्रोता के निकटस्थ होने से कहे जाने पर 'अयम्' यह संज्ञा होती है। निकटस्थ न होने से जिस किसी से कहे जाने पर 'स' यह सज्ञा है। द्वापर होने से 'कः' यह संज्ञा और सामान्य होने से 'यः' यह संज्ञा होती है। यह सामान्यसम्बन्धसंज्ञा है। यहां सम्बन्धषष्ठीतत्पुरुष के विना समास की प्राप्ति नहीं समझनी चाहिए। विशेषसम्बन्धसंज्ञा भी सामान्य और विशेष से दो प्रकार की होती है। वहां पहली शिल्पवश से सूपादि संज्ञा, उसमें सूपत्वशिल्प के समवायिसम्बन्ध से तदादि शब्द की तरह एक से 'सूपः' यह नहीं कहा जाता, अपर से 'स्वर्णकारः' यह कहा जाता है, यह विशेष है। परन्तु सभी से 'सूपः' यह कहा जाता है, यह सामान्य है। दूसरी पितृ-पुत्र-आदि की तरह सम्बन्ध-संज्ञा है। जैसे—'हे पितः' यह पुत्र से ही कहा जाता है, पितृसम्बन्ध से दूसरे से नहीं। वही सगे भाई से 'भ्रातः' यह कहा जाता है—समानोदर्य होने से। इत्यादि विशेषसम्बन्ध संज्ञायें हैं। यहां समास की प्राप्ति बुद्धिमान् से निश्चित कर लेना चाहिए।

द्वन्द का उदाहरण जैसे—ताफ् गट-आतपान्धकारौ-धूप और अन्धेरा। यहां धूप के साथ अन्धकार का कोई सम्बन्ध नहीं है, किन्तु समविभक्ति होने से द्वन्द के साथ सम्बन्ध है।

कर्मधारय का उदाहरण जैसे—म्वटि गुरि सूतिन् गौव्-स्थूल-घोटकेन गतः—मोटे घोड़े से गया है। यहां जो ही स्थूल है, वही घोड़ा है, यह युक्तपद है। 'स्थूलेन घोटकेन गतः।' यह समविभक्ति है, इसी लिए कर्मधारय से संगति है।

तत्पुरुष का उदाहरण जैसे—राज् न्यचुवु-राजपुत्रः-राजा का लड़का। यहां राजा के साथ पुत्र के योग्य होने पर भी 'राज्ञःपुत्रः' इनमें भिन्न विभक्ति है, इसलिए तत्पुरुष से संगति है।

वहुव्रीहि का उदाहरण जेसे—हूनि बुथु-श्वमुखः-कुत्ते का मुंह। यहां 'श्वन्' शब्द और 'मुख' शब्द का योग्यत्व सम्बन्ध नहीं है और न ही 'श्ववन्मुखं यस्य स श्वमुखः' इस निर्वचन से विभक्ति सम्बन्ध है, इसलिए वहुव्रीहि से संगति है।

समासमध्ये विभक्तिलोपो व्यञ्जनाद्यवयवस्य ॥२॥

समासे कर्तव्ये पदयोर्मध्ये या विभक्तिस्तस्या व्यञ्जनाद्यवयवस्य लोपो भवति। "एको ह्यवयवो यस्य को ऽसाववयवो भवेत्" इति कथनान्न केवलव्यञ्जनरूपप्रत्ययस्य लोपः स्यात्। छत्यौ गुर्यौं सूतिन् आव्। श्वेतघोटकैरागतः। नीलिस् गुरिस्। अत्र स् प्रत्ययस्य केवलत्वान्न लोपः। छतु शब्दाद् गुरू शब्दाच्च औ सूतिन्प्रत्ययः अनेन मध्यविभक्तेः सूतिन् इति विभक्त्यवयवस्य लोपः। प्रत्ययलोपे प्रत्ययलक्षणम् (पा.सू. १।१।६२) इति उवर्णान्तानामिकारः (२।१।३०) इति यत्वम्।

समास करने पर दोनों पदों के मध्य जो विभक्ति, उसके व्यज्जन आदि अवयव का लोप होता है। 'एक कोई जिसका अवयव, वह अवयवो हो' यह कहने से केवल व्यज्जन रूप प्रत्यय का लोप न हो। छत्यौ गुर्यौं सूतिन् आव्-श्वेतघोटकैरागतः-सफेद घोड़ों से आया। नीलिस् गुरिस्-यहां 'स्' प्रत्यय का केवल होने से लोप नहीं होता। 'छत्त' शब्द से और 'गुरु' शब्द से 'औ सूतिन्' प्रत्यय, इससे मध्य-

विभक्ति के 'सूतिन्' इस विभक्ति अवयव का लोप। 'प्रत्ययलोपे प्रत्ययलक्षणम् (पा. सू. १।१।६२) इति, 'उवर्णान्तानामिकारः' (२।१।३०)इति' 'य' हुआ।

सजातीयविभक्तिकानां विजातीयपदानामन्त्यपदविभक्त्या कथनं द्वन्द्वः ॥३॥

येषां वस्तूनां लोकेषु संयोगोऽसंभाव्योऽपि स्यात्तेष्वपि शब्देषु तुल्यविभक्तिकेषु सत्सु स्वकल्पितस्यान्त्यपदस्य विभक्त्या तेषां कथनं द्वन्दसमासो विज्ञेयः। * नभ् नख् फल्। नभोनखफलम्। एषाँ पदानां यद्यपि संयोगोऽसंभाव्योऽस्ति तथाप्यनेन संगतिः। वारि कुलि फल ज़ल पुछ्य् आव्। वाटिकावृक्षफलजलायागतः। वारु-शब्दात् कुलुशब्दात् फल्शब्दात् जलशब्दाच्च इ पुछ्य् प्रत्ययः। समासमध्ये (सू. २) इति सूत्रेण मध्यमानां पुछ्य् इति प्रत्ययावय-वानां लोपः। प्रथमयोरुवर्णान्तानामिकारः (सू. २।१।३०) इति ऊकारोकारयोरिकारः। इतो लोपः (सू. २।१।६) इति इ प्रत्ययस्य लोपः। अपरयोर्व्यञ्जनान्तत्वादिकारस्याकारः (२।१।४)। माज्य कोर्य। मातापुत्रिके। मालि् पुथर्। पितापुत्रौ। हश न्वष। श्वश्रूस्नुषे। जोम् काकञ। ननन्दाप्रजावत्यौ। पच्य कूच्य। पट्टिकादारुणी।

जिन वस्तुओं का संयोग लोकों में असंभावित भी हो, उन में भी शब्दों में तुल्यविभक्तियों के होने पर स्वकल्पित अन्त के पद की विभक्ति से उनका कहना द्वन्द समास जानना चाहिए। नभ् नख् फल्-नभोनखफलम्। इन पदों का यद्यपि संयोग असंभावित है, तो भी इस से संगति है। वरि कुलि फल जल पुछ्य् आव्-वाटिका-वृक्षफलजलायागतः। 'वारु' शब्द से, कुलु शब्द से, फलशब्द से और जलशब्द से 'इ पुछ्य्' प्रत्यय। समासमध्यें (सू. २) इस सूत्र से मध्यमों के 'पुछ्य्' प्रत्यावयवों का लोप। प्रथमयोरुवर्णान्तानामि-कारः (सू. २।१।३०) से 'ऊकार-ओकार' को 'इकार'। इतो लोपः (सू. २।१।६) से 'इ' प्रत्यय का लोप। दूसरों में व्यञ्जनान्त होने से 'इकार' को 'अकार' (२।१।४)। माज्य कोर्य-मातापुत्रिके-माँ-बेटी। मालि् पुथर्-पितापुत्रौ-बाप-बेटा। हश न्वष-श्वश्रूस्नुषे-सास-बहू।

---

* नव् नम्--मू० पा०

जोम् काकत्र-ननन्दाप्रजावत्यौ-ननद-प्रजावति । पच्य कूच्य-पट्टिका-दारुणी-पट्टिका दारुणि ।

विशेषणविशेष्ययोः पूर्वोत्तरपदस्थयोरेकपदेनाभिधानं कर्मधारयः॥४॥

विशेष्यविशेषणयोर्योग्यसंबन्धत्वाद्युक्तपदत्वं विशेष्याद्बहिर्विशेषण-स्यानवस्थानात् तयोः समविभक्तित्वमपि नित्यमेव स्यात्तयोर्विशेषणे पूर्वपदस्थे विशेष्ये उत्तरपदस्थे सति एकविभक्त्या यत् कथनं स कर्मधारयसमासो विज्ञेयः। बड्यन् द्यारन् छुह् जेनान् । महद्द्रव्या-ण्यर्जयति । म्वचि च्वचि सूतिन् । स्थूलपूपेन । त्रिछि कोरि पुछ्य् । दक्षकन्यायै । बजि लरि प्यठ । महद्गृहात् । बज्य ग्रन्जू हन्दु । महत्संख्यायाः । वडिस् गुरिस् प्यठ् । महदश्वोपरि । अत्र प्रथमान्त्य-योः न् स् प्रत्यययोः केवलत्वान्मध्येऽपि न लोपः । किन्तु न् प्रत्यये सर्वत्र (सू. २।१।१२) इति अकारागमः। उवर्णान्तानामिकारः (सू. २।१।३०) इति सर्वत्र इकारः। ऊदन्तटवर्ग (सू. २।१।२२) इत्यादि सूत्रेण क्रमेण टवर्गान्तस्य चवर्गः । शेषं पूर्ववत् ।

विशेष्यविशेषण में योग्य सम्बन्ध होने से युक्तपदत्व विशेष्य से बाहिर विशेषण के न रहने से उनमें समविभक्तित्व भी नित्य ही हो, उनमें विशेषण के पूर्वपदस्थ होने पर, विशेष्य के उत्तरपदस्थ होने पर एक विभक्ति से जो कहा जाता है, वह कर्मधारय समास जानना चाहिए। बड्यन् द्यारन् छुह् जेनान्-महद्द्रव्याण्यर्जयति-बहुत धन कमाता है । म्वचि च्वचि सूतिन्-स्थूलपूपेन-मोटे पुए से । त्रिछि कोरि पुछ्य्-दक्षकन्यायै-दक्षकन्या के लिए । बजि लरि प्यठ-महद्-गृहात्-बड़ेघर से । बज्य ग्रन्जू हन्दु-महत्संख्यायाः-बड़ी संख्या का । वडिस् गुरिस् प्यठ-महदश्वोपरि-बड़े घोड़े पर। यहां प्रथम और अन्त के 'न्-स् प्रत्यय में केवलत्व होने से मध्य में भी लोप नहीं होता है, किन्तु 'न्' प्रत्यय में सर्वत्र (सू० २।१।१२) इससे 'अकार' का आगम । उवर्णान्तानामिकारः (सू. २।१।३०) से सर्वत्र 'इकार'। ऊदन्तटवर्गः (सू. २।१।२२) इत्यादि सूत्र से क्रमपूर्वक टवर्गान्त को चवर्ग । बाकी पहिले की तरह ।

अप्रथमान्ते पूर्वपदे विभिन्नविभक्तिकयोः पदयोर्युगपत्कथनं तत्पुरुषः ॥ ५ ॥

संभाव्यसंयोगसत्ताकयोः पदयोर्मध्यात्प्रथमाविभक्तिव्यतिरिक्ते पूर्वपदस्थे सति तुल्यातुल्यप्रथमादिविभक्तिके उत्तरपदस्थे तयोर्युगपत्कथनं स तत्पुरुषसमासो बोध्यः। श्राकि खश्। छुरिकाच्छेदः। टोपि फलु। शिरस्त्रमान्तम्। सर्प वय सूतिन्। सर्पभयेन। राज न्यचिवि पुछय। राजपुत्राय। बट कोर्य हन्दु। ब्राह्मणकन्यायाः। स्वन डब अन्। स्वर्णपुटकमानय। म्यचि फ्वतु थव्। मृत्कटोलं निधेहि।

संभाव्यसंयोगसत्ताकपदों के मध्य से प्रथमाविभक्ति से व्यतिरिक्त पूर्वपद में स्थित होने पर तुल्यातुल्यप्रथमादि विभक्तिक उत्तरपदस्थ में उनका जो एक साथ कथन, वह तत्पुरुष समास जानना। श्राकि खश-छुरिकाच्छेदः-छुरी से काटना। टोपि फलु-शिरस्त्रमान्तम-शिर का कवच। सर्प वय् सूतिन्-सर्पभयेन-सांप के डर से। राज न्यचिवि पुछय्-राजपुत्राय-राजकुमार के लिए। बट कोर्य हन्दु-ब्राह्मणकन्यायाः-ब्राह्मणकन्या का। स्वन डब अन्-स्वर्णपुटकमानय-सोने का डिब्बा लाओ। म्यचि फ्वतु थव्-मृत्कटोलं निधेहि-मिट्टी के प्याले को रक्खो।

उत्तरपदस्थस्य पोञुशब्दस्य यो वः ॥ ६ ॥

समासविषये पोञुशब्द उत्तरपदस्थे सति पोञुशब्दसंबन्धिनः पकारस्य वकारः स्यात्। गंग वोञु। गङ्गाजलम्। व्यथ वोञु। वितस्ताजलम्। शीन वोञु। हिमजलम्। वुग वोञु। ओघजलम्। मार वोञु। मारीजलम्। क्रीरि वोञु। कूपपानीयम्। रूद वोञु। वर्षापानीयम्। नाग वोञु। अखातजलम्। समासे किम्। व्यथि हन्दि पाञि सूतिन्। वितस्तायाः पानीयेन।

समासविषय में 'पोञ्' 'शब्द उत्तरपद में स्थित होने पर 'पोञ्' शब्द से सम्बद्ध 'यकार' को 'वकार' होता है। गंग वोञु-गङ्गाजलम्-गङ्गा का जल। व्यथ वोञु-वितस्ताजलम्-वितस्ता का जल। शीन वोञु-हिमजलम्-बर्फ का जल। वुग वोञु-ओघजलम्-प्रवाह का जल। मार वोञु-मारीजलम्-मारी का जल। क्रीरि वोञु-कूपपानीयम्-कुएं का जल। रूद वोञु-वर्षापानीयम्-वर्षा का जल। नाग वोञु-अखातजलम्-खाई (गड्डे) का जल। समास में क्या? व्यथि हन्दि पाञि सूतिन्-वितस्तायाः पानीयेन-वितस्ता के जल से।

पूर्वपदस्थे ञस्यानुस्वारः ॥ ७ ॥

समासविषये पोञुशब्दे पूवपदस्थे सति ञकारस्यानुस्वारो भवति । पाँ त्रख् । पानीयद्रोणः । पाँ नटु । पानीयकुम्भः । समासे किम् । पाञुकु त्रख् । पानीयस्य द्रोणः ।

समास के विषय में 'पोञु' शब्द के पूर्वपद में स्थित ञकार' को अनुस्वार होता है । पाँ त्रख्-पानीयद्रोणः-पानी का दोना । पाँ नटु-पानीयकुम्भः-पानी का घड़ा । समास में क्या ? पाञुकु त्रख्-पानीयस्य द्रोणः-पानी का दोना ।

दाञशब्दस्यापि ॥ ८ ॥

समासविषये दाञशब्दे पूर्वपदस्थे सति ञकारस्यानुस्वारो भवति । दाँ खार् । धान्यखारी । दाँ फ्वतु । धान्यकटोलः । अपि-शब्दादन्येभ्योऽपि । वाँ ग्यलु । वणिक्तृणं । वाँ कूरू । वणिक्कन्या । समासे किम् । दाञचू खार् ।

समास के विषय में 'दाञ' शब्द के पूर्वपद में स्थित होने पर 'ञकार' को अनुस्वार होता है । दाँ खार-धान्यखारी-धान की खारी । दाँ फ्वतु-धान्यकटोलः-धान का बुखारा । अपि शब्द से अन्यों से भी । वाँ ग्यलु-वणिक तृणं-वणिये का घास । वाँ कूरू-वणिक् कन्या-वणिए की लड़की । समाज में क्या ? दाञचू खार् ।

पथ्र्शब्दस्य पुंलिङ्गे च ॥ ९ ॥

पथ्र्शब्दः स्वयं पुंलिङ्गः समासेऽपि पुंल्लिङ्गेन निर्देशे कर्त्तव्ये पकारस्य वकारो भवति । बोञि वथ्र् । छायावृक्षपत्रम् । पोषवथ्र् । पुष्पपत्रम् । ख्यलल वथ्र् । पद्मतृणपत्रम् । हाक वथ्र-शाकपत्रम् । पुंल्लिङ्गेन किम् । मुलि पत्र् । मूलिकापत्रम् । ग्वग्जिपत्र । इत्यादि ।

'पथ्र्' शब्द स्वयं पुंल्लिङ्ग समास में भी पुंल्लिङ्ग से निर्देश देने पर 'पकार' को 'वकार' होता है । बोञि बथ्र्-छायावृक्ष-पत्रम्-छायादार वृक्ष का पत्ता । पोप वथ्र्-पुष्पपत्रम्-फूलपत्ता । ख्यलल वथ्र्-पद्मतृणपत्रम्-कमल के तिनके का पत्ता । हाक वथ्र्-शाक-पत्रम्-साग का पत्ता । पुंल्लिङ्ग से क्या ? मुलि पत्र्-मूलिकापत्रम्-मूली का पत्ता । ग्वग्जि पत्र्-इत्यादि ।

पंचाहः समासे ॥ १० ॥

समासविषये पंचाह् शब्दस्य पकारस्य वकारो भवति। अक-वन्जाह्। द्ववन्जाह्। कुनवन्जाह्। इत्यादि।

समास के विषय में 'पंचाह्' शब्द के 'पकार' को 'वकार' होता है। अकवन्जाह्। द्ववन्जाह्। कुनवन्जाह्-इत्यादि।

शैठः शस्य हः ॥ ११ ॥

कुनहैठ्। अकहैठ्। द्वहैठ्। इत्यादि।

च्वटूशब्दस्य म्वंडू आदेशः सस्यव्यतिरिक्ते ॥ १२ ॥

सस्यव्यतिरिक्तस्य वस्तुनः अपूपार्थके च्वटूशब्दे उत्तरपदस्थे म्वंडू आदेशो भवति। टूल्-म्वंडू। अण्डापूपः। नदुरि् म्वंडू। बिसापूपः। चामञ्- वंडू। आमिक्षापूपः। अद्रक्-म्वंडू। आद्रकापूपः। सस्यव्यतिरिक्तं किम्। त्वम्ल-च्वटू। तण्डूलापूपः। कन्क-च्वटू। गोधूमापूपः। वुष्कि-च्वटू। यवापूपः। सस्येऽपि पुंल्लिङ्गनिर्देशेन म्वंडू आदेश इष्यते। त्वम्ल-म्वंडू। अव-म्वंडू। इत्यादि।

सस्य (घास-खेती) से भिन्न वस्तु के अपूप अर्थ में 'च्वटू' शब्द के उत्तरपद में स्थित होने पर 'म्वंडू' आदेश होता है। टूल्-म्वंडू-अण्डापूपः-अण्डे के पूए। नदुरि्म्वंडू-बिसापूपः-बिस के पूए। चामञ् म्वंडू-आमिक्षापूपः-पनीर के पूए। अद्रक्-म्वंडू-आद्रकापूपः-अदरक के पूए। सस्य से अतिवित क्या ? त्वम्ल-च्वटू-तण्डुलापूपः-चावल के पूए। कन्क-च्वटू-गोधूमापूपः-गन्दम के पूए। वुष्किच्वटू-यवापूपः-जौ के पूए। सस्य में भी पुंल्लिङ्गनिर्देश से 'म्वंडू' आदेश होता है। त्वम्ल-म्वंडू, अवम्वंडू। इत्यादि।

पूर्वोत्तरपदस्थभेद्यभेदकोभयविशिष्टान्यपदबोधकोवहुब्रीहि ॥१३॥

विशेष्ये पूर्वपदस्थे विशेषणे चोत्तरपदस्थे सति तदुभयेन विशिष्टस्यान्यपदस्य ज्ञानविधायको वहुब्रीहिर्विज्ञेयः। यड-बडू। वृहदुदरः। दारि-ज्यूठू। दीर्घश्मश्रुः। कन-च्वटु। छिन्नकर्णः। दु-वहरु्। द्विवार्षिकः। दु-वरिश्। द्विवार्षिकी। सत-ब्रोचु। सप्तकुटु-म्बः। पाँच-प्यतुर। पञ्चपुत्रः। ह्नि-वुथु। श्वमुखः। अत्र मध्य-पदलोपो वुद्धिमतावधार्यः।

विशेष्य के पूर्वपद में स्थित होने पर और विशेषण के उत्तरपद में स्थित होने पर उन दोनों से विशिष्ट अन्य पद का ज्ञानविधायक बहुब्रीहि जानना। यड-बड़ू-वृहदुदरः-बड़े पेट बाला। दारि-ज्यूठू-दीर्घश्मश्रुः-लम्बी दाढ़ी वाला। कन-चवटु-छिन्नकर्णः-कटे हुऐ कान बाला। दु-वहरू-द्विवार्षिकः-दुवरिश्-दो साला। द्विवार्षिकी-दुवरिश्-दो साली। सत्त-बोचु-सप्तकुटुम्ब.-सात कुटुम्ब बाला-। पाँच-प्यतुर-पञ्चपुत्रः-पांचपुत्रों बाला। ह्नि-वुथु-श्वमुखः-कुत्ते की तरह मुख बाला। यहां बुद्धिमान् पुरुष को मध्यपदलोप कर लेना चाहिए।

द्विरुक्तेन च ॥ १४ ॥

एकेनैव पदेन द्विरुक्तेन विशिष्टस्यान्यपदस्यावबोधकृच्च बहुब्रीहिर्विज्ञेयः। स च स्त्रीलिंगः। ठ्वल ठ्वल्। श्रृंगाश्रृंगि। टप टफ्। खुराखुरि। ठूंक ठूंख्। भृङ्गाभृङ्गि। चप चफ्। दन्तादन्ति।

इति श्री शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते समासप्रक्रिया समाप्ता ॥ ३ ॥

अथ तद्धितप्रक्रिया ॥ ४ ॥

जातेरपत्यार्थे पूतु ॥ १ ॥

अपत्येऽभिधेये सति जातेर्जातिवाचकाच्छब्दात् 'पूतु' प्रत्ययो भवति । दर-पूतु । कौल-पूतु । तिकि-पूतु । इत्यादि । दर् कौल् त्युकु इति जातिवाचकाः शब्दाः । अनेन सूत्रेण पूतु प्रत्ययः । व्यञ्जनान्तानामकारागमः (सू० २।१।३६) । तृतीये युकारोपधाया इत्वम् (सू० २।१।७६) । उवर्णान्तानामिकारः (सू० २।१।३०) । एवमुत्तरत्र ज्ञेयम् । जातिशब्दग्रहणात्पशुपक्ष्यादीनां जातिर्गृह्यते । काव-पूतु । काकपोतः । पछिन्-पूतु । पक्षिपोतः । क्वकर्-पूतु । कुक्कुटपोतः । कट पूतु । मेषपोतः । म्याँ-पूतु । मेषपूतः । कोतर्-पूतु । कपोतपोतः । इत्यादि ।

अपत्य के अभिधेय होने पर जाति से वा जातिवाचकशब्द से 'पुतु' प्रत्यय होता है । दर-पूतु, कौल-पूतु, तिकिपूतु, इत्यादि । दर, कौल्, त्युकु ये जातिवाचक शब्द हैं । इस सूत्र से 'पूतु' प्रत्यय । व्यञ्जनान्तानामकारागमः (सू० २।१।३६) । तृतीये युकारोपधाया इत्वम् (सू० २।१।३६) । उवर्णान्तानामिकारः (सू० २।१।३०) । इसी तरह आगे भी जानना । जातिशब्दग्रहण से पशु-पक्षी आदि की जाति ग्रहण की जाती है । काव-पूतु-काकपोतः-कौए का बच्चा । पछिन्-पूतु-पक्षिपोतः-परिन्दे का बच्चा । क्वकर्-पूतु-कुक्कुटपोतः-कुक्कड़ का बच्चा । कट-पूतु-मेषपोतः-भेड़ का बच्चा । म्याँ-पूतु-मेषपूतः-बिल्ली का बच्चा । कोतर्-पूतु-कपोतपोतः-कबूतर का बच्चा, इत्यादि ।

न संज्ञायाः ॥ २ ॥

पित्रादिनाम्नः परः पूतु प्रत्ययो न भवतीति परिभाष्यते । पितृ-आदि नाम से परे 'पूतु' प्रत्यय नहीं होता है, ऐसी परिभाषा है ।

चूरशब्दाद्बालक्रीडायां च ॥ ३ ॥

पित्रादौ स्तनन्धयं क्रीडयति सति चूरशब्दात् पूतु प्रत्ययो भवति। च शब्दाच्चौरपुत्रेऽभिधेयेऽपि। चूर-पूतु। चौरपोतः।

पितृ-आदि में दूध पीने वाले बच्चे के खेलने के अर्थ में 'चूर्' शब्द से 'पूतु' प्रत्यय होता है, 'च' शब्द से चौरपुत्र अभिधेय में भी। चूर-पूतु-चौरपोतः-चोर का बच्चा।

मिञ्शब्दात्स्वार्थे ॥ ४ ॥

चुम्बनवाचकात् मिञ् शब्दात्-स्वार्थ एव पूतु प्रत्ययो भवति। मिञ्-पूतु। चुम्बनम्। मिञ् इत्यस्य म्वञ् च कथ्यते। तेन। म्वञ्-पूतु। चुम्बनम्। इत्यपि भवति।

चुम्बनवाचक 'मिञ्' शब्द से स्वार्थ में ही 'पूतु' प्रत्यय होता है। मिञ्-पूतु-चुम्बनम्। 'मिञ्' इसे 'म्वञ्' भी कहा जाता है, जिससे म्वञ्-पूतु-चुम्बनम्-चुम्बन, यह भी होता है।

अनादरापत्यार्थेऽधमशब्देभ्यः कठ् ॥ ५ ॥

अनादरेण क्रोधेन च अपत्ये अभिधेये इति अधमशब्देभ्यः परः कठ् प्रत्ययो भवति। चूर-कठ्। चौरपुत्रः। गान-कठ्। विटपुत्रः। पोग-कठ्। नाशपुत्रः। वाज़्-कठ्। सूदपुत्रः। रास्-कठ्। जारजः। क्व-कठ्। कुपुत्रः। सुशब्दादपि दृश्यते। स्व-कठ्। सुपुत्रः। स्वख्-कठ्। सुखपुत्रः।

अनादर से और क्रोध से अपत्य अभिधेय होने पर अधम शब्दों से परे 'कठ्' प्रत्यय होता है। चूर-कठ्-चौरपुत्रः-चोर का लड़का। गान-कठ्-विटपुत्रः-विट का पुत्र। पोग-कठ्-नाशपुत्रः-नाश का पुत्र। वाज़्-कठ्-सूदपुत्रः-रसोइए का लड़का। रास्-कठ्-जारजः—जार से पैदा हुआ। क्व-कठ्-कुपुत्रः-कुपुत्र। 'सु' शब्द से भी दिखाई देता है। स्व-कठ्-सुपुत्रः-सुपुत्र। स्वख्-कठ्-सुखपुत्रः-सुख का पुत्र।

स्वस्वकार्योद्यमेनाभिधेये कटु ॥ ६ ॥

जातिवाचकानां शिल्पवाचकानां च शब्दानां निजनिजकार्यस्योद्यमेनापत्ये अभिधेये सति कटु प्रत्ययो भवति। वट-कटु। ब्राह्मणपुत्रः। दर-कटु। दरपुत्रः। कौल-कटु। कौलपुत्रः। स्वन्र्-कटु। स्वर्णकारपुत्रः। मन्र्-कटु। शङ्खिकपुत्रः। छान-कटु। तक्षकपुत्रः।

जातिवाचक और शिल्पवाचक शब्दों के अपने-अपने कार्य के

उद्यम से अपत्य अभिधेय होने पर 'कटु' प्रत्यय होता है। वट-कटु-ब्राह्मणपुत्रः-ब्राह्मण का बेटा। दर-कटु-दरपुत्रः-दर का बेटा। कौल-कटु-कौल पुत्रः-कौल का बेटा। स्वन्र्-कटु-स्वर्णकारपुत्रः-सुनार का बेटा। मन्र्-कटु-शाङ्खिकपुत्रः-शाङ्खिक का बेटा। छान-कटु-तक्षक-पुत्रः-तक्षक का बेटा।

मूँषशब्दाच्च ॥ ७ ॥

महिषीवाचकस्य मूँष्शब्दस्यापत्ये अभिधेये कटु प्रत्ययो भवति। मेँष कटु। महिषः। मूँषशब्दात् कटु प्रत्ययः। व्यञ्जनान्तानामकारागमः (सू० २।१।३६)। मूँष ऐत्वम् (सू० २।३।२८) इति सूत्रेण ऊकारस्य ऐत्वम्।

महिषीवाचक 'मूँष' शब्द के अपत्य अभिधेय में 'कटु' प्रत्यय होता है। मेँष कटु-महिषः-भैंसा। 'मूँष' शब्द से 'कटु' प्रत्यय। व्यञ्जनान्तानामकारागमः (सू० २।१।३६)। मूँष ऐत्वम् (सू० २।३।२८) इस सूत्र से 'ऊकार' को 'ऐ'।

पित्रोः सहजापत्योयसंबन्धे पुंसि तुरु ॥ ८ ॥

पित्रोर्जनयितुर्जनन्याश्च सहजौ पितृभ्राता पितृभगिनी मातृभ्राता मातृभगिनी च तयोः पुमपत्यसंबन्धिनि संबन्धे अभिधेये सति तत्तच्छब्दात् तुरु प्रत्ययो भवति। प्वफतुरु बोयु। पैतृष्वस्रीयः। मासतुरु बोयु। मातृष्वस्रीयः। मामतुरु बोयु। मातुलपुत्रः।

जन्म देने वाले पिता और माता के सगे पिता का भाई (चाचा), पिता की बहिन (बुआ), माता का भाई (मामा) और माता की बहिन (मासी), उन दोनों में पुरुष सन्तान से सम्बद्ध संबन्ध के अभिधेय होने पर उस-उस शब्द से 'तुरु' प्रत्यय होता है। प्वफतुरु् बोयु-पैतृष्वस्रीयः-पैतृष्वस्रीय। मासतुरु् बोयु-मातृष्वस्रीयः। मातृष्वस्रीय। मामतुरु् बोयु-मातुलपुत्र-मामे का लड़का।

स्त्रियां तुर् ॥ ९ ॥

तेषामेव शब्दानां स्त्र्यपत्यसंबन्धिनि संबन्धे अभिधेये सति 'तुर्' प्रत्ययः स्यात्। प्वफतुर् व्यञ्। पैतृष्वस्रीया। मासतुर् व्यञ्। मातृष्वस्रीया। मामतुर् व्यञ। मातुलपुत्रिका।

उन्हीं शब्दों का स्त्री-सन्तान से सम्बद्ध संबन्ध के अभिधेय होने पर 'त्र्' प्रत्यय होता है। प्वफत्र् व्यञ्-पैतृष्वस्रोया-पैतृष्वस्रीया। मासत्र् व्यञ्-मातृष्वस्रीया-मातृष्वस्रीया। मामत्र् व्यञ्-मातुल-पुत्रिका-मामा की बेटी।

पित्र्शब्दात्त्र्लोपः ॥ १० ॥

स्पष्टम्। पितुरु् बोयु। पैतृव्यः। पित्र् व्यञ्। पितृव्यपुत्री। एवं प्वफत्र् बायि काकञ्। पैतृष्वस्रीयभार्या। मासत्र्-बायि काकञ्। मातृष्वस्रीयभार्या। मामत्र् बायि काकञ्। मातुलपुत्र-भार्या। पित्र् बायि काकञ्। पैतृव्यभार्या।

स्पष्ट है। पितुरु् बोयु-पैतृव्यः-चाचे का लड़का। पित्र् व्यञ्-पितृव्यपुत्री-चाचा की लड़की। इसी तरह प्वफत्र् बायि काकञ्-पैतृष्वस्रीयभार्या। मासत्र् बायि काकञ्-मातृष्वस्रीयभार्या। माम-त्र् वायि काकञ्-मातुलपुत्रभार्या। पित्र् वायि काकञ्-पैतृव्य-भार्या।

ब्यञबोयुशब्दाभ्यां पुमपत्ये थ्रन्त्ययोर्नबौ च ॥ ११ ॥

ब्यञबोयुशब्दयोः पुमपत्येऽभिधेये सति थ्र् प्रत्ययो भवति अन्त्या-क्षरयोश्च क्रमेण नकारबकारादेशौ भवतः। ब्यन थ्र्। भागिनेयः। बाव थ्र्। भ्रातृव्यः।

'ब्यञ-बोयु' शब्दों को पुरुषसन्तान में अभिधेय होने पर 'थ्र्' प्रत्यय होता है और अन्त के अक्षरों में क्रम से 'नकार-बकार' आदेश होते हैं। ब्यन थ्र्-भागिनेयः-बहिन का लड़का। बाव थ्र्-भ्रातृव्यः-भाई का लड़का।

स्त्र्यपत्ये नो नवौ च ॥ १२ ॥

तयोर्व्यञबोयुशब्दयोः स्त्र्यपत्येऽभिधेये सति ज़ प्रत्ययो भवति अन्त्याक्षरयोश्च नकारवकारौ भवतः। ब्यन्ज़। भागिनेयी। बाव्ज़। भ्रातृपुत्री।

उन ब्यञ और बोयु शब्दों में स्त्री-सन्तान के अभिधेय होने पर 'ज़' प्रत्यय होता है और अन्त के अक्षरों में 'नकार और वकार' होते

हैं। ब्यन्ज़-भागिनेयी-बहिन की लड़की। बावज़-भ्रातृपुत्री-भाई की लड़की।

द्रियुशब्दस्य द्यारादेशश्च॥ १३॥

देवरवाचकस्य द्रियुशब्दस्य पुंस्त्र्यपत्येऽभिधेये पूर्वोक्तौ प्रत्ययौ भवतः। द्रियुशब्दस्य च द्यार आदेशः स्यात्। द्यारथ्र्। देवरपुत्रः। द्यारज़। देवरपुत्री।

'देवर' वाचक 'द्रियु' शब्द के पुरुष और स्त्री सन्तान के अभिधेय होने पर पूर्वोक्त प्रत्यय हुआ करते हैं और 'द्रियु' शब्द को 'द्यार' आदेश होता है। द्यारथ्र्-देवरपुत्रः-देवर का लड़का। द्यारज़-देवरपुत्री-देवर की लड़की।

तदस्यास्तीत्यलादयः॥ १४॥

तत् अस्ति अस्य इत्यस्मिन्नर्थे वक्ष्यमाणा अलादयः प्रत्ययाः स्युः।

'वह इसका है' इस अर्थ में वक्ष्यमाण 'अल्-आदि' प्रत्यय होते हैं।

स्वमूर्तिवर्तमानद्रव्यगुणवत्त्वाभिधेयेऽल्॥ १५॥

प्राणिनोऽप्राणिनो वा निजमूर्तौ वर्तमानं यद्द्रव्यं गुणो वा तद्वत्त्वेन तस्मिन्नभिधेये सति द्रव्यशब्दाद्गुणशब्दाच्च अल् प्रप्ययो भवति न चात्र गुणशब्देन शुक्लादिगुणा गृह्यन्ते इति। दार्यल्। श्मश्रुलः। गोछल्। गुम्फवान्। डग्वल। काकपक्षवान्। बबल्। स्तनवती। कोछल्। कोष्ठवान्। ह्यङ्गल्। शृङ्गी। टूंकल्। शृङ्गाघाती। ट्वलल्। शृङ्गाघाती। चपल्। दन्ताघाती। फशल्। वेशवान्। ग्यत्रल्। वलिनः। स्यसल्। सीमावान्। प्वंदल्। क्षुतवान्। मछ्यट्यचल्। तिलकालकः। चासल्। कासवान्। व्रूंटल्। पर्दी। साधनं पूर्ववत्।

प्राणि से वा अप्राणि से अपनी मूर्ति में वर्तमान जो द्रव्य वा गुण, उससे सम्बद्ध होने से उस अभिधेय में द्रव्यशब्द और गुण शब्द से 'अल्' प्रत्यय होता है और यहां गुणशब्द से शुक्लादि गुणों का ग्रहण नहीं किया जाता। दार्यल्-श्मश्रुलः-दाढ़ी वाला। गोछल्-गुम्फवान्-गुम्फ वाला। डग्वल-काकपक्षवान्-घुंघराले बालों वाला। बबल्-स्तनवती-स्तनों वाली। कोछल्-कोष्ठवान्-कोष्ठ वाला। ह्यङ्गल्-शृङ्गी-

सींगवाला। टूंकल्-शृङ्गाघाती-सींग से प्रहार करने वाला। ट्वलल्-शृङ्गाघाती-सींग से प्रहार करने वाला। चपल्-दन्ताघाती-दान्तों से प्रहार करने वाला। फशल्-वेशवान् वेशयुक्त। ग्यत्रल्-वलिन:-वली का। स्यसल्-सीमावान्-सीमा वाला। प्वंदल्-क्षुतवान्। मछ्यट्यचल्—तिल कालक:। चासल्-कासवान्। ब्रूंटल्-पर्दी साधन पहिले की तरह।

हाचोऽभियोक्तरि ॥ १६ ॥

अभियोगकृदर्थे हाच् शब्दादल् भवति न त्वभियोज्यार्थे। हाचल्-अभियोक्ता।

अभियोगकृत अर्थ में हाच्' शब्द से 'अल्' प्रत्यय होता है, न कि अभियोज्य अर्थ में। हाचल्-अभियोक्ता।

ज्यव: सूचके ॥ १७ ॥

ज्यव् शब्दात्सूचकार्थे अल् प्रत्ययो भवति। ज्यवल्। सूचक:। न तु जिह्वावान्। किन्तु तत्र। ज्यविसस्तु, वा-ज्या विवोलु (सू० २४) इति भवति।

'ज्यव्' शब्द से सूचक अर्थ में 'अल्' प्रत्यय होता है। ज्यवल्-सूचक:-सूचक, न कि जिह्वा वाला, किन्तु वहां ज्यविसस्तु-वा-ज्या-विवोलु (सू० २४) यह होता है।

ब्यत्रकूरूशब्दाभ्यामश्लीले ॥ १८ ॥

स्पष्टम्। ब्यत्रल्। कोर्यल्। अश्लीले किम्। ब्यत्रवोलु (सू० २४)। भगिनीवान्। कोरिवोलु। कन्यावान्।

स्पष्ट है। ब्यत्रल्, कोर्यल्। अश्लील में क्या? ब्यत्र वोलु (सू० २४)। भगिनीवान्-बहिन वाला। कोरिवोलु-कन्यावान्-कन्या वाला।

दारशब्दाच्छ्मश्रौ वा ॥ १९ ॥

स्पष्टम्। दारियाल्। श्मश्रुल:।
स्पष्ट है। दारियाल्-श्मश्रुल:—दाढ़ी वाला।

क्वचिल्लदपि ॥ २० ॥

द्रव्यगुणवत्त्वऽभिधेये सति क्वचित् लद् प्रत्ययोऽपि भवति। स च प्रायो दोष एव। फकलद्। दुर्गन्धः। छ्वकलद्। विदग्धः। छ्वकलद्। व्रणी। बकलद्। भषणवान्। द्रखलद्। दुःखी। द्रागलद्। दुर्भिक्षहतः। क्वचिद्ग्रहणात्। गोछलद्। डखलद्। बचलद्। इति न भवति। किन्तु ग्यञलद्। स्यस्लद्। चासिलद्। इत्यादीनां द्वयमेव भवति।

द्रव्यगुणवत्त्व अभिधेय होने पर कहीं पर 'लद्' प्रत्यय भी होता है और वह प्रायः दोष ही। फकलद्-दुर्गन्धः-बदबू। छ्वकलद्-विदग्धः-चतुर। छ्वकलद्-व्रणी-जख्मी। बकलद्-भषणवान्। द्रखलद्-दुःखी। द्रागलद्-दुर्भिक्षहतः-दुर्भिक्ष से मारा। कहीं ग्रहण करने से। गोछलद्, डखलद्, बचलद्, यहां नहीं होता है। किन्तु ग्यञलद्, स्यस्लद्, चासिलद्, इत्यादि के दोनों ही होता है।

फश उन्मादिनि ॥ २१ ॥

फञ् शब्दादुन्मत्तस्यार्थे लद् भवति। फशलद्। उन्मत्तकल्पः। अन्यत्र-फशल्। वेशकारी।

'फञ्' शब्द से उन्मत्त के अर्थ में 'लद्' होता है। फशलद्-उन्मत्तकल्पः-उन्मत्तकल्प। और जगह 'फशल्'-वेशकारी।

पजु अपजु शब्दाभ्यां योरु ॥ २२ ॥

आभ्यां शब्दाभ्यां सहितत्वे वाच्ये योरु प्रत्ययो भवति। पज़ियोरु्। सत्यवक्ता। अपजियोरु्। असत्यवक्ता।

पजु और अपजु शब्दों से सहितत्व वाच्य में 'योरु्' प्रत्यय होता है। पज़ियोरु्-सत्यवक्ता-सच बोलने बाला। अपजियोरु-असत्यवक्ता-झूठ बोलने बाला।

मन्ज्युमशब्दाद्दूतार्थे ॥ २३ ॥

दूतस्यार्थे मन्ज्युम्शब्दात् योरु् प्रत्ययो भवति। मन्ज्युम्योरु। दूतः।

दूत के अर्थ में 'मन्ज्युम्' शब्द से 'योरु्' प्रत्यय होता है। मन्ज्युम्योरु्-दूतः-दूत।

मूर्तिबाह्यवस्तुवत्त्वे वोलुप्राकौ ॥ २४ ॥

निजमूर्तेर्भिन्नैर्वस्तुभिः सहितत्वेऽभिधेये ग्राक्वोलु प्रत्ययौ भवतः। द्यारवोलु। धनवान्। लरिवोलु। गृहवान्। शायिवोलु। स्थानवान्। कोरिवोलु। कन्यावान्। न्यचिविवोलु। पुत्रवान्। गपनवोलु। गोपशवान्। इत्यादि। एवं लरिग्राख्। इत्यादिस्वरूपाणि भवन्ति। गरशब्दस्य गृहाध्यक्षार्थेऽकारलोप इष्यते। गर्वोलु। गृहाधिपः। अन्यत्र। गरवोलु। गृहवान्।

अपनी मूर्ति से भिन्न वस्तुओं के साथ सहितत्व अभिधेय में 'ग्राक् और वोलु' प्रत्यय होते हैं। द्यारवोलु-धनवान्-धनी। लरिवोलु-गृहवान्-घर वाला। शायिवोलु-स्थानवान्-स्थान वाला। कोरिवोलु-कन्यावान्-कन्या वाला। न्यचिविवोलु-पुत्रवान्-पुत्रवाला। गपनवोलु-गोपशवान्-गोपशवाला। इत्यादि। इसी तरह 'लरिग्राख्' इत्यादि स्वरूप होते हैं। 'गर' शब्द का गृह के अध्यक्ष के अर्थ में 'अकार' का लोप होता है। गर्वोलु-गृहाधिपः-घर का स्वामी। दूसरी जगह। गरवोलु-गृहवान्-घर वाला।

जीवादिव्यथाकारिभ्यो हतु ॥ २५ ॥

यैर्यैरान्तरीयैर्बाह्यैर्वा वस्तुभिर्जीवादिनैव पीडा भुज्यते न तु देहेन तत्सहितत्वे अभिधेये सति हतु प्रत्ययः स्यात्। न्यद्रि हतु। निद्राहतः। त्रेषहतु। तृषाहतः। ब्वछहतु। बुभुक्षाहतः। क्रुदहतु। क्रोधाहतः। गुमहतु। स्वेदाहतः। तापहतु। आतपाहतः। तूरिहतु। शीताहतः। आरहतु। दयाहतः। लवहतु। जलकणाहतः। तावहतु। दाहहतः। इति द्वयमन्यस्मिन्नपि विशेषणे क्रियते। तावहचू बुतराय्। दाहहता पृथ्वी इति।

जिन-जिन अन्दरूनी वा बाहरी वस्तुओं द्वारा जीव आदि से ही पीड़ा भोगी जाती है न कि देह से, तत्सहित अभिधेय होने पर 'हतु' प्रत्यय होता है। न्यदरि हतु-निद्राहतः-नीन्द से आहत। त्रेषहतु-तृषाहतः-प्यास से आहत। ब्वछहतु-बुभुक्षाहतः—भूख से आहत। क्रुदहतु-क्रोधाहतः-क्रोध से आहत। गुमहतु-स्वदेहाहतः-अपने देह से आहत। तापहतु-आतपाहतः-धूप से आहत। तूरिहतु-शीताहतः-सर्दी से आहत। आरहतु-दयाहतः-दया से आहत। लवहतु-जलकणाहतः-जल की बूंदों से आहत। तावहतु-दाहहतः-आग की जलन से आहत। ये दो और भी जगह विशेषण के रूप में आते हैं। तावहचू बुतराय।

दाहहता पृथ्वी । आग की जलन से हृत पृथ्वी ।

मंदछमोदमानेभ्यो व्यतु ॥ २६ ॥

एभिस्त्रिभिः शब्दैः सहितत्वे ऽभिधेये व्यतु प्रत्ययो भवति । मंदछव्यतु । मन्दाक्षयुतः । मोदव्यतु । आदरयुतः । मानव्यतु । मानयतः ।

इन तीनों शब्दों से सहितत्व अभिधेय में 'व्यतु' प्रत्यय होता है । मंदछव्यतु । मन्दाक्षयुतः । मन्दाक्षयुक्त । मोदव्यतु । आदरयुतः । आदरयुक्त । मानव्यतु । मानयुतः मानयुक्त ।

बर्शशब्दादादयार्थे ॥ २७ ॥

स्पष्टम् । वर्शव्यतु । आढयः ।

स्पष्ट है । वर्शव्यतु-आढयः-अमीर ।

दग्दनस्तोरनिष्टार्थे आन् ॥ २८ ॥

दंद्नस्त् शब्दाभ्यामनिष्टार्थाभ्यां सहितत्वेऽभिधेये सति आन् प्रत्ययो भवति । दंदान् । दन्तुरः । नस्तान् । दुर्नासिकः ।

'दंद और नस्त् 'शब्दों से अनिष्ट अर्थ में सहितत्व अभिधेय में 'आन्' प्रत्यय होता है । दंदान्-दन्तुरः । नस्तान्-दुर्नासिकः-खराब नाक बाला ।

उ्वा ॥ २९ ॥

आभ्यां शब्दाभ्यां विकल्पेन उ् प्रत्ययो भवति । नस्तु । दंदु । पक्षे । नस्तूरू । दंदूरु् ।

इन शब्दों से विकल्प से 'उ्' प्रत्यय होना है । नस्तु दंदु । पक्ष में । नस्तूरू । दंदूरु् ।

यङ्शब्दाद्वृद्धावल् ॥ ३० ॥

स्पष्टम् । यडल् । तुन्दिलः । तोन्द बाला ।

जिघत्सावलोपश्च ॥ ३१ ॥

स्पष्टम् । यड्ल् । कुक्षिभरिः । पेटू ।

हर्शब्दात्ताच्छील्ये ॥ ३२ ॥

अस्माच्छब्दात्तच्छीले अर्थे अल् प्रत्ययोऽकारलोपश्च स्यात् ।

हर्ल् । कलहशीलः ।

इस शब्द से तच्छील अर्थ में 'अल्' प्रत्यय और 'अकार' का लोप होता है । हर्ल्-कलहशीलः-झगड़ालू स्वभाव वाला ।

जतुशब्दात्तद्वति ॥ ३३ ॥

स्पष्टम् । अच्ल् । रोमवान् ।

स्पष्ट है । अच्ल्-रोमवान्-रोम वाला ।

वैंसो जैवातृकेऽट् ॥ ३४ ॥

वैंस्शब्दादायुष्मत्त्वेऽभिधेये सति अट् प्रत्ययो भवति । वैंसट् । आयुष्मान् ।

'वैंस्' शब्द से आयुष्मत्त्व अभिधेय होने पर 'अट्' प्रत्यय होता है । वसट्-आयुष्मान्-दीर्घजीवी ।

रषस्ताच्छील्ये ॥ ३५ ॥

'रष्' शब्दात्ताच्छील्यार्थे अट् प्रत्ययो भवति । र्षट् । ईर्ष्यालुः ।

'रष्' शब्द से ताच्छील्य अर्थ में 'अट्' प्रत्यय होता है । र्षट्-ईर्ष्यालुः-हसद करने वाला ।

अच्छिशब्दाद्दुर्दृष्टाविट् ॥ ३६ ॥

दुर्दृष्टौ पुरुषेऽभिधेये सति अच्छिशब्दात् इट् भवति । अछीट् । दुर्दृष्टिः ।

दुर्दृष्टि में पुरुष अभिधेय होने पर 'अच्छि' शब्द से 'इट्' होता है । अछीट्-दुर्दृष्टिः-बुरी नज़र ।

रूप्लूबाभ्यामतिशये ॥ ३७ ॥

रूप्लूब्शब्दयोर्भूरिवत्त्वेऽभिधेये सति इट् प्रत्ययो भवति । रूपिट् । अतिसुन्दरः । लूबिट् । लोलुभः ।

'रूप्-लूब्' शब्दों के भूरिवत्त्व अभिधेय होने पर 'इट्' प्रत्यय होता है । रूपिट्-अतिसुन्दरः-अतिसुन्दर । लूबिट्-लोलुभः-लालची ।

ज्यवश्च ॥ ३८ ॥

ज्यविट् । सूचकः । सूचित करने वाला ।

ल्यकल्शब्दादूठ् ॥ ३९ ॥

स्पष्टम् । ल्यकलूठ् । अश्लीलदः । अश्लील कहने वाला ।

भावे ॥ ४० ॥

इत उत्तरं ये प्रत्ययास्ते भावे विज्ञेयाः । भावस्तु संज्ञाभावधातुभावभेदाद्द्विविधः । संज्ञाभावे अधिकारोऽयम् । धातुभावस्तु कृत्प्रक्रियायां निरूपयिष्यते ।

इस के बाद जो प्रत्यय हैं, वे भाव में जानने चाहिए । भाव तो संज्ञाभाव और धातुभाव भेद से दो प्रकार का होता है । संज्ञाभाव में यह अधिकार है । धातुभाव तो कृत् प्रक्रिया में निरूपित करेंगे ।

विशेष्यायत्तानामर् ॥ ४१ ॥

विशेष्यस्य भेद्यस्य अधीना ये विशेषणशब्दास्तेषां भावे अर् प्रत्ययो भवति । उदाहरणान्यग्रे सर्वत्र । र्‌तु शब्दस्य तु देहशुभतायामेव भावप्रत्ययः स्यादिति वेद्यम् ।

विशेष्य भेद्य के अधीन जो विशेषण शब्द हैं, उनके भाव में 'अर्' प्रत्यय होता है । उदाहरण आगे सब जगह । 'र्‌तु' शब्द के तो देहशुभता में ही भावप्रत्यय होता है । यह जानना ।

त्र्यक्षराधिकानामार् ॥ ४२ ॥

ते नित्यविशेष्यनिघ्नाः शब्दाश्चेत् त्र्यक्षरास्तदधिका वा स्युस्तदा आर् प्रत्ययो भवति । ब्वजज्यार् । रक्तता । म्वक्ज्यार् । मुक्तता ।

वे नित्यविशेष्यनिघ्न शब्द यदि तीन अक्षर वाले वा उस से अधिक हों, तब 'आर्' प्रत्यय होता है । ब्वजज्यार्-रक्तता-लालिमा । म्वकज्यार्-मुक्तता-स्वतन्त्रता ।

टोठोर्वाऽनागमोऽन्त्यस्वरलोपश्च ॥ ४३ ॥

टोठुशब्दाद्विकल्पेन आर् प्रत्ययः अन् आगमश्च भवति अन्त्यस्योकारस्य च लोपः स्यात् । टाठञार् । प्रियता । अत्र लिङ्गस्य अनागमव्यवहितत्वात् टवर्गान्तानां च (सू. ४९) इत्यनेन ठकारस्य छकारो न भवति, किन्तु तवर्गान्तानामप्रसिद्धः (सू. ५०) इत्यनेन नकारस्य ञकारः । पक्षे । टाछ्यर् । प्रियता ।

'टोठु' शब्द से विकल्प के साथ 'आर्' प्रत्यय और 'अन्' का

आगम होता है तथा अन्त के 'उकार' का लोप होता है। टाठञार्-प्रियता-लोकप्रिय होना। यहां लिङ्ग का अनागमव्यवहित होने से 'टवर्गान्तानां च' (सू. ४६) इससे 'ठकार' को 'छकार' नहीं होता है, किन्तु 'तवर्गान्तानामप्रसिद्धः (सू. ५०) इससे 'नकार' को 'ञकार' होता है। पक्ष में-टाछ्यर्-प्रियता।

क्वचित्पूर्वं एव ॥ ४४ ॥

त्र्यक्षराधिकानां क्वचित्स्थाने पूर्वः अर् प्रत्यय एव भवति। अपज़र्। असत्यता। कृहञर्। कार्पण्यम्। काचर्यर्। कपिलता। कावर्यर्। नीलता। कृपञर्। कार्पण्यम्। कायर्यर्। असारता। खोवर्यर्। वामता। ग्यश्याम्यर्। श्यामता। चतर्यर्। चतुरता। विसम्यर्। विषमता। इत्यादि।

तीन अक्षरों से अधिक शब्दों को कहीं स्थान में पूर्व 'अर्' प्रत्यय ही होता है। अपज़र्-असत्यता-झूठ। कृहञर्-कार्पण्यम्-कृपणता। काचर्यर्-कपिलता-भूरा। कावर्यर्-नीलता-नीला। कृपञर्-कार्पण्यम्-कंजूसी। कायर्यर्-असारता-सारहीन। खोवर्यर्-वामता-उल्टा। ग्यश्यामर्-श्यामता-सांवला। चतर्यर्-चतुरता-चतुराई। विसम्यर्-विषमता-भेदभाव। इत्यादि।

हशोऽश्लीले ॥ ४५ ॥

हश् शब्दादश्लीलेऽर्थे अर् भवति। हशर्। गालीदानेन श्वश्रूत्वम्। अश्लीले किम्। हशतोनु। श्वश्रूत्वम्। (सू० ६३) तोनु प्रत्ययः।

'हश्' शब्द से अश्लील अर्थ में 'अर्' होता है। हशर्-गालिदानेन श्वश्रूत्वम्-गाली के रूप में सास। अश्लील में क्या? हशतोनु-श्वश्रत्वम्-सास। (सू० ६३) से 'तोनु' प्रत्यय।

क्वबुगशुभ्यां वा लोपः ॥ ४६ ॥

आभ्यां शब्दाभ्यां विकल्पेन भावप्रत्ययलोपः स्यात्। क्वब्यर्। कुब्जता। गश्यर्। जाल्मता। पक्षे। क्वबु। कुब्जता। गशु। जाल्मता।

'क्वबु और गशु' शब्दों से विकल्प के साथ भावप्रत्यय का लोप होता है। क्वब्यर्-कुब्ज़ता-कुबड़ापन। गश्यर्-ज़ाल्मता-ज़ाल्मपन।

पक्ष में-क्वबु-कुब्जता-कुबड़ापन। गशु-ज़ालमता-ज़ालमपन।

कवर्गान्तानां चवर्गादेशः क्रमात् ॥ ४७ ॥

तेषां विशेष्यनिघ्नानां द्व्यक्षराणां त्र्यक्षराणां च अन्त्यस्य उकार-विशिष्टस्य कवर्गीयाक्षरस्य क्रमेण चवर्गीयाक्षरादेशो भवति। निकु। निच्यर्। क्षुद्रत्वम्। टकु। टच्यर्। तैक्ष्ण्यम्। ह्खु। ह्छ्यर्। शुष्कता। त्र्युखु। त्रिछ्यर्। दक्षता। द्रगु। द्रज्यर्। दुर्लभता। स्रवगु। स्रवज्यर्। सुलभता। निकुशब्दाद्विशेष्यायत्तानामर् (सू० ४१) अनेन ककारस्य चकारः। उवर्णान्तानामिकारः (सू० २।१।३०) यत्वम्। त्र्युखुशब्दोपधायुकारस्य इकारः (सू० २।१।७६)। सर्वत्र-यत्वम्।

उन विशेष्यनिघ्न दो अक्षरों वाले और तीन अक्षरों वाले शब्दों के अन्त में उकारविशिष्ट कवर्गीय-अक्षरों को क्रम से चवर्गीय-अक्षरों का आदेश होता है। निकु-निच्यर्-क्षुद्रत्वम्-क्षुद्रता। टकु-टच्यर्-तैक्ष्ण्यम्-तीक्ष्णता। ह्खु-ह्छ्यर्-शुष्कता-सूखापन। त्र्युकु-त्रिछ्यर्-दक्षता-चतुराई। द्रगु-द्रज्यर्-दुर्लभता-बड़ी कठिनाई से प्राप्त होने वाली। स्रवगु-स्रवज्यर-सुलभता-आसानी। निकुशब्दाद्विशेष्यायत्ता-नामर् (सू० १४) इस से 'ककार' को चकार। उवर्णान्तानाममिकारः (सू०२।१।३०) से 'य'। त्र्युखुशब्दोपधायुकारस्य इकारः (सू० २।१।७६) सब जगह 'य'।

न च्वकुखूँखुशब्दयोः ॥ ४८ ॥

च्वकुशब्दखूँखुशब्दसंबन्धिनोः ककारखकारयोश्चवर्गादेशो न भवति। च्वकु। च्वक्यर्। अम्लत्वम्। खूँखु। खूँख्यर्। अवनाट्यव-द्वचनम्।

'च्वकु' शब्द और 'खूँखु' शब्द से सम्बद्ध 'ककार और खकार' में 'चवर्ग' का आदेश नहीं होता है। च्वकु-च्वक्यर्-अम्लत्वम्-खट्टा-पन। खूँखु-खूँख्यर्। अवनाट्य की तरह वचन।

टवर्गान्तानां च ॥ ४९ ॥

टवर्गान्तानां विशेष्यनिघ्नानां शब्दानां च क्रमेण चवर्गादेशो भवति। म्वटु। म्वच्यर्। स्थौल्यम्। गटु। गच्यर्। अल्पोज्ज्वलता। द्रोंठु। द्राँछ्यर्। कठोरता। मूँठु। मैँछ्यर्। मन्दता। म्वंडु।

म्वंज्यर्। कुण्ठता। बडु। पज्यर्। महत्ता। प्रोणु। प्राञर्। पुराणता।

टवर्गान्त विशेष्यनिघ्न-शब्दों को क्रम से 'चवर्ग' का आदेश होता है। म्वटु-म्वच्यर्-स्थौल्यम्-मोटापन। गटु-गच्यर्-अल्पोज्ज्वलता-थोड़ा उजला। द्रोंठु-द्राँछ्यर्-कठोरता-कठोरपन। मूँठु-मैँछ्यर्-मन्दता-मूर्खता। म्वंडु-म्वंज्यर्-कुण्ठता-खूँडापन। बडु-पज्यर्-महत्ता-बडप्पन। प्रोणु-प्राञर्-पुराणता-पुरानापन।

तवर्गान्तानामप्रसिद्धः ॥ ५० ॥

तवर्गान्तानां विशेष्यनिघ्नानां शब्दानामन्त्याक्षरस्य क्रमेणा-प्रसिद्धश्चवर्गादेशो भवति अप्रसिद्धो दन्त्यः। ततु। तच्‌र्। तप्तता। मतु। मचर्। मत्तता। वथु। वछर्। विस्ततता। थदु। थजर्। औन्नत्यम्। मंदु। मन्ज़र्। मान्द्यम्। तनु। तञर्। तनुता। गुमनु। गुमञार्। ईषन्मालिन्यम्। तमनु। तमञार्। कार्ष्ण्यम्। तूरनु। तूरञार्। शीतता। कटमलिनु। कटमलिञार्। धूसरता। पनुनुशब्दस्या-दिस्वरस्य दीर्घ इष्यते। पानञार्। आत्मीयता।

तवर्गान्त विशेष्यनिघ्न शब्दों के अन्त के अक्षर के क्रम से अप्रसिद्ध 'चवर्ग' का आदेश होता है। अप्रसिद्ध दन्त्यवाचक है। ततु-तच्‌र्-तप्तता-ताप (गर्मी)। मतु-मच्‌र्-मत्तता-मस्ती। वथु-वछर्-विस्ततता-विस्तार। थदु-थजर्-औन्नत्यम्-उन्नति। मंदु-मन्ज़र्-मान्द्यम्-मूर्खता। तनु-तञर्-तनुता-पतलापन। गुमनु-गुमञार्-ईषन्मा-लिन्यम्-थोड़ी मलिनता। तमनु-तमञार्-कार्ष्ण्यम्-कालापन। तूरनु-तूरञार्-शीतता-सर्दी। कटमलिनु-कटमलिञार्-धूसरता-मटियाला। पनुन् शब्द के आदि स्वर को दीर्घ होता है। पानञार्-आत्मीयता-अपनापन।

अप्रसिद्धादिलोपः ॥ ५१ ॥

अप्रसिद्धाच्चवर्गात् इकारस्य लोपो भवति उदाहरणानि पूर्व-सूत्रोक्तानि अप्रसिद्धचवर्गात्परस्य इकारस्य लोपः स्वयं बुद्धिमता निर्णेयः। छ्‌वचु। छ्‌वचर्। रिक्तता। अछु। अछर्। नैर्बल्यम्। पजु। पजर्। सत्यता। अनु। अञर्। अन्धता।

अप्रसिद्ध चवर्ग से 'इकार' का लोप होता है, उदाहरण पूर्व-

सूत्र में कहे गए हैं। अप्रसिद्ध चवर्ग से परे 'इकार' के लोप का स्वयं बुद्धिमान् ने निर्णय कर लेना चाहिए।

छ्वचु-छ्वचर्-रिक्तता-खालीपन। अछु-अछर्-नैर्वल्यम्-निर्वलता। पजु-पजर्-सत्यता-सच्चाई। अनु-अन्नर्-अन्धता-अन्धापन।

लान्तानां जः ॥ ५२ ॥

लकारान्तानां विशेष्यनिघ्नानामन्त्यस्य जकारो भवति। खलु। खज्यर्। विस्तृतत्वम्। बूलु। वोज्यर्। चाञ्चल्यम्। कुमुलु। कुमज्यार्। कोमलता। एवं। ब्वजज्यार्। उज्ज्वलता। म्वकज्यार्। मुक्तता। जायज्यार्। सूक्ष्मता। पिशज्यार्। पेशलता। लान्तानां किम्। विय्यर्। पर्युषितत्वम्। चर्यर्। आधिक्यम्। फहर्यर्। पारुष्यम्। नव्यर्। नवीनता।

लकारान्त विशेषनिघ्न शब्दों के अन्त के अक्षर को 'जकार' होता है। खलु-खज्यर्-विस्तृतत्वम्-विस्तृत। बूलु-वोज्यर्-चाञ्चल्यम्-चञ्चलता। कुमुल-कुमज्यार-कोमलता। इसी तरह-ब्वजज्यार-उज्ज्वलता-उजलापन। म्वकज्यार्-मुक्तता-स्वतन्त्रता। जायज्यार्-सूक्ष्मता-बारीकी। पिशज्यार्-पेशलता-चतुरता। लकारान्तों का क्या? विय्यर्-पर्युषितत्वम्-बासापन। चर्यर्-आधिक्यम्-अधिकता। फहर्यर्-पारुष्यम्-कठोरता। नव्यर्-नवीनता-नयापन।

त्रकुरुशब्दस्य च ॥ ५३ ॥

अन्त्यव्यञ्जनस्य रकारस्य जकारो भवति। त्रकज्यार्। कठोरता। पक्षे। त्रकर्यर्।

अन्त के व्यञ्जन के 'रकार' को 'जकार' होता है। त्रकज्यार्-कठोरता। पक्ष में-त्रकर्यर्।

हान्तानां शः ॥ ५४ ॥

स्पष्टम्। हिहु। हिश्यर्। सादृश्यम्। चोहु। चाश्यर्। कटुता। हान्तानां किम्। गश्यर्। जाल्मता। चाष्यर्। कटुत्वम्। फरिग्यर्। पारुष्यम्।

स्पष्ट है। हिहु-हिश्यर्-सादृश्यम्-समानता। चोहु-चाश्यर-कटुता-कड़वा। हकारान्तों का क्या? गश्यर्-जाल्मता-जाल्मपन।

चाष्यर्-कटुत्वम्-कड़वा। फरिश्यर्-पारुष्यम्-कठोर।

साग्तानां वा छः ॥ ५५ ॥

स्पष्टम्। कूँसु। कैँछर्। कनिष्ठता। पक्षे-कैँसर्। कनिष्ठता। पवर्गान्तान्युदाहरणानि यथा। पपु। पप्यर्। पक्वता। फफु। फफ्यर्। लोहलत्वम्। ग्वबु। ग्वब्यर्। गुरुत्वम्। श्रोमु। श्राम्यर्। श्रामता। इति।

स्पष्ट है। कूँसु-कैँछर्-कनिष्ठता-छोटापन। पक्ष में-कैँसर-कनिष्ठता। पवर्गान्तों के उदाहरण जैसे—पपु-पप्यर्-पक्वता-पकापन। फफु-फफ्यर्-लोहलत्वम्-लालिमा। ग्वबु-ग्वब्यर्-गुरुत्वम्-भारापन। श्रोमु-श्राम्यर्-श्रामता-श्रम्लापन। इति।

बडुशब्दादीमी वा ॥ ५६ ॥

बडुशब्दात्परो विकल्पेन ईमी प्रत्ययो भवति। आदेशाभावश्च। बडु। बडीमी। महता। पक्षे। वज्यर्। इति।

'बडु' शब्द से परे विकल्प से 'ईमी' प्रत्यय होता है और आदेश का अभाव। बडु-बडीमी-महत्ता-बड़प्पन। पक्ष में-वज्यर्-इति।

श्रूचुछ्यदुशब्दाभ्यां यारू च ॥ ५७ ॥

आभ्यां शब्दाभ्यां पक्षे भावे यारू च भवति। श्रूचु। श्रूचियारू। शुद्धता। छ्यटु। छ्यटियारू। उच्छिष्टता। पक्षे। श्रोचर्। छ्यचर्। इति भवतः।

श्रूचु और छ्यटु शब्दों से पक्ष में और भाव में 'यारू' प्रत्यय होता है। श्रूचु-श्रूचियारू-शुद्धता-सफाई। छ्यटु-छ्यटियारू-उच्छिष्टता-झूठापन। पक्ष में-श्रोचर्-छ्यच्र्-ये होते हैं।

योरुशब्दान्ताज्ज ॥ ५८ ॥

योरुशब्दाद्भावविषये ज् प्रत्ययो भवति। मंज़िमूयार्ज्। दूतता। पज़ियार्ज्। सत्यता। अपज़ियारज्। असत्यता। यार्ज्। मित्रता। श्रूचियार्ज्। शुद्धता। छ्यटियार्ज्। अशुद्धता।

'योरु' शब्द से भावविषय में 'ज्' प्रत्यय होता है। मंजिमूयार्ज्-दूतता-दूतपन। पजियार्ज्-सत्यता-सच्चाई। अपजियार्ज्-असत्यता-झूठापन। यारज्-मित्रता-दोस्ती। श्रूचियारज-शुद्धता-सफाई। छय्-

टियार्ज्-अशुद्धता-ग़न्दगी ।

विशेष्यानाथत्तानामिल् आज् प्रत्ययौ ॥ ५९ ॥

भावे इत्यनुवर्तते स्वयं विशेष्यपदानां भावे अभिधेयें इल् प्रत्ययः आज् प्रत्ययश्च भवति । पण्डिताज् । पण्डितता । पक्षे । पण्डितिल् । छानिल् । वा । छानाज् । तक्षकता । गूरिल्-वा-गोराज्-पुरोहितता । इत्यादि ।

'भावे' इस की अनुवृत्ति की जाती है, स्वयं विशेष्य पदों के भावअभिधेय में 'इल्' और 'आज्' प्रत्यय होता । पण्डिताज्-पण्डितता-पण्डिताई । पक्ष में-पाण्डितिल्-छानिल्-अथवा-छानाज् । तक्षकता-बढईयन । गूरिल्-अथवा-गोराज्-पुरोहितता-पुरोहिताई, इत्यादि ।

क्वचिदेकतरः ॥ ६० ॥

क्वचिच्छब्दे एकतर एव प्रयुज्यते । द्रसिलाज् । लेपकता । द्रसिलिल् । इति न साधुशब्दः ।

किसी शब्द में एकतर ही प्रयुक्त होता है । द्रसिलाज्-लेपकता-लेपपन । द्रसिलिल्-यह साधु शब्द नहीं है ।

क्वचिद्युगपच्च ॥ ६१ ॥

क्वचित्स्थाने प्रोक्तौ प्रत्ययौ युगपत्प्रयुज्येते । मतिल् । वा । मतिलाज् । उन्मत्तता । अत्र मतुशब्दस्य विशेष्यनिघ्नत्वात्पूर्वं मचर्-स्वरूपे सिद्धेऽपि प्रोक्तकर्मार्थमेव पुनरुदाहृतम् । गूरिलाज् । छानिलाज् । व्रीठिलाज् । इत्यादि ।

किसी स्थान में कहे गए प्रत्यय युगपत् प्रयुक्त होते हैं । मतिल्-वा-मतिलाज्-उन्मत्तता-पागलपन । यहां 'मतु' शब्द का विशेष्य-निघ्नत्व होने से पूर्व 'मचर्' स्वरूप के सिद्ध होने पर भी कहे गए कर्म के लिए ही फिर कहा गया है । गूरिलाज्, छानिलाज्, व्रीठिलाज्, इत्यादि ।

लाँछशब्दस्योपधाया ऊत्वं वा ॥ ६२ ॥

लूँछिल् । पक्षे । लाँछिल् । नपुंसकता ।

लूँछिल्-पक्ष में-लाँछिल्-नपुंसकता-नपुंसकपन ।

संबन्धिनां तोनु ॥ ६३ ॥

नाडीसंबन्धिनां भावे अभिधेयें सति तोनु प्रत्ययो भवति । मालितोनु । पितृत्वम् । माजितोनु । मातृत्वम् । वायि तोनु । भ्रातृत्वम् । पुतरतोनु । पुत्रत्वम् । हशतोनु । श्वश्रूत्वम् । इत्यादि । कृत्रिम-

संबन्धिनां भावे तु तकारस्य चकार इष्यते। व्यसपोनु। वयस्यात्वम्। दायपोनु। धात्रीत्वम्। पाजिपोनु। नीचत्वम्। इत्यादि।

नाडीसंबन्धियों के भाव-अभिधेय होने पर 'तोनु' प्रत्यय होता है। मालितोनु-पितृत्वम्-पितापन। माजितोनु-मातृत्वम्-मातापन। वायि तोनु-भ्रातृत्वम्-भाईपन। पुत्रतोनु-पुत्रत्वम्-पुत्रपन। हशतोनु-श्वश्रूत्वम्-सासपन। इत्यादि। कृत्रिम संबन्धियों के भाव में तो 'तकार' को 'पकार' होता है। व्यसपोनु-वयस्वात्वम्-मित्रपन। दायपोनु-धात्रीत्वम्-धायापन। पाजिपोनु-नीचत्वम्-नीचपन इत्यादि।

शत्रुमित्रपितुर्ऋ बिबन्धुभ्य उत् ॥ ६४ ॥

एषां शब्दानां भावे गम्यमाने सति उत् प्रत्ययो भवति। शत्रुत्। शत्रुत्वम्। म्यत्रुत्। मित्रत्वम्। पितुरुत्। सजातीयत्वम्। ऋष्युत्। ऋषित्बम्। बन्दुत्। बन्धुत्वम्।

इन शब्दों के भाव-गम्यमान होने पर 'उत्' प्रत्यय होता है। शत्रुत्-शत्रुत्वम्-शत्रुता। म्यत्रुत्-मित्रत्वम्-मित्रता। पितुरुत्-सजातीयत्वम्-सजातीयता। ऋष्युत्-ऋषित्वम्-ऋषिपन। बन्दुत्-बन्धुत्वम्-बन्धुता।

मैत उन् ॥ ६५ ॥

शवबाचकात् मैतशब्दाद्भावे उन् प्रत्ययो भवति। मैत्। मैतुन्। शवता।

शव वाचक 'मैत्' शब्द से भाव में 'उन्' प्रत्यय होता है। मैत्-मैतुन्-शवता-मुर्दापन।

म्वंडशब्दादुस् ॥ ६६ ॥

विधवाबाचकात् म्वंड्शब्दाद्भावे उस् प्रत्ययो भवति। म्बंडुस्। वैधव्यम्।

विधवा बाचक 'म्वंड्' शब्द से भाव में 'उस्' प्रत्यय होता है। म्वंडुस्-वैधव्यम्-विधवापन।

द्रबुशब्दात्सृगार्थे ॥ ६७ ॥

स्पष्टम्। द्रबुस्। सृगः। अन्यत्र। द्रविल्। रजकता।

स्पष्ट है। द्रबुस्-सृगः। दूसरी जगह-द्रविल-रजकता-धोबीपन।

स्वन्शब्दाद्बद्‌ ॥ ६८ ॥

स्पष्टम् । स्वनबद्‌ । सापत्न्यम् ।

साफ है । स्वनबद्‌-सापत्न्यम्-सौकनपन ।

बोजुशब्दाद्बठ् च ॥ ६९ ॥

अस्माच्छब्दात् बठ् प्रत्ययो भवति पक्षे बठु प्रत्ययश्च स्यात् । बाजि बठु । साधारणता । पक्षे । बाजिबठ् । साधारणता ।

'बोजु' शब्द से 'बठ्' प्रत्यय होता है, पक्ष में 'बठु' प्रत्यय होता है । बाजिबठु-साधारणता-साधारणपन । पक्ष में—बाजिबठ्-साधारणता-साधारणपन ।

हतादिभ्यः संख्यायाम् ॥ ७० ॥

हत् आदीनां संख्यावाचकानां बटु प्रत्ययो भवति । हतबटु । शतशः । सासबटु । सहस्रशः । लछ्यबटु । लक्षशः । इत्यादि ।

'हत्' आदि संख्यावाचक शब्दों को 'बटु' प्रत्यय होता है । हतबटु-शतशः-सौ बार । सासबटु-सहस्रशः-हज़ार बार । लछ्यबटु-लक्षशः-लाख बार । इत्यादि ।

शाकादिभ्यो मुष्ट्यर्थे ॥ ७१ ॥

शाकानां मुष्टावभिधेयायां सत्यां बटु प्रत्ययो भवति । हाकबटु । शाकमुष्टिः । मुजिबटु । मूलिकामुष्टिः । ग्वगजिबटु । सर्षपशाकमुष्टिः ।

शाकों के मुष्टि अर्थ में अभिधेय होने पर 'बटु' प्रत्यय होता है । हाकबटु-शाकमुष्टिः-हाक शाक । मुजिबटु-मूलिकामुष्टिः-मूली । ग्वगजिबटु-सर्षपशाकमुष्टिः-सरसों का शाक ।

उलु ॥ ७२ ॥

अधिकारोऽयम् । इत उत्तरं वक्ष्यमाणार्थेषु उलु प्रत्ययो भवति ।

यह अधिकार है । इसके बाद वक्ष्यमाण अर्थों में 'उलु' प्रत्यय होता है ।

गाटशब्दान्निपुणे ॥ ७३ ॥

स्पष्टम् । गाटुलु-निपुणः-निपुण ।

क्वंडोऽल्पार्थे ॥ ७४ ॥

क्वंड् इति । बृहत्कुण्डं । तस्याल्पार्थे उलु प्रत्ययो भवति । क्वंडुलु । कुंडलाकृतिः ।

'क्वंड्' यह बड़े कुण्ड के अर्थ में प्रयुक्त होता है, उसके छोटे अर्थ में 'उलु' प्रत्यय होता है। क्वंडुलु-कुंडलाकृतिःकुंडल की आकृति ।

गंडो वस्तुसाकल्ये ॥ ७५ ॥

वस्तुनः साकल्ये अभिधेये ग्रन्थिवाचकाद्गंड्शब्दात् उलु प्रत्ययो भवति । गंडुलु । वस्तुसामस्त्यम् ।

वस्तु के साकल्य अर्थ में ग्रन्थिवाचक 'गंड्' शब्द से 'उलु' प्रत्यय होता है । गंडुलु-वस्तुसामस्त्यम्-वस्तुओं का समूह ।

गत्शब्दादतिशये ॥ ७६ ॥

नदीप्रवाहवाचकात् गत् शब्दादतिशयेऽर्थे उलु भवति । गतुल । बहुलम् ।

नदी के प्रवाह के वाचक 'गत्' शब्द से अतिशय अर्थ में 'उलु' होता है । गतुलु-बहुलम्-अधिक (बहुत) ।

गदश्च ॥ ७७ ॥

स्पष्टम् । गदुलु । बहुलम् ।

स्पष्ट है । गदुलु-बहुलम्-बहुत ।

टठुशब्दान्मानावपने ॥ ७८ ॥

द्रोणद्वयवाचकात् टठु शब्दात्परिमाणभाण्डार्थ उलु प्रत्ययो भवति । टठुलु । काष्ठावपनम् ।

द्रोणद्वय-वाचक 'टठु' शब्द से परिमाणभाण्ड-अर्थ में 'उलु' प्रत्यय होता है । टठुलु-काष्ठावपनम्-काठ का बना हुआ मापने बाला बर्तन ।

द्रगुप्वतुशब्दाभ्यां सादृश्ये ॥ ७९ ॥

द्रगु । मुष्टिः । प्वतु । अर्भकः । आभ्यां सादृश्यार्थे उलु प्रत्ययो भवति । द्रगुलु । पिण्डम् । प्वतुलु । शिलामयी मूर्तिः ।

द्रगु-मुष्टि-मूठमात्र । प्वतु-अर्भकः-बच्चा । इन दोनों शब्दों से समान अर्थ में 'उलु' प्रत्यय होता है । द्रगुलु-पिण्डम्-पिण्ड । प्वतुलु-

शिलामयो मूर्तिः—पत्थर को बनी मूर्ति ।

म्वल्सादोस्तद्वति ॥ ८० ॥

स्पष्टम् । म्वलुलु । बहुमूल्यम् । सादुलु । स्वादवान् ।

स्पष्ट है । म्वलुलु-बहुमूल्यम्-बहुत कीमती । सादुलु-स्वादवान्-स्वादिष्ठ ।

क्वछ् शब्दाद्भारिके ॥ ८१ ॥

स्पष्टम् । क्वछुलु । भारवाहः ।

स्पष्ट है । क्वछुलु । भारवाहः-भार ढोने बाला ।

छ्वक्शब्दात्स्पष्टतायाम् ॥ ८२ ॥

छ्वक् । शोधना । तस्मात्स्पष्टार्थे उलु प्रत्ययो भवति । छ्वकुलु । गद्गदम् ।

छ्वक्-शोधना-स्पष्टता । उससे स्पष्ट अर्थ में 'उलु' प्रत्यय होता है । छ्वकुलु-गद्गदम्-गद्गद ।

चट्शब्दाच्चौरे ॥ ८३ ॥

चट् । छदनम् । तस्माच्चौरार्थे उलु भवति । चटुलु । चौरः ।

चट्-छदनम् । उससे 'चौर' अर्थ में 'उलु' प्रत्यय हौता है । चटुलु-चौरः-चौर ।

पत्शब्दादुडुपे ॥ ८४ ॥

स्पष्टम् । पतुलु । उडुपः ।

स्पष्ट है । पतुलु-उडुपः-नक्षत्र ।

च्वत्शब्दात्स्वव्यभिचारे ॥ ८५ ॥

गुदवाचिनः च्वत्शब्दात्स्वव्यभिचारकारयितरि उलु स्यात् । च्वतुलु । स्वव्यभिचारकारयिता । गांडू ।

'गुदा' 'वाचक' 'च्वत्' शब्द से स्वयं व्यभिचार कराने वाले अर्थं में 'उलु' प्रत्यय होता है । च्वतुलु-स्वव्यभिचारकारयिता-स्वयं व्यभिचार कराने बाला (गांडू) ।

रात् दुहोस्तत्काले ॥ ८६ ॥

रात् दुहशब्दाभ्यां तत्तत्कालेऽभिधेये उलु प्रत्ययः स्यात् । रातुलु । निशाकालः । दुहुलु । दिनकालः ।

'रात् और दुह्' शब्दों से उस-उस काल के अभिधेय में 'उल्' प्रत्यय होता है। रातुल्-निशाकालः-रात का समय। दुहुल्-दिन-कालः-दिन का समय।

मूनृशब्दाद्वस्त्रे ॥ ८७ ॥

उपधाह्रस्वश्च निपात्यते। मुनुल्। औरणवासः।

उपधा-ह्रस्व का निपात किया जाता है। मुनुल्-और्णवासः-ऊन का कपड़ा।

युलु ॥ ८८ ॥

इत उत्तरं वक्ष्यमाणार्थेषु युल् भवति। अधिकारोऽयम्।

इस के अनन्तर वक्ष्यमाण अर्थों में 'युल्' प्रत्यय होता है। यह अधिकार है।

टपुजटोर्जटाधारिणि ॥ ८९ ॥

टपु शब्दात् जट्शब्दाच्च तद्धारिणोऽर्थे युल् स्यात्। टप्युल्। जटाधारी। जट्युल्। जटाधारी।

'टपु' शब्द से और 'जट्' शब्द से उनके धारण करने के अर्थ में 'युलु' प्रत्यय होता है। टप्युलु-जटाधारो-जटा धारण किए हुए। जट्युल-जटाधारी-जटाधारण किए हुए।

दाहः करुणायामुपधाह्रस्वश्च ॥ ९० ॥

स्पष्टम्। दह्युलु छुर् वदान्। सकरुणं रोदिति।

स्पष्ट है। दह्युलु छुर् वदान्-सकरुणं रोदिति-करुणा के साथ रो रहा है।

रसात्तद्वति ॥ ९१ ॥

स्पष्टम्। रस्युलु छुह् ग्यवान्। सरसं गायति।

स्पष्ट है। रस्युलु छुह् ग्यवान्-सरसं गायति-सरस गाता है।

मछ्स्निहोः स्नेहवति ॥ ९२ ॥

मछ् इति। सान्त्वनं। स्निह् इति स्नेहस्तयोः शब्दयोः युल् प्रत्ययो भवति। मछ्युल्। सस्नेहः। स्निह्युल्। सस्नेहः।

'मछ्' यह सान्त्वना अर्थ में और 'स्निह्' यह स्नेह अर्थ में 'युल्' प्रत्यय होता है। मछ्युल-सस्नेहः-स्नेहपूर्वक। स्निह्युल-सस्नेहः-

स्नेह के साथ।

मिषान्नखमांसलेशे ॥ ९३ ॥

स्पष्टम्। मिष्युलु। नखमांसलेशः।

स्पष्ट है। मिष्युलु-नखमांसलेशः-नाखूनों का लेशमात्र मांस।

स्यकः स्वादादिसादृश्ये ॥ ९४ ॥

स्यक्। सिकता। तत्सादृश्येन स्वादादावभिधेये युलु प्रत्ययः स्यात्। स्यक्युलु चूँठु। सिकतास्वादसदृशः पालोवतः। स्यकिजूबुतराथ्। सैकतिला भूमिः।

स्यक्-सिकता-रेत, उसके सादृश्य से स्वाद आदि अभिधेय में 'युलु' प्रत्यय होता है। स्यक्युलु चूँठु-सिकतास्वादसदृशः पालीवतः-सिकतास्वाद के समान…। स्यकिजू बुतराथ्-सैकतिला भूमिः-रेतीली ज़मीन।

माजूशब्दादपत्रपिष्णौ ॥९५॥

मातृवाचकात् माजूशब्दात् लज्जावदर्थे युलु प्रत्ययः स्यात्। माज्युलु। लज्जावान्।

मातृवाचक 'माजू' शब्द से लज्जा की तरह अर्थ में 'युलु' प्रत्यय होता है। माज्युलु-लज्जावान्-शर्मीला।

मलाद्यनु तद्वति ॥९६॥

मलशब्दात्तद्वदर्थे यनु प्रत्ययो भवति। मल्यनु। मलिनः।

'मल' शब्द से उस की तरह अर्थ में 'यनु' प्रत्यय होता है। मल्यनु-मलिनः-मलिन।

कूटुशब्दादल्पार्थे उनु ॥९७॥

कूटू। वृहत्काष्ठम्। तस्याल्पार्थे उनु प्रत्ययो भवति। कूटुनु। क्षुद्रकाष्ठम्।

कूटु वृहत्काष्ठम्-बड़ी लकड़ी। उसके छोटे अर्थ में 'उनु' प्रत्यय होता है। कूटुनु-क्षुद्रकाष्ठम्-छोटी लकड़ी।

दगादायुधे ॥९८॥

दग्। घातः। तस्मादायुधार्थे उनु प्रत्ययो भवति। दगनु। सृगः।
दग्-घातः-प्रहार, उस से 'आयुध' अर्थ में 'उनु' प्रत्यय होता है।

दगनु-सृगः-आयुधविशेष ।

रंग्स्वन्मन्चम् दाँद् काँदभ्यः शिल्पिनि र् ।।९९।।

एभ्यः शब्देभ्यः शिल्पिनि अर्थे र् प्रत्ययो भवति । रंग्र् । रजकः । स्वन्र्-स्वर्णकारः । मन्र् । शाङ्खिकः । चम्र् । चर्मकारः । दाँदर् । शाकविक्रयी । काँदर् । कान्दविकः ।

रंग्, स्वन्, मन्, चम्, दाँद्, काँद् इन शब्दों से शिल्पी अर्थ में 'र्' प्रत्यय होता है । रंग्र्-रजकः - धोबी । स्वन्र्-स्वर्णकारः-सुनार । मन्र्-शाङ्खिकः-शाङ्खिक । चम्र्-चर्मकारः-चमार । दाँदर्-शाकविक्रयी-शाक बेचने वाला । काँदर-कान्दविकः ।

डास्फासोर्विनाशकभेदकयोः ।।१००।।

स्पष्टम् । डास्र् । विनाशकः । नाश करने वाला । फास्र् । भेदकः । फोड़ने वाला ।

बंगात्तत्पायिनि ।।१०१।।

बंगशब्दात्तत्पायिनि अर्थे र् प्रत्ययो भवति । बंग्र् । भङ्गापः ।

'बंग' शब्द से उसके पीने के अर्थ में 'र्' प्रत्यय होता है । बंग्र्-भङ्गापः-भांग पीने वाला ।

बमोऽन्तरायिणि ।।१०२।।

बम् शब्दाद्विघ्नकारकेऽर्थे र् प्रत्ययः स्यात् । बम्र् । विघ्नकृत् ।

'बम्' शब्द से विघ्नकारक अर्थ में 'र्' प्रत्यय होता है । बम्र्-विघ्नकृत्-विघ्न डालने वाला ।

लमो विलम्बके ।।१०३।।

लमशब्दाद्विलम्बकर्त्रर्थे र् प्रत्ययो भवति । लम्र् । विलम्बकः ।

'लम' शब्द से विलम्ब करने अर्थ में 'र्' प्रत्यय होता है । लम्र्-विलम्बकः—देर करने वाला ।

लावो वार्धुषिके ।।१०४।।

लाव्शब्दात् उक्तार्थे र् प्रत्ययः स्यात् । लाव्र् । वृद्धाजीवः ।

'लाव्' शब्द से उक्त अर्थ में 'र्' प्रत्यय होता है । लाव्र्-वृद्धाजीवः-बूढ़ा आदमी ।

सालो जन्ये ।।१०५।।

साल्शब्दान्निमन्त्रितजन्यार्थे र् प्रत्ययो भवति । साल्र् । जन्याः ।

'साल्' शब्द से जन्य अर्थ में 'र्' प्रत्यय होता है। सालर्-जन्याः ।

लूटो लुण्ठके ॥१०६॥

लूट्शब्दात् लुण्ठकार्थे र् प्रत्ययः स्यात् । लूट्र् । लुण्ठकः ।

'लूट्' शब्द से लूटने के अर्थ में 'र्' प्रत्यय होता है। लूटर-लुण्ठकः-लूटने वाला ।

ब्रमो भ्रमपदे ॥१०७॥

स्पष्टम् । ब्रम्र् । भ्रमदः । बह्म देने वाला ।

लूबोऽत्यस्य दश्च ॥१०८॥

लूब्शब्दात्तद्वत्वार्थे र् प्रत्ययो भवति । अन्त्यस्य बकारस्य च दकारो भवति । लूद्र् । लोलुभः ।

'लूब्' शब्द से उसी के अर्थ में 'र्' प्रत्यय होता है और अन्त के 'बकार' को 'दकार' होता है। लूद्र्-लोलुभः- लालची ।

तौल्यपरिमिते युजु ॥१०९॥

तुलया परिमिते वस्तुनि युनु प्रत्ययो भवति । तच्च द्विधा। एकं स्वयं वस्तु कियदस्तीति द्वितीयं कियन्मितस्य वस्तुन आधारभूतमस्तीत्यनयोर्द्वयोरेव योगारम्भः। त्राक्चनु कठ्। द्रौणिको मेषः। सीर्यनु थाल्। प्रास्थिकः स्थालः। खार्यनु बोरु। खारिको भारः। त्रक्चनु नटु। द्रौणिकः कुम्भः। सीर्यनुत्रान। प्रास्थिकं भाण्डम्। अत्र त्रख् शब्दस्योपधाया दीर्घः सेरशब्दस्य एकारस्य ईकारो दृश्यते। प्रस्थवाची सीर्यनु शब्दः। पलवाची पल्शब्दापरपर्यायः पल्यनु-शब्दश्चेतरावबधार्यौ। अन्यत्र। च्वत्रोकु। चतुर्द्रौणिकः। च्वत्रा-क्यनु। चतुर्द्रौणिकः।

तराजू से तोले जाने पर वस्तु में 'युनु' प्रत्यय होता है और वह दो प्रकार का है। एक स्वयं वस्तु कितनी है और दूसरा कितना तुली हुई वस्तु का आधारभूत है। इन दोनों में ही योगारम्भ है।

त्राक्यनु कठ्-द्रौणिको मेषः-द्रोण मात्र भेड़। सोर्यनु थाल्-प्रास्थिकः-स्थालः-प्रस्थमात्र थाल। खार्यनु बोरु्-खारिको भारः-खारमात्र भार। त्राक्यनु् नटु-द्रौणिकः कुम्भः-द्रोणमात्र कुम्भ। सीर्यनु वान-प्रास्थिकं भाण्डम्-प्रस्थ मात्र बर्तन। यहां 'त्रख्' शब्द की उपधा को दीर्घ 'सेर्' शब्द के 'एकार' को 'ईकार' दिखाई देता है। प्रस्थवाचक 'सीर्यनु' शब्द, पलवाचक पल् शब्द और दूसरा पर्याय 'पल्यनु्' शब्द जानने चाहिए। दूसरी ज़गह-च्वत्रोकु्-चतुर्द्रौणिकः-चार द्रोण मात्र। च्चत्राक्यनु-चतुर्द्रौणिकः-चार द्रोणमात्र।

पाँजुवुशब्दस्य वस्य शश्च ॥ ११० ॥

द्रोणार्धवाची पाँजुवु शब्दस्तत्तौल्येनाभिहिते वस्तुनि युनु प्रत्ययो भवति वकारस्य च शकारो भवति। पाँज़शनु। अर्धद्रौणिकः।

द्रोणार्ध का वाचक 'पाँजुवु' शब्द उसके बराबर तोल से कही जाने वाली वस्तु में 'युनु' प्रत्यय होता है और 'वकार' को शकार होता है। पाँज़शनु्। अर्धद्रौणिकः-अर्धद्रोणमात्र।

षष्टयादेर्मौल्यसंख्यायां च ॥ १११ ॥

मौल्यसंख्यया वस्तुनि अभिधेये सति पष्टेः परतः यनु प्रत्ययो भवति। शीठ्यनु्। षाष्टिकः। सतत्यनु। साप्ततिकः। षष्टयादेः किम्। दहन् हन्दु् दाँद्। दशानां वृषः।

मौल्य संख्या से वस्तु के कथन पर षष्टी से परे 'यन' प्रत्यय होता है। शीठ्यनु-षाष्टिकः-साठवां। सतत्यनु्-साप्ततिकः-सत्तरवां। षष्टयादि से क्या? दहन् हन्दु दाँद्-दशानां वृषः-दसों का बैल।

सर्वनामशब्देभ्यश्च ॥ ११२ ॥

तीत्यनु। तावतिकः। यीत्यनु। यावतिकः। कूत्यनु। कियतिकः-ईत्यनु। एतावतिकः।

सर्वनामशब्दों से भी 'यनु' प्रत्यय होता है। तीत्यनु-तावतिकः-उतना। यीत्यनु-यावतिकः-जितना। कूत्यनु-कियतिकः-कितना। ईत्यनु्-एतावतिकः-इतना।

वर्षार्थे च ॥ ११३ ॥

बार्ष्यनु । वार्षिकः ।

वर्ष के अर्थ में 'यनु' प्रत्यय होता है । बार्ष्यनु-वार्षिकः-सालाना ।

संख्यायाश्च पूरणे युमु ॥ ११४ ॥

संख्यायाः पूरणेऽर्थे युमु प्रत्ययो भवति च शब्दात्सर्वनामशब्देभ्यश्च । अक्यमु । प्रथमः । दह्यमु । दशमः । बुह्यमु । विंशः । हत्यमु । शततमः । सास्यमु । सहस्रतमः । पुंस्त्रियोः कतिशब्दवाचकाभ्यां कचू कच शब्दाभ्यामपि विज्ञेयः । कच्यमु । कतमः । यीत्यमु । यतमः । तीत्यमु । ततमः । ईत्यमु । इतमः । स्त्रलिङ्गे तु युकारस्य इकारो भवति । कचिमू । कतमा । यीतिमू । यतमा । इत्यादि ।

संख्या से पूरण-अर्थ में 'युमु' प्रत्यय होता है 'च' शब्द से और सर्वनामशब्दों से । अक्यमु-प्रथमः-पहला । दह्यमु-दशमः-दसवां बुह्यमु-विंशः-बीसवां । हत्यमु-शततमः-सौवां । सास्यमु-सहस्रतमः-हज़ारवां । पुंलिङ्ग और स्त्रीलिङ्ग में कति शब्द वाचक 'कचू और कच' शब्दों से भी जानना । कच्यमु-कतमः-कौन सा । यीत्यमु-यतमः-जौन सा । तीत्यमु-ततमः-तौन सा । ईत्यमु-इतमः-इतना सा । स्त्रीलिङ्ग में तो 'युकार' को 'इकार' होता है । कचिमू-कतमा-कौन सी । यीतिमू-यतमा-ज़ौन सी । इत्यादि ।

अष्टसंख्यावधि शतार्थे हत् ॥ ११५ ॥

स्पष्टम् । अख्हथ् । एकशतम् । ज़ह्ह्थ् । शतद्वयम् । त्रिहथ् । त्रिशती । इत्यादि ।

स्पष्ट है । अख्हथ्-एकशतम्-एक सौ । ज़ह्हथ्-शतद्वयम्-दो-सौ । त्रिहथ्-त्रिशती-तीन सौ, इत्यादि ।

तत्परतो ह्रस्य शः ॥ ११६ ॥

नवसंख्यामारभ्य शतार्थे हकारस्य शकारो भवति । नव्शथ् । नवशतानि । काह्-शथ् । एकादशशतानि । बाह्शथ् । द्वादशशतानि । इत्यादि ।

नौ संख्या से लेकर 'सौ' अर्थ में 'हकार' को 'शकार' होता है । नव्शथ्-नवशतानि-नौ सौ । काह्शथ्-एकादशशतानि । ग्यारह सौ । बाह्शथ्-द्वादशशतानि-बारह सौ । इत्यादि ।

देशभवे इ प्रत्ययश्च ॥ ११७ ॥

स्पष्टम् । सोव्पूरि् नाव् । सय्यपुरजा नौः । इरानि गुरु् । ईरानदेशजोऽश्वः । चीनि खोसु । चीनदेशभवः कंसः । हिन्दुस्तानि कपर् । इत्यादि ।

देश में पैदा होने पर 'इ' प्रत्यय होता है । सोव्पूरि नाव्-सय्य-पुरजा नौः-सय्यपुर से पैदा हुई नौका । ईरानि गुरु-ईरानदेशजोऽ-श्वः-ईरानदेश में पैदा हुआ घोड़ा । चीनि् खोसु्-चीनदेशभवः कंसः-चीन देश में पैदा हुआ कंस (कौल) । हिन्दुस्तानि् कपर्-हिन्दुस्तान में बना कपड़ा ।

कशीर्देशभवे उरु अन्त्यस्वरादिलोपोपधादीर्घौ च ॥ ११८ ॥

काश्मीरभाषायां कश्मीरः कशीर् इति स्त्रीलिङ्गवाची शब्दः कथ्यते । तस्या उद्भूते वस्तुनि अभिधेये सति उरु् प्रत्ययो भवति अन्त्य स्वराद्यवयवस्य लोप उपधायाश्च दीर्घो भवति । काशरु क्वंग् । काश्मीरं कुङ्कुमम् । काशरु् पश्मीन । काश्मीरं वहुमूल्यं (राङ्कवम्) । काशिरू् क्वठ् । काश्मीरं कुष्ठम् । इत्यादि ।

काश्मीरी भाषा में 'कश्मीर-कशीर्' यह स्त्रीलिङ्गवाचक शब्द कहा जाता है । वहां से पैदा हुई वस्तु के अभिधेय में होने पर 'उरु' प्रत्यय होता है । अन्त के स्वरादि अवयव का लोप और उपधा को दीर्घ होता है । काशरु् क्वंग्-काश्मीरं कुङ्कुमम्-काश्मीर का केसर । काशरु् पश्मीन-काश्मीरं वहुमूल्यं राङ्कवम्-काश्मीर का वहुमूल्य पशमीना । काशिरू् क्वठ्-काश्मीरं कुष्ठम्-काश्मीर की कुठ ।

देशकालभवे चोकु अस्त्रियाम् ॥ ११९ ॥

देशभवे कालभवे च वस्तुनि अभिधेये उकु प्रत्ययो भवति स्त्रीलिङ्गं वर्जयित्वा । कत्यकु । कुत्रत्यः । तत्यकु । तत्रत्यः । इत्यकु । इहत्यः । यत्यकु । यत्रत्यः । हुत्यकु । अत्रत्यः । गरुकु् । गृह्यः । करुकु् । किंकालिकः । रातकु् । ह्योभवः । परसुकु् परारिभवः । इत्यादि । अज़्शब्दादिकारागमश्चेष्यते । अज्युकु । अद्यतनः ।

देशज और कालज वस्तु अभिधेय में स्त्रीलिङ्ग को छोड़ कर

'उकु' प्रत्यय होता है। कत्यकु्-कुत्रत्यः-कहां का। तत्यकु्-तत्रत्यः-वहां का। इत्युकु्-इहत्यः-यहां का। यत्यकु्-यत्रत्यः-जहां का। हुत्यकु-अत्रत्यः-यहां का। गरुकु्-गृह्यः-ग्रहण करने योग्य। करुकु्-किंकालिकः-किस समय का। रातकु्-ह्यो भवः-वीते हुए कल का। परसुकु-आगे आने वाले परसों का-परारिभवः। इत्यादि। 'अज्' शब्द से 'इकार' का आगम होता है। अज्युकु-अद्यतनः-आज का।

मिलोपयुक्तात्पारिप्रत्ययान्तात्सर्वनाम्नो यमु ॥ १२० ॥

उक्तप्रत्ययो भवतीति स्पष्टम्। पार्यमु। पारदेशजः। कपार्यमु। किं पार्श्वः। तपार्यमु। तत्पार्श्वः। यपार्यमु। यत्पार्श्वः हुपार्यमु। अपारजः। इपार्यमु। एतत्पार्श्वः। अपार्यमु। पारजः। अस्त्रियां किम्। कतिचू। कुत्रत्या। एवं। पारिमू। पारजा। इत्यादि। दिग्भवे च दछिनु खोवरुशब्दौ वर्जयित्वा यमु भवति। ब्रूंठयमु। अग्रिमः। पत्यमु। पश्चिमः। होर्यमु। वा। प्यठ्यमु्। उर्ध्वः। तल्यमु। वा। ब्वन्युमु। अधरः। अन्दर्यमु्। आन्तरः। न्यबर्यमु। वाह्यः। अद्वौ प्रोक्तौ किम्। दछि्न्यकु्। दक्षिणः। खोवर्यंकु। वामः।

'यमु' प्रत्यय होता है, यह स्पष्ट है। पार्यमु-पारदेशजः-पार देश में पैदा हुआ। कपार्यमु-किं पार्श्वः-क्या पास। तपार्यमु-तत्पार्श्वः-उस के पास। यपार्यमु-यत्पार्श्वः-जिस के पास। हुपार्यमु्-अपारजः-पार में पैदा नहीं हुआ। इपार्यमु-एतत्पार्श्वः-इस के पास। अपार्यमु-पारजः-पार पैदा हुआ। पुंलिङ्ग में क्या? कतिचू-कुत्रत्या-कहां की। इसी तरह-पारिमू-पारजा-पार पैदा हुई। इत्यादि। दिग्भव में 'दछिनु खोवरु' शब्दों को छोड़ कर 'यमु' प्रत्यय होता है। ब्रूंठ्यमु-अग्रिमः-आगे का। पत्यमु-पश्चिमः-पश्चिम। होर्यमु, वा प्यठ्यमु-ऊर्ध्वः-ऊपर। तल्यमु-वा-ब्वन्युमु्-अधरः-नीचे। अन्दर्यमु-आन्तरः-भीतरी। न्यबर्यमु-वाह्यः-वाहिर का। दो को छोड़कर कहने से क्या? दछि्न्यकु्-दक्षिणः-दांया। खोवर्यंकु्-वामः-वांया।

समूहे ख्यलु ॥ १२१ ॥

स्पष्टम्। गोवूख्यलु। गोसमूहः। गुरि्ख्यलु्। अश्वसमूहः। गुपनु्ख्यलु्। गोपशुसमूहः। तीरिख्यलु। मेषादि समूहः। जनानख्यलु स्त्रैणम्। महनिविख्यलु। मानुष्यकम्। इत्यादि।

समूह में 'ख्यलु' प्रत्यय होता है। गोवूख्यलु-गोसमूहः। गायों का समूह। गुरि्ख्यलु-अश्वसमूहः-घोड़ों का समूह। गुपन्ख्यलु-गोपशुसमूहः-गाय-पशुओं का समूह। तीरिख्यलु-मेषादिसमूहः-भेड़ आदि का समूह। जनानख्यलु-स्त्रैणम्-स्त्रियों का समूह। महनिविख्यलु-मानुष्यकम्-मनुष्यों का समूह। इत्यादि।

लूक्शब्दादय् ॥ १२२ ॥

लूक्शब्दात्समूहे अय् भवति। लूकय्। जनता।

'लूक्' शब्द से समूह अर्थ में 'अय्' होता है। लूकय्-जनता-लोग।

पानशब्दादुनु उपधाह्रस्वश्च ॥ १२३ ॥

'पान' शब्द से 'उनु' प्रत्यय और उपधा को ह्रस्व होता है: पनुनु-आत्मीयः-अपना।

पर्शब्दादुदु ॥ २४ ॥

'पर्' शब्द से 'उदु' प्रत्यय होता है। परुदु-परकीयः-पराया।

तिहादिभ्यः प्रकारोक्तौ थः ॥ १२५ ॥

तिह् यिह् आदिभ्यः पञ्चभ्यः प्रकारवचने गम्यमाने थ प्रत्ययो भवति। तिथ। तथा। यिथ। यथा। क्यथ्। कथम्। इथ। इत्थम्। हुथ्।। इत्थम्,

तिह्-यिह् आदि पांचों से प्रकार वचन वा गम्यमान अर्थ में 'थ' प्रत्यय होता है। तिथ-तथा-वैसे। यिथ-यथा- जैसे। क्यथ्-कथम्-कैसे। इथ-इत्थम्-ऐसे। हुथ्-इत्थम्-ऐसे।

उपमाने थु ॥ १२६ ॥

तिह् आदिशब्दैरुपमाने वाच्ये सति थु प्रत्ययो भवति। तिथु्। तादृशः। यिथु्। यादृशः। किथु। कीदृशः। इथु। एतादृशः। हुथु्। ईदृशः। लिङ्गप्रकरणोक्तनिश्चयप्रत्ययान्ताश्च (सू. २।३।२१) यथा। तिथय्। तथैव। यिथय्। यथैव। क्यथय्। कथमेव। इथय्। इत्थमेव। हुयय्। इत्थमेव। एवं बुद्धिमता निश्चयार्थयप्रत्ययस्य सर्वत्र प्राप्तिरवधार्या।

तिह्-आदि शब्दों से उपमान वाच्य अर्थ में 'थु' प्रत्यय होता है। तिथु-तादृशः-वैसा। यिथु-यादृशः-जैसा। किथु-कीदृशः-कैसा। इथु-एतादृशः-ऐसा। हुथु-ईदृशः-ऐसा। लिङ्गप्रकरणोक्तनिश्चयप्रत्ययान्ताश्च (सू.२।३।२१) जैसे-तिथय्-तथैव-वैसे ही। यिथय्-यथैव-जैसे ही। क्यथय्-कथमेव-किसी तरह ही। इथय्-इत्थमेव-इस तरह ही। हुथय्-इत्थमेव-इस तरह ही। इस तरह बुद्धिमान् पुरुष को निश्चय अर्थ में 'य' प्रत्यय की सब जगह प्राप्ति का निश्चय कर लेना चाहिए।

तस्मात्परौ पाठ्ि पाठ्िन् वा ॥ १२७ ॥

तस्मात्प्रकारप्रत्ययान्तात् परः पाठ्ि प्रत्ययः पाटिन् प्रत्ययो वा प्रयोज्यः। तिथपाठ्। तथा। यिथपाठ्ि। यथा। क्यथ्पाठ्ि। कथम्। इथ पाठ्ि। इत्थम्। हुथपाठ्ि। इत्थम्। एवं तिथपाठिन्। यिथपाठ्िन्। इत्यादि।

उस प्रकार प्रत्ययान्त से परे 'पाठ्ि' प्रत्यय अथवा 'पाठिन्' प्रत्यय का प्रयोग करना चाहिए। तिथपाठ्ि-तथा-वैसा। यिथपाठ्ि-यथा-जैसा। क्यथ्पाठ्ि-कथम्-कैसे। इथपाठ्ि-इत्थम्-इस तरह। हुथपाठ्ि-इत्थम्-इस तरह। इसी तरह-तिथपाठ्िन्, यिथपाठ्िन्। इत्यादि।

अन्यतोऽपि च ॥ १२८ ॥

तौ पाठिपाठिन् प्रत्ययौ अन्येभ्योऽपि दृश्येते। वियपाठिन्। इतरथा। सारिय्पाठ्ि। सर्वथा। हलिपाठ्ि। वक्रप्रकारम्। इत्यादि ज्ञेयम्। एवं सम्बन्धषष्ठ्यन्तेभ्यः सर्वेभ्यः शब्देभ्यो बोध्यम्।

वे 'पाठ्ि-पाठिन्' प्रत्यय अन्यों से भी देखे जाते हैं। वियपाठिन्-इतरथा-और तरह से। सारिय्पाठि-सर्वथा-सब तरह से। हलिपाठि-वक्रप्रकारम्-टेढाप्रकार। इत्यादि।

क्याहो ह्रस्वः ॥ १२९ ॥

क्याह् शब्दस्य ह्रस्वो भवति। क्यह् पाठ्ि। कथम्। क्यथताञ्पाठ्ि। केनापि प्रकारेण।

'क्याह्' शब्द को ह्रस्व होता है। क्यह् पाठि-कथम्-किस तरह। क्यथताञ्पाठि-केनापि प्रकारेण-किसी भी प्रकार से।

प्राणिकृतादेशेभ्यो रंग च ।। १३० ।।

प्राणिनो द्वितीयादीनामेकवचनेषु (सू० २।३।५) ये तमादय आदेशाः कृतास्तेभ्यः प्रकारवचने गम्यमाने रंग प्रत्ययो भवति च शब्दादन्येभ्योऽपि । तमिरंग । तथा । यमिरंग । यथा । कमिरंग । कथम् । इमिरंग । इत्थम् । हुमिरंग । इत्थम् । अमिरंग । इत्थम् । अकिरंग । एकधा । द्वयिरंग । द्विधा । त्र्ययरंग । त्रिधा । सारिरंग । सर्वथा । यचिरंग । वा । सिठाहिरंग । वहुधा । इत्यादि ज्ञेयम् । साधनं पूर्ववत् ।

प्राणि के द्वितीयादि एकवचनों में (सू० २।३।५) से जो 'तम' आदि आदेश किए गए, उन से प्रकारवचनगम्यमान अर्थ में 'रंग' प्रत्यय होता है और अन्य शब्दों से भी यही प्रत्यय होता है। तमिरंग-तथा-वैसा। यमिरंग-यथा-जैसा। कमिरंग-कथम्-कैसा। इमिरंग-इत्थम्-इस तरह। हुमिरंग-इत्थम्-इस तरह। अमिरंग-इत्थम्-इस तरह। अकिरंग-एकधा-एक प्रकार। द्वयिरंग-द्विधा-दो प्रकार। त्र्ययरंग-त्रिधा-तीन प्रकार। सारिरंग-सर्वथा-सब तरह। यचिरंग-वा-सिठाहिरंग-वहुधा-वहुत बार। इत्यादि जानना। साधन पहिले की तरह।

प्रत्ययेषु हलोपः सर्वत्र ।। १३१ ।।

सर्वत्र लिङ्गप्रकरणे धातुप्रकरणे च प्रत्ययेषु परेषु हकारस्य लोपो भवति । क्यथ पाठिन् । कथम् । क्याह् शब्दात् थ प्रत्ययान्तात् पाठिन् प्रत्ययश्च अनेन हकारस्य लोपः । क्याहो ह्रस्वः (सू० १२९) इत्यनेनाकारस्याकारः ।

सब जगह लिङ्ग प्रकरण और धातु प्रकरण में परे के प्रत्ययों में 'हकार' का लोप होता है। क्यथ पाठिन्-कथम्-किस तरह। 'क्याह्' शब्द से 'थ' प्रत्ययान्त से 'पाठिन्' प्रत्यय और इस से 'हकार' का लोप। क्याहो ह्रस्वः (सू. १२९) इससे 'आकार' को 'अकार' हुआ।

अप्राणिभ्यः स्थाने इ प्रत्ययश्च ।। १३२।।

तेभ्यः अप्राणिकृतादेशेभ्यः सामान्यस्थाने गम्यमाने इ प्रत्ययो भवति । तत्र पञ्चम्यां प्रसिद्धता सप्तम्यां तु पूर्वस्वरस्याप्रसिद्धता ।

तति । तनि । ततः तत्र । यति । यति । यतः । यत्र । कती । कुतः । कुत्र । इति । इति । अतः । अत्र । हुति । हुति । अमुतः । अमुत्र । अत्ति । अति । अतः । अत्र ।

उन अप्राणिकृत आदेशों से सामान्यस्थान गम्यमान अर्थ में 'इ' प्रत्यय होता है । वहां पञ्चमी में प्रसिद्धता, सप्तमी में तो पूर्वस्वर की अप्रसिद्धता । तति-तनि-ततः-तत्र-वहाँ । यति-यति-यतः-यत्र-यहां । कति-कुतः-कुत्र-कहां । इति-इति-अत-अत्र-यहां । हुति-हुति-अमुतः-अमुत्र-वहां, अति-अति-अतः-अत्र-यहां ।

तस्मादनऽनसौ वा ॥ १३३ ॥

तस्मात् इ प्रत्ययान्ताच्छब्दात् अन् प्रत्ययः अनस् प्रत्ययो वा भवति । कत्यन् वा कत्यनस् । कुत्र । तत्यन् वा तत्यनस् । तत्र । यत्यन् वा यत्यनस् । यत्र । अत्यन् वा अत्यनस् । अत्र । एवमन्यत् । अनसः सकारस्य नकारोऽपि दृश्यते । यत्यनन् । यत्र । अत्यनन् । अत्र । एवमन्यत् ।

उस 'इ' प्रत्ययान्त शब्द से 'अन्' प्रत्यय वा 'अनस्' प्रत्यय होता है । कत्यन् वा कत्यनस्-कुत्र-कहां । तत्यन् वा तत्यनस्-तत्र-वहां । यत्यन् वा यत्यनस्-यत्र-यहाँ । अत्यन् वा अत्यनस्-अत्र-यहाँ । इसी तरह और । 'अनस्' के 'सकार को 'नकार' भी देखा जाता है । यत्यनन्-यत्र-यहां । अत्यनन्-अत्र-यहां । इसी तरह और ।

पञ्चम्यां प्यठान्तोऽपि ॥ १३४ ॥

स एव इ प्रत्ययान्तः शब्दः प्यठान्तो विशेषतः पञ्चमी-प्रयोगो भवति । ततिप्यठ । ततः । यतिप्यठ । यतः । कतिप्यठ । कुतः । इति-प्यठ । इतः । हुतिप्यठ । अमुतः । गरप्यठ । गृहतः । गामप्यठ । ग्रामतः । इत्यादि ।

वही 'इ' प्रत्ययान्त शब्द प्यठान्त विशेषकर पञ्चमी में प्रयुक्त होता है । ततिप्यठ-ततः-वहां से । यति प्यठ-यतः-यहां से । कति-प्यठ-कुतः-कहां से । इतिप्यठ-इतः-यहां से । हुतिप्यठ-अमुतः-वहां से । गरप्यठ-गृहतः-घर से । गामप्यठ-ग्रामतः-ग्राम से । इत्यादि ।

सप्तम्यामनन्तादी च ॥ १३५ ॥

अन् प्रत्ययान्ताच्छब्दात्सप्तम्यां विशेषत ई प्रत्ययोऽपि भवति । तत्यनी । तत्र । यत्यनी । यत्र । कत्यनी । कुत्र । इत्यनी । अत्र । हुत्यनी । अमुत्र ।

'अन्' प्रत्ययान्त, शब्द से सप्तमी में विशेषकर 'ई' प्रत्यय भी होता है । तत्यनी-तत्र-वहां । यत्यनी-यत्र-यहां । कत्यनी-कुत्र-कहां । इत्यनी-अत्र-यहां । हुत्यनी-अमुत्र-वहां ।

ओर्तुप्रत्ययौ वान्त्यलोपश्च ॥ १३६ ॥

तेभ्यः अप्राणिकृतादेशेभ्यः शब्देभ्यः सप्तम्यां ओर् प्रत्ययः तु प्रत्ययो वा भवति । अन्त्याक्षरस्य च लोपो भवति । तु प्रत्ययस्योकारान्तत्वात्पूर्वस्वरस्याप्रसिद्धता ज्ञेया । तोर् । तत्र । योर् । यत्र । कोर् । कुत्र । योर् । अत्र । होर वा ओर । अमुत्र । एवम् । ततु । यतु । कतु । इतु । हतु । अतु । विज्ञेयाः । तु प्रत्ययान्तात् त् प्रत्ययश्चेष्यते । ततुत् । यतुत् । कतुत् । इतुत् । हतुत् । अतुत् । इत्यादि । य प्रत्यये ओकारस्य ऊकार इष्यते । तूर्य । तत्रैव । यूर्य । यत्रैव । कूर्य । कुत्रैव । यूर्य । अत्रैव । ऊर्य । अमुत्रैव । एवं ततुय् । यतुय् । कतुय् । इतुय् । हतुय् । अतुय् । बोध्याः ।

उन अप्राणिकृत आदेश शब्दों से सप्तमी में 'ओर्' प्रत्यय वा 'तु' प्रत्यय होता है और अन्त के अक्षर का लोप होता है । 'तु' प्रत्यय के ऊकारान्त होने से पूर्वस्वर की अप्रसिद्धता जानना । तोर्-तत्र-वहां । योर्-यत्र-यहां । कोर्-कुत्र-कहां । योर्-अत्र-यहां । होर वा ओर-अमुत्र-वहां । इस तरह-ततु, यतु, कतु, इतु, हतु, अतु, जानना । 'तु' प्रत्ययान्त होने से 'त्' प्रत्यय होता है । ततुत्, यतुत्, कतुत्, इतुत्, हतुत्, अतुत्, इत्यादि । 'य' प्रत्यय में 'ओकार' को 'ऊकार' होता है । तूर्य-तत्रैव-वहीं । यूर्य-यत्रैव-यहीं । कूर्य-कुत्रैव-कहीं । यूर्य-अत्रैव-यहीं । ऊर्य-अमुत्रैव-वहीं । इसी तरह-ततुय्, यतुय्, कतुय्, इतुय्, हतुय्, अतुय्, जानना ।

पञ्चम्यामपर ओर् ॥ १३७ ॥

अकारः परो यस्मात्तथाविधः ओर प्रत्ययः पञ्चम्यां भवति । तोर । ततः । योर । यतः । कोर । कुतः । होर वा ओर । अमुतः । इति ।

'अकौर' परे है जिससे वैसा 'और' प्रत्यय पञ्चमी में होता है। तोर-ततः-उससे। यतः-योर-जिससे। कोर-कुतः-कहाँ से। होर वा ओर-अमुतः-वहाँ से। इति।

तिहादिभ्यः कालेऽलिः ॥ १३८ ॥

तिहादिभ्यः कालविषये अलि प्रत्ययो भवति। त्यलि। तदा। य्यलि। यदा। क्यलि। कदा। प्रत्ययस्य इदन्तत्वात्पक्षे पूर्वस्वरस्याप्रसिद्धता वोध्या। त्यलि। य्यलि। क्यलि। इति।

तिह्-आदि से कालविषय में 'अलि' प्रत्यय होता है। त्यलि-तदा-तब। य्यलि-यदा-जब। क्यलि-कदा-कब। प्रत्यय के इदन्त होने से पक्ष में पूर्वस्वर की अप्रसिद्धता जानना। त्यलि। य्यलि। क्यलि। इति।

इह्हुहोर्वुञ्व्वञादेशौ ॥ १३९ ॥

अनयोः शब्दयोः सविभक्तिकयोः वुञ् व्वञ् आदेशौ क्रमेण भवतः। वुञ्। एतर्हि। व्यञ्। अधुना।

सविभक्तिक इन शब्दों में 'वुञ् और व्वञ्' आदेश क्रम से होते हैं। वुञ्-एतर्हि-यह। व्वञ्-अधुना-अब।

क्याहः कर् ॥ १४० ॥

क्याह् शब्दस्य कालविषये कर् आदेशो भवति। कर्। कदा।

'क्याह्' शब्द को कालविषय में 'कर्' आदेश होता है। कर्-कदा-कब।

उत्वन्ताभ्यां रात्द्रह्भ्यामिः ॥ १४१ ॥

स्पष्टम्। रात्लि। नक्तम्। द्रह्लि। दिवा।

स्पष्ट है। रातलि। नक्तम्। रात्रि। द्रह्लि। दिवा। दिन।

रातः कितु च ॥ १४२ ॥

स्पष्टम्। रात्कितु। नक्तम्।

स्पष्ट है। रात्कितु-नक्तम्-रात्रि।

अन्यतोऽपि च ॥ १४३ ॥

न्यहफ्वलि। प्रभातम्। सुलि। अचिरेण। यचूकालि्। चिरेण। कालि्। कालेन। कालि्क्यथ्। परतरेद्युः। ततिकालि्क्यथ्। परतर-

तरेद्युः । कमिविज़ि । कदा । तमिविज़ि । तस्मिन्काले । यमिविज़ि । यस्मिन्काले । इत्यादयो विज्ञेयाः ।

न्यहृफ्वलि-प्रभातम्-सुवह् । सुलि-अचिरेण-जल्दी । यचूकालि्-चिरेण-देर से । कालि्-कालेन-समय से । कालिक्यथ्-परतरेद्युः-परसों । ततिकालि्क्यथ्-परत रतरेद्युः-परसों से भी परे का दिन । कमिविज़ि-कदा-कब । तमिविज़ि-तस्मिन्काले-उस समय । यमिविज़ि-यस्मिन्काले-जिस समय । इत्यादि जानना ।

कोज़ु मिम्युज़ुशब्दाभ्यां स् ।। १४४ ।।

आभ्यां शब्दाभ्यां काले गम्यमाने स् प्रत्ययो भवति । काजिस् । प्राह्णम् । मिमिज़िस्-अपराह्णम् ।

कोज़ु और मिम्युज़ु शब्दों से कालगम्यमान अर्थ में 'स्' प्रत्यय होता है । काजिस् प्राह्णम्-प्राह्ण । मिमिज़िस्-अपराह्णम्-अपराह्ण ।

शेषेभ्योऽप्यन् ।। १४५ ।।

शेषेभ्यो रात्रिदिनविभागेभ्यः अन्येभ्योऽपि अन् प्रत्ययो भवति । मन्दिञन् । मध्याह्णम् । दुपहरन् । मध्याह्णम् । कालचनन् । सायम् । बतन्यंगन् वा बतदवन् । नक्तम् । अड्रातन् । अर्धरात्रे । पतिम् पहरन् । रात्रिपश्चाद्यामे । एवमितरभाषाशब्देभ्योऽपि व्यवह्रियते : सुबहन् । प्रभातम् । शामन् । सायम् । इति ।

शेष रात-दिन के विभाग से और औरों से भी 'अन्' प्रत्यय होता है । मन्दिञन्-दुपहरन् । मध्याह्णम् । मध्याह्ण । कालचनन् । सायम् । शाम । बतन्यंगन् वा बतदवन्-नक्तम्-रात । अड्रातन्-अर्धरात्रे-आधी रात । पतिम्पहरन्-रात्रिपश्चाद्यामे-रात के पिछले पहर में । इस तरह दूसरे भाषा के शब्दों से भी व्यवहृत होता है । सुबहन्-प्रभातम्-प्रभात । शामन्-सायम्-शाम । इति ।

अः प्रत्यर्थे लिङ्गात्पूर्वः प्रथ् च ।। १४६ ।।

प्रतिशब्दस्यार्थे गम्यमाने अप्रत्ययो भवति लिङ्गात्पूर्वः प्रथशब्दश्च प्रयोज्यः । प्रथ्द्वह । प्रतिदिनम् । प्रथ्पहर । प्रतिप्रहरम् । प्रथ्वरिह्य । प्रतिवर्षम् । इत्यादि ।

द्वितीयान्तेभ्यः शब्देभ्योऽपि दृश्यते । प्रथ् अकिस् । प्रत्येकम् । प्रथ्विज़ि । प्रतिकालम् । प्रथ्महनिविस् । प्रतिपुरुषम् । प्रथ्ज़नानि । प्रतिस्त्रियम् । इत्यादि बोध्यम् ।

प्रतिशब्द के अर्थ में गम्यमान में 'अ' प्रत्यय होता है और 'प्रथ्' शब्द लिङ्ग से पूर्व प्रयुक्त करना चाहिए । प्रथ्द्वह-प्रतिदिनम्-प्रतिदिन । प्रथ्पहर-प्रतिप्रहरम्-प्रतिप्रहर । प्रथ्वरिह्य-प्रतिवर्षम् । प्रतिवर्ष । इत्यादि ।

द्वितीयान्त शब्दों से भी देखा जाता है । प्रथ् अकिस्-प्रत्येकम्-प्रत्येक । प्रथ्विज़ि-प्रतिकालम्-प्रतिकाल । प्रथ्महनिविस्-प्रतिपुरुषम्-प्रतिपुरुष । प्रथ्ज़नानि-प्रतिस्त्रियम्-प्रतिस्त्री । इत्यादि जानना चाहिए ।

द्वहः प्रथ्लोपो वा ॥ १४७ ॥

द्वहशब्दात्पूर्वस्य प्रथ्शब्दस्य लोपो भवति । द्वह । प्रतिदिनम् । 'द्वह' शब्द से पूर्व 'प्रथ्' शब्द का लोप होता है । द्वह-प्रतिदिनम्-हररोज़ ।

य प्रत्यये नित्यम् ॥ १४८ ॥

तस्मादेव द्वह् शब्दात् य प्रत्यये परे नित्यं प्रथ् शब्दस्य लोपो भवति । द्वहय् । प्रतिदिनमेव । प्रथ् द्वहय् । इति तु न भवति ।

उसी 'द्वह्' शब्द से 'य' प्रत्यय परे रहते नित्य 'प्रथ्' शब्द का लोप होता है । द्वहय्-प्रतिदिनमेव-प्रतिदिन ही । 'प्रथ्द्वहय्' यह तो नहीं होता ।

वीप्सायामाद्यात्पथन्वर्थे ॥ १४९ ॥

अनुशब्दस्यार्थे गम्यमाने वीप्सायां द्विरुक्तशब्दस्य आद्यात् पथ् प्रत्ययो भवति । द्वहपथ् द्वह । अनुदिनम् । वरिह्यपथ् वरिह्य । अनुवर्षम् । ज़निपथ् ज़नि । अनुजनम् । इत्यादि ।

'अनु' शब्द के अर्थ में गम्यमान-वीप्सा में द्विरुक्तशब्द के पूव 'पथ्' प्रत्यय होता है । द्वहपथ् द्वह-अनुदिनम्-दिन के बाद । वरिह्यपथ् वरिह्य-अनुवर्षम्-वर्ष के बाद । ज़निपथ् ज़नि-अनुजनम्-मनुष्य के बाद । इत्यादि ।

इह् ब्रोँठ्शब्दाभ्यां वर्षार्थे उस् ॥ १५० ॥

स्पष्टम् । इहस् । ऐषमः । ब्रोँठुस् । आगामिवर्षे ।

स्पष्ट है । इहस्-ऐषमः- इस । ब्रोँठुस्-आगामिवर्षे-आने वाले वर्ष में ।

पथो रकारश्च ।। १५१ ।।

पथ् शब्दात् वर्षार्थे उस् प्रत्ययो भवति अन्त्यस्य रकारादेशश्च। परुस् । परारि ।

'पथ्' शब्द से वर्ष के अर्थ में 'उस्' प्रत्यय होता है और अन्त को 'रकार' का आदेश । परुस्-परारि-आने वाला वर्ष ।

पूर्वतरार्थे प्रार्यादेशः ।। १५२ ।।

पथ्शब्दात् पूर्वतरवर्षार्थे उस् प्रत्ययो भवति । पथशब्दस्य प्रारि् आदेशश्च । प्रार्युस्, । पूर्वतरे वर्षे ।

'पथ्' शब्द से पूर्वतर 'वर्ष' के अर्थ में 'उस्' प्रत्यय होता है और 'पथ्' शब्द को 'प्रारि' आदेश । प्रार्युस्-पूर्वतरे वर्षे-पूर्वतर वर्ष में ।

पञ्चम्यन्ताद्दिगर्थे किनि ।। १५३ ।।

पञ्चमीप्रत्ययान्तेभ्यस्तदादिशब्देभ्यो दिगर्थे अभिधेये किनि प्रत्ययो भवति । (सू० १३२) । ततिकिनि । ततः । यतिकिनि । यतः । कतिकिनि । कुतः । इतिकिनि् । इतः । हुतिकिनि् । अमुतः । इत्यादि। ब्रूँठि्किनि् । अग्रतः । पति्किनि । पृष्ठतः । दछि्नि्किनि् । दक्षिणतः । खोव्रि्किनि् । वामतः । तलि्किनि् । अधरस्तात् । प्यठि्किनि् । ऊर्ध्वतः । इत्यादि ।

एवमितरपञ्चम्यन्तेभ्यो यथा (सू० १३७) । तत्र प्रत्ययाद्येकारस्याकारः अन्त्यस्य तु पूर्णता दृश्यते । तोरकनि । ततः । योरकनि । यतः । कोरकनि । कुतः । ओरकनि वा होरकनि । अमुतः । इतः ।

प्राणिकृतादेशेभ्यश्च यथा । तमिकनि । तवकनि । ततः । यमिकनि । यवकनि । यतः कमिकनि । कवकनि । कुतः । इमिकनि । इवकनि । इतः । हुमिकनि । अमिकनि । अवकनि । कुतः । इमिकनि । इवकनि । इतः । हुमिकनि । अमिकनि । अवकनि । अतः । एभ्य एव शब्देभ्योऽनन्तरत्ववाचकः पतशब्दश्च प्रयोज्यः । तमिपत । ततोऽनन्तरम् । तत्रपत । ततोऽनन्तरम् । इत्यादि बुद्धिमता स्वयं ज्ञेयम् ।

पञ्चमीप्रत्ययान्त तदादि शब्दों से 'दिक्' अर्थ में 'किनि्' प्रत्यय होता है । (सू० १३२) । ततिकिनि्-ततः-उससे । यतिकिनि्-यतः-जहाँ से । कतिकिनि् कुतः-कहाँ से । इतिकिनि्-इतः-यहाँ से । हुतिकिनि्-अमुतः-वहाँ से । इत्यादि । ब्रूँठिकिनि्-अग्रतः-आगे से । पति्-

किनि-पृष्ठतः-पीछे से। दछिनि्किनि्-दक्षिणतः-दक्षिण से। खोव्रि्-किनि्-वामतः-वाम से। तलि्किनि्-अधरस्तात्-नीचे से। प्यठि्किनि्-ऊर्ध्वतः-ऊपर से। इत्यादि।

इस तरह पञ्चम्यन्तों से जैसे (सू० १३७)। वहाँ प्रत्यय आदि के 'एकार' को 'अकार' अन्त के अक्षर की तो पूर्णता देखी जाती है। तोरकनि-ततः-उससे। योरकनि-यतः-जिस से। कोरकनि-कुतः-कहाँ से। ओरकनि वा होरकनि-अमुतः-वहाँ से, इतः-यहाँ से।

प्राणिकृत आदेशों से जैसे—तमिकनि-तवकनि-ततः-उससे। यमिकनि-यवकनि-यतः-जिससे। कमिकनि-कवकनि-कुतः-कहाँ से। इमिकनि-इवकनि-इतः-यहाँ से। हुमिकनि-अमिकनि-अवकनि-अतः-इससे। 'एभ्य एव' शब्दों से अनन्तरवाचक 'पत' शब्द का प्रयोग करना चाहिए। तमिपत-इसके बाद। तवपत-इसके बाद। इत्यादि बुद्धिमान् को स्वयं जान लेना चाहिए।

कालार्थे कालवाचिभ्यः ॥ १५४ ॥

अज़्कनि। अद्य प्रायः। पगाह्कनि। श्वः प्रायः। कालिक्य्-घकनि। परश्वः प्रायः। ऊत्रकनि। परह्यः प्रायः। दह्म्कनि। दशम्यां प्रायः। हारकनि। आषाढ़मासे प्रायः। इत्यादि।

अज़कनि-अद्यप्रायः-आज। पगाह्कनि-श्वः प्रायः-कल। कालि्-क्यथ्कनि्-परश्वः प्रायः-परसों। ऊत्रकनि-परह्यः प्रायः-बीता हुआ परसों। दह्म्कनि-दशम्यां प्रायः-दशमी में। हारकनि-आषाढ़मासे-प्रायः-आषाढ़ महीने में। इत्यादि।

अन्येभ्यः इ् केवलश्च ॥ १५५ ॥

तदादिशब्दव्यतिरिक्तेभ्यः अन्येभ्यः शब्देभ्यः केवलं इ प्रत्ययश्च भवति दिगर्थे गम्यमाने। ब्रूँठि्। अग्रतः। पति्। पृष्ठतः। खोव्रि। वामतः। दछिनि्। दक्षिणतः। तलि्। अधस्तात्। प्यठि्। ऊर्ध्वतः। इत्यादि।

तदादि शब्दों से अतिरिक्त अन्य शब्दों से 'दिग्' अर्थ-गम्यमान में केवल 'इ' प्रत्यय होता है। ब्रूँठि्-अग्रतः-आगे से। पति्-पृष्ठतः-पीछे से। खोव्रि्-वामतः-वाम से। दछिनि-दक्षिणतः-दक्षिण से। तलि्-अधस्तात्-नीचे। प्यठि-ऊर्ध्वतः-ऊपर से। इत्यादि।

सर्वेभ्यः पारि् च ॥ १५६ ॥

सर्वेभ्यः प्राणिकृतादेशतदादिभ्यः अन्येभ्योऽपि शब्देभ्यो दिगर्थे अभिधेये पारि् प्रत्ययो भवति। कमिपारि वाकपारि। कस्मात्पार्श्वतः। तमिपारि् वा तपारि्। तस्मात्पार्श्वतः। यमिपारि् वा यपारि्। यस्मात्पार्श्वतः। इत्यादि। हुमिपारि् वा हुपारि्। अमुष्यात्पार्श्वतः इमिपारि् वा इपारि्। अस्मात्पार्श्वतः। अमिपारि् वा अपारि। अमुष्यात्पार्श्वतः। ब्रूँठिपारि्। अग्रपार्श्वतः। पातिम्पारि्। पश्चात्पार्श्वतः। इत्यादि ज्ञेयम्।

सभी प्राणिकृत आदेश तदादिओं से, अन्य भी शब्दों से दिगर्थ अभिधेय में 'पारि्' प्रत्यय होता है। कमिपारि् वा कपारि्-कस्मात्पार्श्वतः-किसके पास से। तमिपारि् वा तपारि्-तस्मात्पार्श्वतः। उसके पास से। यमिपारि् वा यपारि्-यस्मात्पार्श्वतः-जिसके पास से। इत्यादि। हुमिपारि् वा हुपारि्-अमुष्यात्पार्श्वतः-उसके पास से। इमिपारि् वा इपारि्-अस्मात्पार्श्वतः-इसके पास से। अमिपारि् वा अपारि्-अमुष्यात्पार्श्वतः-उसके पास से। दछिनिपारि्-दक्षिणपार्श्वतः-दांई तरफ से। खोव्रिपारि्-वामपार्श्वतः-बांई तरफ से। ब्रूँठिपारि्-अग्रपार्श्वतः-आगे की तरफ से। पतिम्पारि्-पश्चात्पार्श्वतः-पीछे की तरफ से। इत्यादि जानना।

चोरो विश्वगर्थे च्वच्ववादेशौ च ॥ १५७ ॥

चोरशब्दात्पारि् प्रत्ययो भवति। चोरश्च च्व च्ववा आदेशौ भवतः। च्वपारि् वा च्ववापारि्। विश्वतः। विश्वगर्थे किम्। चोरिपारि्। चतुष्पार्श्वतः।

'चोर्' शब्द से 'पारि्' प्रत्यय होता है और 'चोर' शब्द को 'च्व और च्ववा' आदेश हाता है। च्वपारि् वा च्ववापारि्-विश्वतः-चारों तरफ से। विश्वक् अर्थ में क्या? चोरिपारि्-चतुष्पार्श्वतः-चारों तरफ से।

सप्तम्यन्तात्कुन् ॥ १५८ ॥

सप्तमीप्रत्ययान्तेभ्यः शब्देभ्यो दिगर्थे गम्यमाने कुन् प्रत्ययो भवति। तोर्कुन्। तस्यां दिशि। योर्कुन्। यस्यां दिशि। कोर्कुन्। कस्यां दिशि। योर्कुन्। अस्यां दिशि। हाकुन् वा ओर्कुन्। अमुष्यां

दिशि (सू० १३६)। एवं ततुकुन्। तस्यां दिशि। यतुकुन्। यस्यां दिशि। कतुकुन्। कस्यां दिशि। इतुकुन्। अस्यां दिशि। हतुकुन् वा अतुकुन्। अमुष्यां दिशि। (सू० १३६) इति। तूर्यंकुन्। तस्यामेव दिशि। इत्यादयश्चोह्याः।। उकाररहितात्प्रत्ययादपि व्यवह्रियते। तथ्कुन्। यथ्कुन्। कथ्कुन्। इथ्कुन्। हुथ्कुन्। अथ्कुन्। इति। यप्रत्ययविशिष्टाच्च यथा। तूर्यं कुन्। यूर्यं कुन्। तथ्यकुन्। यथ्य-कुन्। इत्यादयः स्वयं विचार्याः। एवं। गाम्कुन्। गरकुन्। क्वलि-कुन्। कारिकुन्। ह्यरुकुन्। ह्यूरुकुन्। व्वन्कुन्। इत्यादि। षष्ठ्यन्त-लिङ्गादपि प्रयुज्यते। मालिस् कुन्। पितुः पार्श्वे : माज्य कुन्। मातुः पार्श्वे। तमिस् कुन्। तस्य पार्श्वे। यमिस् कुन्। यस्य पार्श्वे। इत्यादि।

सप्तमीप्रत्ययान्त शब्दों से दिक् अर्थ गम्यमान में 'कुन्' प्रत्यय होता है। तोर्कुन्-तस्यां दिशि-उस दिशा में। योर्कुन्-यस्यां दिशि-जिस दिशा में। कोर्कुन्-कस्यां दिशि-किस दिशा में। योर्कुन्-अस्यां दिशि-इस दिशा में। होर्कुन् वा ओर्कुन्-अमुष्यां दिशि-इस दिशा में (सू० १३६)। इसी तरह-ततुकुन्-तस्यां दिशि-उस दिशा में। यतुकुन्-यस्यां दिशि-जिस दिशा में। कतुकुन्-कस्यां दिशि-किस दिशा में। इतुकुन्-अस्यां दिशि-इस दिशा में। हतुकुन्-वा अतुकुन्-अमुष्यां दिशि-इस दिशा में। (सू० १३६) इति। तूर्यकुन्-तस्यामेव दिशि-उसी दिशा में। इत्यादि समझ लेना। 'उकार' से रहित प्रत्यय से भी व्यवहृत होता है। तथ्कुन्, यथकुन्. इथकुन्, हुथकुन्, अथकुन्। इति। 'य' प्रत्यय विशिष्ट से जैसे-तूर्यकुन्, यूयेकुन्, तथ्यकुन् यथ्य-कुन्, इत्यादि स्वयं विचार लेना। इस तरह-गाम्कुन्, गरकुन्, क्वलि-कुन्, कारिकुन्, ह्यरुकुन्, ह्यूरुकुन् व्वनकुन्, इत्यादि। षष्ठयन्त-लिङ्ग से भी प्रयुक्त होता है। मालिस् कुन्-पितुः पार्श्वे-पिता के पास में। माज्य कुन्-मातुः पार्श्व-माता के पास में। तमिस् कुन्-तस्य पार्श्वे-उस के पास में। इत्यादि।

मयार्थे उवु ॥ १५९ ॥

तन्मयः अस्तीत्यस्मिन्नर्थे 'उवु' प्रत्ययो भवति। स्वमुवु। स्वर्ण-मयः। म्यच्युवु। मृण्मयः। काठवु। काष्ठमयः। इत्यादि।

'तन्मय है' इस अर्थ में 'उवु' प्रत्यय होता है। स्वमुवु-स्वर्णमयः-सोने का बना हुआ। म्यच्युवु-मृण्मयः-मिट्टी का बना हुआ। काठ्वु-काष्ठमयः लकड़ी का बना हुआ। इत्यादि।

अधीनार्थे बुज्य ॥ १६० ॥

तस्याधीनमित्यस्मिन्नर्थे बुज़्य् प्रत्ययो भवति। लूकबुज़्य्। लोकाधीनम्। ख्वडबुज़्य्। गर्ताधीनम्। कलयबुज़्य्। भार्याधीनम्। इत्यादि।

'उस के अधीन' इस अर्थ में 'बुज्य्' प्रत्यय होता है। लूकबुज्य्-लोकाधीनम्-लोगों के अधीन। ख्वडबुज्य-गर्ताधीनम्-गर्त के अधीन। कलयबुज्य्-भार्याधीनम्-भार्या के अधीन। इत्यादि।

अडल्यकुशब्दो विकलार्थे ॥ १६१ ॥

विकले वस्तुनि अभिधेये सति अडल्यकु शब्दो निपात्यते। अडल्यकु। विकलः। अडल्यचू कोम्। विकला क्रिया। अडल्यचू लरु। विकला शाला। इत्यादि।

विकल वस्तु अभिधेय में 'अडल्यकु' शब्द निपातित है। अडल्यचू कोम्। विकला। क्रिया-विकल क्रिया। अडल्यचू लरू। विकला शाला-विकल शाला। इत्यादि।

अभ्रधूमवातमात्रायां रिंग् ॥ १६२ ॥

एषां त्रयाणां विकलत्वे मात्रायामभिहितायां सत्यां रिंग् प्रत्ययः स्यात्। अवररिंग्। अभ्रमात्रा। द्हरिंग्। धूममात्रा। बावरिंग्। वातमात्रा। इति।

इन तीनों के विकलत्व में मात्रा के कहे जाने पर 'रिंग्' प्रत्यय होता है। अवररिंग्-अभ्रमात्रा-अभ्रमात्र। द्हरिंग्-धूममात्रा। धूममात्र। बावरिंग्-वातमात्रा-वातमात्र। इति।

प्राणप्रकाशयोर्लथ् ॥ १६३ ॥

प्राणप्रकाशयोर्मात्रायामभिहितायां ल्थ् प्रत्ययो भवति। अत्र थकार आदेशकृतोऽस्तीति ज्ञेयम्। प्राणल्थ्-प्राणमात्रा। शाहल्थ्-श्वासमात्रा। गाशल्थ्-प्रकाशमात्रा। चाँग्ल्थ्-दीपमात्रा।

प्राण और प्रकाश में मात्रा के कहे जाने पर 'लथ्' प्रत्यय होता है। यहाँ 'थकार' आदेशकृत है। यह समझना चाहिए। प्राण लथ्-

प्राण मात्रा-प्राणमात्र । शाहल्थ्-श्वासमात्रा-श्वासमात्र । गाशल्थ्-प्रकाश मात्रा-प्रकाशमात्र । चाँगिल्थ्-दीपमात्रा-दीपमात्र ।

पटस्य त्र् ॥ १६४ ॥

पटस्य वस्त्रादेर्मात्रायां त्र् प्रत्ययो भवति ।
कपर्तर् । कार्पासखण्डः । पट्ित्र् । औार्णखण्डः ।

'पट' के वस्त्र आदि की मात्रा में 'त्र्' प्रत्यय होता है । कपर्तर्-कार्पासखण्डः-कपास का खण्ड । पट्ित्र्-औार्णखण्डः-ऊन के कपड़े का खण्ड ।

छल्तिलिमावन्यतश्च ॥१६५॥

वस्त्रादेरन्यस्यापि मात्रायामभिहितायां छल् प्रत्ययः तिलिम् प्रत्ययश्च स्यात् । कप्र्तिलिम् । कार्पासखण्डः । च्वच्यतिलिम् । अपूपखण्डः । बुर्जतिलिम् । भूर्जखण्डः । इत्यादि । एवं कप्र्छल् । बुर्जछल् । च्वच्यछल् । पच्यछल् । पट्ीखण्डः । कृह्लमाज़छल् । यकृत्खण्डः । इत्यादि ।

वस्त्र आदि अन्य की भी मात्रा के कहने पर 'छल्' और 'तिलिम्' प्रत्यय होता है । कप्र् तिलिम्-कार्पासखण्डः-कार्पासखण्ड । च्वच्य-तिलिम्-अपूपखण्डः-अपूपखण्डः । बुर्जतिलिम्-भूर्जखण्डः-भूर्ज-खण्ड । इत्यादि । इसी तरह कप्र् छल् । बुर्जछल् । च्वच्यछल् । पच्यछल् । पट्ीखण्ड । कृह्लमाज़छल् । मकृलेकडे इत्यादि ।

रेम्फ अल्पकरुणयोः ॥१६६॥

अल्पस्य करुणायाश्चार्थे रेम्फ् भवति । करुणायां यथा । शरि-रेम्फ्-पोतकः । गरिरेम्फ्-अश्वकः । महनिविरेम्फ्-पुरुषकः । अल्पार्थे यथा-चूँठिरेम्फ्-क्षुद्रपालीवतः । इत्यादि ।

अल्प और करुणा के अर्थ में 'रेम्फ' होता है । करुणा में जैसे-शरि्रेम्फ्-पोतकः-बच्चा । गरिरेम्फ्-अश्वकः-घोड़ा । महनिविरेम्फ्-पुरुषकः-पुरुष । अल्प अर्थ में जैसे-चूँठिरेम्फ-क्षुद्रपा लीवतः । इत्यादि ।

रेंछ संबन्धस्य ॥१६७॥

संबन्धस्याल्पत्वे अभिधेये रेंछ प्रयुज्यते । संबन्धस्तु वस्त्रादि-कस्य वा भवतु जीवस्य वा भवत्विति । कपर्रेँछ् । कार्पासखण्डः । मातामाल रेँछ् छ्यह । म.तामहगृहसंबन्धमात्रास्ति ।

संबंध के अल्पत्व अभिधेय में 'रेँछ' प्रत्यय प्रयुक्त होता है। संबन्ध तो वस्त्रादि का वा जीव का हो। कपर्रेँछ्-कार्पासखण्डः-वस्त्र का टुकड़ा। मातामाल् रेँछ् छयह्-नाना के घर का सबन्ध मात्र है।

जंडकाञ्तलवश्च शाककाष्ठयोः ॥१६८॥

शाकानां काष्ठानां च सामान्येन मात्रायामभिहितायां सत्यां जंड् प्रत्ययः काञ् प्रत्ययो वा तलु प्रत्ययो वा भवति। च शब्दात् थोपु प्रत्ययश्च स्यात्। हांकजंड्। किंचिच्छाकः। काठजंड्। किंचित्काष्ठम्। पोषजंड्। किंचित्पुष्पाणि। हाककाञ्। पोषकाञ्। हाकतलु। काठतलु। पोषतलु। जिनितलु। सिनितलु। मुज्यतलु।

शाकों के और काष्ठों के सामान्य से मात्रा में कहे जाने पर 'जंड्' प्रत्यय, काञ् प्रत्यय वा तलु प्रत्यय होता है और 'थोपु' प्रत्यय होता है। हाँकजंड-किंचिच्छाकः-कुछ शाक। काठजंड्-किंचित्काष्टम् कुछ काठ। पोषजंड्-किंचित्पुष्पाणि-कुछ पुष्प। हाककाञ्, काठकाञ्, पोषकाञ्। हाकतलु, पोषतलु, जिनितलु, सिनितलु, मुज्यतलु।

सस्यादीनां फलु ॥२६९॥

सस्यानां मात्रायां सामान्येन वाच्यायां सत्यां फलु प्रत्ययो भवति दाँ फेलु (सू० ३।८)। किंचिद्धान्यम्। त्वम्लफलु। किंचितण्डुलः। करफलु। किंचित्कलायः। म्वंगफलु। किंचिन्मुद्गः इत्यादि। आदिशब्दादन्येभ्योऽपि। च्ञफलु। किंचिदङ्गारः बठ्फलु। किंचित्करीषः। म्यच्यफलु। किंचिन्मृत्तिका। फलुशब्दस्य वहुत्वनिर्दशतस्तेषां कणा एव निर्णीयन्ते। न तु तेषां साकल्यम्। यथा। दाँफलि्। धान्यकणाः। त्वम्लफलि्। तण्डुलकणाः इत्यादि।

सस्य (खेती) आदि की मात्रा में सामान्य से वाच्य में होने पर 'फलु' प्रत्यय होता है। दाँफलु (सू० ३।८)-किंचिद्धान्यम्-कुछ धान। त्वंमूलफलु-किंचित्तण्डुलः-कछ चावल। करफलु-किंचित्कलायः-कुछ कलाय। म्वंगफलु-किंचिन्मुद्गः-कुछ मूँग। इत्यादि। 'आदि' शब्द से दूसरों से भी। च्ञ्फलु-किंचिदङ्गारः-कुछ अङ्गारे। बठ्-फलु-किंचित्करीषः-कुछ करीष। म्यच्यफल-किंचिन्मृत्तिका-कुछ

मिट्टी। फलु् शब्द के बहुत्वनिर्देश से उन के कण ही निर्णीत किए जाते हैं न कि उनके साकल्य। जैसे-दाँफलि्-धान्यकणाः-धान के कण। त्वम्लफलि्-तण्डुलकणाः-चाबल के कण। इत्यादि।

सर्वेभ्योऽसस्येभ्यो म्वया हना वा लक्ष्यतः ॥ १७० ॥

अभ्रादिभ्यः सस्यवर्जितेभ्यः सर्वेभ्यः सामान्येन मात्रायां वाच्यायां म्वया हना वा भवति। लक्ष्यतो व्यवहारानुसारतः। अनयोराशब्दः सामान्यप्रत्ययजो ज्ञेयः। अव्रम्वया। अव्रहना। द्हम्वया। द्हहना। वावम्वया। वावहना। एवं सर्वेषाम्। हाकम्वया। हाकहना। इति पक्वस्यैव ज्ञेयः। हाकतुल्वा। इति पक्वापक्वयोरपि। एवं। पोषम्वया। पोषहना। काष्ठस्य तु न। एवं। च्ज्म्वया। च्ज्हना। म्यच्यम्वया। म्यच्यहना। असस्येभ्यः किम्। दाँम्वया। इति न भवति। किन्तु। वतफल्वा। वतम्वया। वतहना। इत्यास्मिन्सर्वे साधवः। शेषा व्यवहारतो ज्ञेयाः।

सस्यवर्जित सभी 'अभ्रादिओं' से सामान्य से मात्रा वाच्य में 'म्वया-वा-हना' प्रत्यय होता है। लक्ष्य से व्यवहारानुसार से। इन में 'आ' शब्द सामान्य प्रत्यय से पैदा हुआ जानना। अव्रम्वया। अव्रहना। द्हम्वया। द्हहना। वावम्वया। वावहना। इस-तरह सभी के लिए। हाकम्वया। हाकहना। यह पके हुए को ही जानना। हाकतुल्वा। यह पके हुए और नहीं पके हुए में भी। इस तरह पोषम्वया। पोषहना। काष्ठ के लिए तो नहीं। इस तरह। च्ज्म्वया। च्ज्हना। म्यच्यम्वया। म्यच्यहना। सस्य से अतिरिक्तों का क्या? दाँम्वया। यहाँ नहीं होता है। किन्तु-वतफल्वा। वतम्वया। वतहना। इस में सभी साधु हैं। शेष व्यवहार से जानने।

जलस्थानार्थ एव बल् ॥ १७१ ॥

बल् प्रत्ययः जलसंबन्धिस्थानस्यार्थ एव प्रयुज्यते। व्यथबल्। वितस्तास्थानम्। गंगबल्। गङ्गास्थानम्। मार्बल्। मारी (नदी) स्थानम्। व्वरवरिबल्। वापीस्थानम्। क्रूरि्बल्। कूपस्थानम्। आवरिज्बल्। चितास्थानम्। शिम्शानबल्। श्मशानस्थानम्।

'बल्' प्रत्यय जलसंबन्धिस्थान के लिए ही प्रयुक्त होता है। व्यथबल्-वितस्तास्थानम्-वितस्ता का स्थान। गंगबल्-गङ्गास्थानम्-

गङ्गा का स्थान। मार्बल्-मारीनदीस्थानम्-मारीनदी का स्थान। प्वरवरिबल्-वापीस्थानम्-बावली का स्थान। क्रूरिबल्-कूपस्थानम्-कुंएं का स्थान। ग्रावरिग्रबल्-चितास्थानम्-चिता का स्थान। शिम्शानबल्-श्मशानस्थानम्-श्मशानस्थान।

अन्यत्रापि च वलिदानस्थाने ॥ १७२ ॥

यत्र जलदेवायान्यस्मै भूदेवाय भूतादिभ्यश्च बलिः प्रदीयते तत्रापि बल्शब्दः प्रयुज्यते। सवबल्। सभास्थानम्। बरबल्। वरार्थं यत्र पाकः क्रियते। कोँदबल्। इष्टिकापाकस्थानम्। राजबल्। श्मशानस्थानम्। ग्रटबल्। जलधरस्थानम्। इत्यादि।

यहां पर जलदेवता, दूसरे पृथ्वी के देवता और भूतादि को वलि दी जाती है। वहां भी 'वल्' शब्द प्रयुक्त होता है। सवबल्-सभास्थानम्-सभास्थान। वरबल्-वरार्थं यत्र पाकः क्रियते-वर के लिए यहां खाना पकाया जाता है। कोँदबल्-इष्टिकापाकस्थानम्-ईंटों को पकाने का स्थान। राजबल्-श्मशानस्थानम्-श्मशानस्थान। ग्रटबल्-जलधरस्थानम्-बादलों का स्थान। इत्यादि।

वार्शब्दस्य स्नानस्थाने वस्य यः ॥ १७३ ॥

यत्रैव नरैः स्नानं क्रियते तत्रैव देवर्षिपितृभ्यो वारिदानं वितीर्यते, इति कश्मीरसंप्रदायः। अतो नद्यादेर्यत्र कुत्रचित्स्थाने स्नानादि क्रियते तत्र वार् शब्दात् बल् प्रत्ययो भवति वकारस्य च यत्वम्। यारबल्। स्नानस्थानम्।

यहां पर मनुष्यों से स्नान किया जाता है, वहां पर ही देव, ऋषि और पितरों को जलदान किया जाता है, यह कश्मीर का संप्रदाय है। इसलिए नदी आदि के जिस किसी स्थान में स्नान आदि किया जाता है, वहां 'वार्' शब्द से 'बल्' प्रत्यय होता है और 'वकार' को 'य'। यारबल्-स्नानस्थानम्-स्नान करने की जगह।

पैँसयुगले टूँकु ॥ १७४ ॥

'टूँकु' शब्दो निपात्यते। टूँकु। पणयुगम्।

'टूँकु' शब्द का निपात किया जाता है। टूँकु-पणयुगम्-दो पैसे।

तत्परतो हत् ॥ १७५ ॥

त्र्यादि पणानां संख्यायामभिहितायां हत् प्रत्ययः स्यात्। त्रिहथ्।

पणत्रयम् । चोहृथ् । पणचतुष्कम् । पाँच्हथ् । पणपञ्चकम् । परन्तु यथा पूर्वोक्तसूत्रेषु शतसंख्यायां नवभ्यः शत् इति व्यवह्रियते (सू. १२५) इत्यादि । तथैवात्रापि विज्ञेयम् । नव्शथ् । पणनवकम् । इत्यादि । किन्तु वणिग्जनैः पणदशकस्यापि सहस्रवाची सास्शब्दः परिभाष्यते ।

तीन आदि पणों की संख्या में कहे जाने पर 'हत्' प्रत्यय होता है । त्रिहथ्-पणत्रयम्-तीन पणक । चोहृथ्-पणचतुष्कम्-चार पणक । पाँच् हथ्-पणपञ्चकम्-पाँच पणक । परन्तु जैसे पूर्वोक्त सूत्रों में शत संख्या में नव से सौ यह व्यवहृत होता है । (सू. १२५) इत्यादि । वैसा ही यहां भी जानना । नव्शथ् । पणनवकम् । नौ पणक । इत्यादि । किन्तु वणिए दश पणक को भी सहस्रवाची 'सास् शब्द' से पुकारते हैं ।

शतावधि जनसंख्यायां जनुशब्देनैव संख्यासमासः ॥ १७६ ॥

जनसंख्यायां वाच्यायां सत्यां जनु शब्दादेव पूर्वमुत्तरं वा संख्याशब्दाः संगन्तव्याः । जनि् पंचाहमर् (सू. २।३।४४) । पञ्चाशजनाः । शेठ् जनि् षष्टिजनाः । इत्यादि ।

जनसंख्या वाच्य में होने पर 'जनु' शब्द से ही पूर्व अथवा बाद में संख्या शब्द जोड़ देने चाहिएं । जनि् पंचाहमर् (सू. २।३।४४) पचास आदमी । शेठ्जनि्-षष्टिजनाः-साठ आदमी । इत्यादि ।

लूक्शब्देन शतादिषु ॥ १७७ ॥

जनानां शतसहस्रादिसंख्यायां वाच्यायां लूक् शब्देन संख्याशब्दाः पूर्वमुत्तरं वा संघेयाः । हथ् लूक । शतं जनाः । ज़ह् हथ् लूक । जनानां द्विशती । त्रिहथ् लूक् । जनानां त्रिशती । इत्यादि । हथ् ज़नि । शतं जनाः । सास् ज़नि । सहस्रं जनाः । इति च कदाचिद्व्यवह्रियते तदल्पत्वाद्गौणमेव बोध्यम् ।

आदमियों के शतसहस्रादि संख्या-वाच्य अर्थ में 'लूक्' शब्द से संख्याशब्द पूर्व वा बाद में मिलाने चाहिए । हथ् लूक-शतं जनाः-सौ आदमी । ज़ह् हथ् लूक-जनानां द्विशती-दो सौ आदमी । त्रिह् थ लूक-जनानां त्रिशती-तीन सौ आदमी । इत्यादि । हथ् ज़नि-शतं जनाः-सौ आदमी । सास् जनि-सहस्रं जनाः-हजार आदमी । ऐसा कभी

व्यवहृत होता है, उससे थोड़ा होने पर गौण ही जानना।

त चार्थे ॥ १७८ ॥

च शब्दस्यार्थे त भवति। सुह त चूह्-स च त्वम्।

'च' शब्द के अर्थ में 'त' होता है। सुह् त च्ह्-स च त्वम्-वह और तूं।

अपि शब्दार्थे ति ॥१७९॥

स्पष्टम्। वहुवचनेषु त शब्दस्थाने ति शब्द एव प्रयुज्यते। सह् ति चह् ति सोऽपि त्वमपि। महनिवि ति गुपन् ति आय्। नराश्च पशवश्चागताः। न तु महनिवि त गुपन् त आय्। इति भवति।

'अपि' शब्द के अर्थ में 'ति' प्रत्यय होता है। वहुवचनों में 'त' शब्द के स्थान में 'ति' शब्द ही प्रयुक्त होता है। सह् ति च्ह् ति-सोऽपि त्वमपि-वह भी तूं भी। मह् निवि ति गुपन् ति आय्-नराश्च पशवश्चागताः-मनुष्य और पशु आए। न कि 'मह् निवि त गुपन् त आय्' यह होता है।

बियः पुनरपरार्थे ॥ १८० ॥

पुनः शब्दस्यार्थे बियशब्दः स्यात् अपरार्थे च। बिय करि्ज़ि पुनः कुर्याः। बिय वति। अपरमार्गेण।

पुनः शब्द के अर्थ में और अपराथ में 'बिय' शब्द होता है। बिय करि्ज़ि-पुनः कुर्याः-फिर करे। बिय वति-अपरमार्गेण-दूसरे मार्ग से।

इवार्थे ज़न् ॥ १८१ ॥

इव शब्दस्यार्थेऽत्र ज़न्शब्दो भवति। तोत ज़न् छुह् परान्। शुक इवाधीते। मालिस् ज़न् छुह् रछान्-पितेव रक्ष्यते।

'इव' शब्द के अर्थ में यहाँ 'ज़न्' शब्द होता है। तोत् ज़न् छुह्-परान्-शुक इवाधीते-तोते की तरह पढ़ता है। मालिस् ज़न् छुह् रछान्-प्तिेव रक्ष्यते पिता की तरह रक्षा करता है।

सादृश्यार्थे ह्यहु ॥ १८२ ॥

स्पष्टम्। मालिस् ह्यहु (वा हिहु)। पितृसंनिभः। समासे तु। मोलु ह्यहु छुस्। सः पितृसंनिभस्तस्यास्ति। स्वन् ह्यहु छुह् नाँपान्। स्वर्णं इव दीप्यते। इत्यादि।

'सादृश्य' अर्थ में 'ह्यहु' प्रत्यय होता है। मालिस् ह्यहु (वा हिहु)-पितृसंनिभः-पिता के समान। समास में तो-मोलु ह्यहु छुस्-सः पितृ-

संनिभस्तस्यास्ति-वह उस का पिता के समान है। स्वन् ह्यहु छुह् ताँपान्-स्वर्ण इव दीप्यते-सोने की तरह चमकता है। इत्यादि।

निर्धारणे च ॥ १८३ ॥

स्पष्टम्। बदु ह्यहु अनिज़्यन्। वृद्धमिव समानयेः। नात्र कोऽपि वृद्धसदृशो नरोऽवगम्यते, किन्तु य एव वृद्धो भवेत्तमेवानयेरित्य-वधार्यम्।

स्पष्ट है। बदु ह्यह् अनिज़्यन्-वृद्धमिव समानयेः-वृद्ध की तरह लाए। यहाँ वृद्ध के समान कोई मनुष्य नहीं जाना जाता है, किन्तु जो हो वृद्ध हो, उसे ही 'आनयेः-लाए' ऐसा जानना चाहिए।

अन्यप्राधान्ये सहार्थे सूत्य् ॥ १८४ ॥

इतरस्य प्राधान्ये सति तेनैव साकं सहार्थे अभिधेये सूत्य् प्रत्ययो भवति, वा सूतिन् शब्दो भवति। (सू० २।१।६०)। सहार्थतृती-याभ्यां विकल्पकथनात्। मालिस् सूत्य् आव्। पित्रा सहागतः। अत्र पितैव प्रधानः पुत्रस्तु तत्सहितेनैवागमनकारी।

अन्य प्रधान होने पर उसी के साथ 'सह' अर्थ अभिधेय में 'सूत्य' प्रत्यय होता है वा 'सूतिन्' शब्द होता है। (सू० २।१।६०)। सहार्थ-तृतीया से विकल्प होने से। मालिस् सूत्य् आव्-पित्रा सहागतः-पिता के साथ आया। यहां पिता ही प्रधान है, पुत्र तो उसके संपर्क से ही आया।

स्वप्राधान्ये सान् ॥ १८५ ॥

आत्मनः क्रियाप्राधान्ये सतीतरस्य सहार्थे अभिधेये सान् प्रत्ययः। मालिस् सान् आव्। सतात आयातः। अत्र पुत्र एव प्राधान्येनागम-कृत् तातस्तु गौणतया तत्सहितेनोदिष्ट इत्यादि स्वयमूह्यम्।

अपनी क्रियाप्रधान होने पर दूसरे के सहार्थ अभिधेय में 'सान्' प्रत्यय। मालिस् सान् आव्-सतात आयातः-पिता के साथ आया। यहां पुत्र ही प्रधान होने से आगमकृत्, तात तो गौण होने से उसके संपर्क से कहे गए। इत्यादि स्वयं जान लेना चाहिए।

द्वयादिभ्यः पञ्चभ्यो युगपदर्थे शवय् ॥ १८६ ॥

द्विवाचकात् ज़ह् शब्दादारभ्य पञ्चभ्यः संख्याशब्देभ्यो युगपदर्थे शवय प्रत्ययो भवति। पाँचशब्दाच्छकारलोपः। द्वशवय्। द्वावेव।

त्र्यशवय् । त्रय एव । च्वशवय् । चत्वार एव । पाँचवय् । पञ्चैव । षशवय् । षडेव ।

द्विवाचक 'ज़ह्' शब्द से लेकर पञ्च संख्यावाचक शब्दों से युगपद्-अर्थ में 'शवय्' प्रत्यय होता है । 'पाँच्' शब्द से 'शकार' का लोप । द्वशवय्-द्वावेव-दो ही । त्र्यशवय्-त्रय एव-तीन ही । च्यशवय्-चत्वार एव-चार ही । पाँचवय्-पञ्चैव-पाँच ही । षश्वय्-षडेव-छः ही ।

न वय् वापाँच्भ्यः ॥ १८७ ॥

एभ्योऽपाँच्भ्यः पाँच्शब्दवर्जितेभ्यो युगपदर्थे विकल्पेन नवय् वा प्रत्ययो भवति । द्वनवय् । द्वावेव । त्र्यनवय् । त्रय एव । च्वनवय् । चत्वार एव । षनवय् । षडेव । अपाँच्भ्यः किम् । पाँचवय् । पञ्चैव ।

इन 'पाँच' शब्दवर्जित 'अपाँच्' शब्दों से युगपद्— अर्थ में विकल्प से 'नवय्' प्रत्यय होता है । द्वनवय्-द्वावेव-दो ही । त्र्यनवय्-त्रय एव-तीन ही । च्वनवय्-चत्वार एव-चार ही । षनवय्-षडेव-छः ही । 'अपाँच्' शब्दों से क्या ? पाँचवय्-पञ्चैव-पाँच ही ।

सप्तादिभ्यो वय् ॥ १८८ ॥

सप्तादिसंख्यायाः साकल्येनार्थे गम्यमाने वय् प्रत्ययो भवति । सतवय् । सप्तैव । ऐठवय् । अष्टावेव । नववय् । नवैव । इत्यादि । अत्रेदं ध्येयम् । वय् प्रत्ययान्तेभ्यो द्वितीयायां षष्ठ्यां च नी प्रत्ययो यलोपश्च स्यात् । कर्तृतृतीयायां तु इ प्रत्ययः । वय्शब्दात्पूर्वं च विकल्पेन वकारागम इति च ।

'सप्त' आदि संख्या के 'साकल्य' अर्थ गम्यमान में 'वय्' प्रत्यय होता है । सतवय्-सप्तैव-सात ही । ऐठवय्-अष्टावेव-आठ ही । नववय्-नवैव-नौ ही । इत्यादि । यहां इस बात का ध्यान रखना चाहिए । 'वय्' प्रत्ययान्तों से द्वितीया में और षष्ठी में 'नी' प्रत्यय और 'य' का लोप होता है । कर्तृतृतीया में तो 'इ' प्रत्यय होता है और 'वय्' शब्द से पहले विकल्प से 'वकार' का आगम होता है ।

आद्यखण्डवीप्सापूर्वाः प्रथमे वा ॥ १८९ ॥

प्रथमे द्वशवय् इत्याद्याः आद्यखण्डस्य द्वश् त्र्यश् इत्यादिकस्य वीप्सापूर्वा युगपदर्थे वा कथ्यन्ते । द्वशि द्वशवय् । द्वावेव । त्र्यशि

त्र्यशवय् । त्रय एव । च्वशि च्वशवय् । चत्वार एव । पूँचि पाँचवय् । इत्यादि ।

प्रथम में 'द्वशवय्' इत्यादि आद्यखण्ड के द्वश्-त्र्यश् इत्यादि के वीप्सापूर्व युगपद् अर्थ में कहे जाते हैं । द्वशि द्वशवय्-द्वावेव-दो ही । त्र्यशि् त्र्यशवय्-त्रय एव-तीन ही । च्वशि च्वशवय्-चत्वार एव-चार ही । पूँचि पाँचवय् । इत्यादि ।

चोरश्च्वादेशो दशश्यश्च ॥ १६० ॥

चोर्शब्दस्यात्रापि दशसंख्यापरतश्च च्व आदेशो भवति । च्वशवय् । चत्वार एव । च्वदाह् । चतुर्दश । च्ववह । चतुर्विंशति । इत्यादि ।

'चोर' शब्द का यहां भी दश संख्या से परे 'च्व' आदेश होता है । च्वशवय्-चत्वार एव-चार ही । च्वदाह्-चतुर्दश-चौदह । च्ववह्-चतुर्विंशति-चौवीस । इत्यादि ।

कुनु एककार्थे ॥ १६१ ॥

केवलस्यार्थे कुनुशब्दो निपात्यते । कुनु । एककः ।

केवल के अर्थ में 'कुनु' शब्द निपात किया जाता है । कुनु-एककः-अकेला ।

हरुजोरौ युगलार्थे ॥ १६२ ॥

तत्र हरुशब्दः प्रायशो प्राणिव्यतिरिक्तवस्तुन्येव प्रयुज्यते । यथा-ड्यज्यहरु । ताटङ्कयुगलम् । दूरहरु । कर्णिकायुगम् । वालिहरु । कुण्डलयुगम् । पुलहरु । तृणपादुकायुगम् । खावहरु । काष्ठपादुका-युगम् । इत्यादि । ग्राम्यजनैस्तु । दाँदहूरि । वृषयुगम् । इति शब्दोऽपि भाष्यते । जोर्शब्दस्तु प्रायः प्राणिविषये प्रयुज्यते क्वचिदप्राणिविषये च । यथा हूरिशब्दस्तथा जूरिशब्दश्चावधार्यः । म्वक्त जूरि । मुक्तायुगम् । दाँदजूरि । वृषयुगम् । कोतर्जूरि । कपोतयुगम् । गरिजूरि । अश्वयुगम् । अख्जोर । एकं युगम् । जह्जोर । युगद्वयम् । त्र्यह्जोर । युगत्रयम् । इत्यादि । अख्हरु । एकं युगम् । ज्हहरि । युगद्वयम् । त्र्यह्हरि । युगत्रयम् । इत्यादि सर्वं बुद्धिमता स्वयमूह्यम् । त्र्यादिदशावधिसंख्यानामेकत्वेन त्रिच चाक् पंजुपक सतु ऐठि नमु दहु शब्दाः क्रमेण निपातनादेव विचार-णीयाः । चित्र । त्रयम् । चाख् । चतुष्कम् । पंजु । पञ्चकम् । षक । षट्कम् । सतु । सप्तकम् । ऐठि । अष्टकम् । नमु । नवकम् । दहु । दशकम् । इत्यादि ।

वहां 'हरु' शब्द प्रायश: प्राणि से अतिरिक्त वस्तु में ही प्रयुक्त होता है। जैसे-ड्यज्यहरु-ताटङ्कयुगलम्-दो ताटङ्क। दूरहरु-कर्णिकायुगम्-दो कर्णिका। वालिहरु-कुण्डलयुगम्-दो कुण्डल। पुलहरु-तृणपादुकायुगम्-दो पूलें। खावहरु-काष्ठपादुकायुगम्-खड़ाऊं का जोड़ा। इत्यादि। देहाती लोगों से तो-दाँदहूरि-वृषयुगम्-बैलों को जोड़ी। यह शब्द भी कहा जाता है। 'ज़ोर' शब्द तो प्रायः प्राणी के विषय में प्रयुक्त होता है और कहीं अप्राणी के विषय में। जैसे 'हूरि' शब्द और वैसे ही 'जूरि' शब्द समझना। म्वक्तजूरि-मुक्तायुगम्-दो मोती। दाँदजूरि-वृषयुगम्-बैलों की जोड़ी। कोतर-जूरि-कपोतयुगम्-कबूतरों का जोड़ा। गरिजूरि-अश्वयुगम्-दो घोड़े। अख्जोर-एकं युगम्-एक जोड़ी। ज़्ह्जोर-युगद्वयम्-दो जोड़ी। त्र्यह्जोर-युगत्रयम्-तीन जोड़ी। इत्यादि। अख्हरु-एकं युगम्-एक जोड़ो। ज़्ह्हरि-युगद्वयम्-दो जोड़ो। त्र्यह्हरि-युगत्रयम्-तीन जोड़ी। इत्यादि सब बुद्धिमान् को स्वयं समझ लेना चाहिए। तीन आदि से दश तक संख्याओं के एकत्व से त्रिच चाक् पंजु षक सतु ऐठि नमु दहु शब्द क्रम से निपातन से ही विचार लेना चाहिए। त्रिच-त्रयम्-तीन। चाख्-चतुष्कम्-चार। पंजु-पञ्चकम्-पांच। षक-षट्कम्-छः। सतु-सप्तकम्-सात। ऐठि-अष्टकम्-आठ। नमु-नवकम्-नौ। दहु-दशकम्-दश। इत्यादि।

किंचिदर्थे पहान् ॥ १६३ ॥

विशेष्यस्य वस्तुन: किंचिद्विशेषणार्थे वाच्ये पहान् शब्दः अग्रे प्रयोज्यः। बडु पहान्। किंचिन्महान्। व्यठु पहान्। किंचित्स्थूलः। वुषण पहान्। किंचिदुष्णः। इत्यादि। दिग्देशकालवाचिभ्यश्च शब्देभ्योऽग्रे प्रयोज्यः। दूर पहान्-किंचिद्दूरम्। न्यूर् पहान्। किंचित्समीपम्। ब्रोंठ पहान्-किंचित्पूर्वम्। पथ्पहान्। किंचित्पश्चात्। चीरि पहान्। किंचिच्चिरेण। काशरु पहान्। किंचित्कश्मीरदेशजः। बंगालकु पहान्। किंचिद्बंगलादेशजः। उहुर्येदु पहान्। यहुर्येदु पहान्। इत्यादि विज्ञेयम्।

विशेष्य वस्तु के कुछ विशेषण अर्थ-वाच्य में 'पहान्' शब्द आगे प्रयुक्त करना चाहिए। बडुपहान्-किंचिन्महान्-कुछ बड़ा। व्यठु पहान्-किंचित्स्थूलः-कुछ मोटा। वुषण पहान्-किंचिदुष्णः-कुछ गर्म।

इत्यादि । दिग्, देश, काल, वाचक शब्दों से आगे प्रयुक्त करना चाहिए । दूर पहान् किंचिद्दूरम्-कुछ दूर । न्यूर पहान्-किंचित्समीपम्-कुछ पास । ब्रांठ् पहान्-किंचित्पूर्वम्-कुछ पहले । पथ् पहान्-किंचित्पश्चात्-कुछ पोछे । चोरि पहान्-किंचिच्चिरेण-कुछ देर से । काशरु् पहान्-किंचित्कश्मीरदेशजः-कुछ कश्मीर देश में पैदा हुआ । बंगालकु पहान्-किंचिद्बंगलादेशजः-कुछ बंगला देश में पैदा हुआ । उहुर्येदु पहान् । यहुर्येदु पहान् । इत्यादि जानना चाहिए ।

इति श्री शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
तद्धितप्रक्रिया समाप्ता ।। ४ ।।

अथ अव्ययप्रक्रिया ।। ५ ।।

क्रियासंबन्धिनोऽव्यया नित्यम् ।। १ ।।

ये अव्ययशब्दास्ते नित्यं क्रियासंबन्धिनो भवन्ति । यद्वनै करख् । यदि कुर्याः ।

जो अव्यय शब्द हैं, वे नित्य क्रिया से सम्बद्ध होते हैं । यद्वने करख्-यदि कुर्याः-यदि तू करे ।

धातुभ्य आनव्यये ।। २ ।।

क्रियासंबन्धिनि अन्यधात्वर्थे अभिधेये सति तस्माद्धातोः आन् प्रत्ययो भवति स चाव्ययः । व्यठान् आन्-स्थूलमागतः । स्थूलं यथा स्यात्तथा आगत इत्यर्थः ।

क्रिया से सम्बद्ध अन्य धात्वर्थ अभिधेय होने पर उस धातु से 'आन्' प्रत्यय होता है और वह अव्यय है । व्यठान् आव्-स्थूलमागतः-मोटा हो गया । स्थूल (मोटा) जैसा हो वैसा आया, यह अर्थ है ।

वीप्सया वा ।। ३ ।।

स्पष्टम् । व्यठान् व्यठान् गौव् । स्थूलं स्थूलं गतः । बहुत मोटा हो गया ।

स्वरान्ताद्वान् ।। ४ ।।

स्वरान्ताद्धातोरव्यये वान् प्रत्यय इष्यते । ख्यवान् ख्यवान् । खादन् खादन् ।

स्वरान्त धातु से अव्यय होने पर 'वान्' प्रत्यय होता है । ख्य-वान् ख्यवान्-खादन् खादन्-खाता खाता हुआ ।

लिङ्गाभीक्ष्ण्येन च ।। ५ ।।

यस्यैव विशेषणरूपस्य लिङ्गस्य क्रियासंबन्धः स्यात्तस्य शब्दस्य आभीक्ष्ण्येन द्विरुक्तेन क्रियासंबन्धो अव्ययः स्यात् च शब्दात्केवलेनापि । चतुर् चतुर् । शीघ्रं शीघ्रं । ल्वतु ल्वतु । मन्दं मन्दं । पक्ष ल्वति ल्वति । ग्वबु ग्वबु छुह् पकान् । गुरु गुरु चलति । केवलेनापि यथा । चतुर् ख्यवान् छुह् । चतुरमत्ति । ल्वतु करान् छुह् । लघु करोति । ग्वबु पकान् छुह् । गुरु गच्छति ।

जिस भी विशेषणरूप लिङ्ग का क्रिया से संबन्ध हो, उस शब्द का आभीक्ष्ण्य दो बार कहने से और केवल से भी क्रिया से सम्बद्ध अव्यय होता है। चतुर् चतुर्-शीघ्रं शीघ्रं-जल्दी-जल्दी। ल्वतु ल्वतु-मन्दं मन्दं-धीमे धीमे। पक्ष में-ल्वति ल्वति। ग्ववु ग्ववु छुह् पकान्-गुरु गुरु चलति-भारी भारी चलता है। केवल से भी जैसे-चतुर् ख्यवान् छुह्-चतुरमत्ति-जल्दी खाता है। ल्वतु करान् छुह्-लघु करोति-धीमे करता है। ग्ववु पकान् छुह्-गुरु गच्छति-भारी चलता है।

इति श्री शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
अव्ययप्रक्रिया समाप्ता ॥ ५ ॥

अथ स्त्रीप्रत्ययप्रकरणम् ॥ ६ ॥

स्त्रियाम् ॥१॥

अत्राधिकारे ये वक्ष्यमाणाः प्रत्ययास्ते स्त्रियामेवेत्यधिक्रियंते ।

यहां अधिकार में जो वक्ष्यमाण प्रत्यय हैं, वे स्त्रीलिङ्ग में ही अधिकृत किए जाते हैं ।

मनुष्यजातेः सर्वत्र बाय् ॥ २ ॥

जातिर्द्विविधा एका साम्प्रदायिका अन्या शिल्पवशात्स्वर्णकाराद्या जातिर्लोके प्रोच्यते । न चात्र पशुपक्ष्यादीनां जातिर्गृह्यते मनुष्यशब्दस्य सूत्रे नियमात् । तयोर्द्वयोरेव जात्योः स्त्रीशब्दे अभिधेये सति बाय प्रत्ययो भवति । दरबाय् । कौलबाय् । इत्यादि । वटबाय् । आर्यस्त्री । स्वनर्बाय् । स्वर्णकारस्त्री । खारबाय् । लोहकारस्त्री । इत्यादि । मनुष्यजातेः किम् । कोतर्बाय् । कोतर् नाम्नी जातिस्तत्संबन्धिनी स्त्री । न तु कपोतस्त्री तत्र। कोत्रू् इति भवति ।

जाति दो प्रकार की होती है—एक साम्प्रदायिका, दूसरी शिल्प के अनुसार स्वर्णकार आदि जाति लोक में कही जाती है । यहां पशु-पक्षी आदि की जाति नहीं ली जातो है, सूत्र में 'मनुष्य' शब्द का नियम होने से । उन दोनों ही जातियों के स्त्रीशब्द के अभिघेय होने पर बाय' प्रत्यय होता है । दरबाय्-कौलबाय्-इत्यादि । वटबाय्-आर्य-स्त्री-आर्य की स्त्री । स्वनर्बाय्-स्वर्णकारस्त्री-सुनार की स्त्री । खार-बाय्-लोहकारस्त्री-लुहार की स्त्री । इत्यादि । मनुष्य जाति का क्या ? कोतर्बाय्-'कोतर' नाम की जाति विशेष है, उससे सम्बद्ध स्त्री । 'कबूतर की स्त्री' यहां नहीं समझना, 'कोत्रू्' यह होता है ।

अनादरार्थे क्वलय् ॥ ३ ॥

मनुष्यजातिवाचकाच्छब्दादनादरेण स्त्रीशब्दे अभिधेये क्वलय् प्रत्ययो भवति । बटकलय् । ब्राह्मणस्त्री । छानकलय् । तक्षकस्त्री । अत्र यद्यपि क्वलय् शब्दो भार्यार्थवाची वर्तते परन्तु समासेनादरार्थोऽवगम्यते ।

मनुष्यजातिवाचकशब्द से अनादरपूर्वक स्त्रीशब्द अभिधेय में 'क्वलय्' प्रत्यय होता है। बटकलय्-ब्राह्मणस्त्री-ब्राह्मण की स्त्री। छानकलय्-तक्षकस्त्री-तरखान की स्त्री। यहां यद्यपि 'क्वलय्' शब्द 'भार्या' अर्थवाचक है, परन्तु संक्षेप में 'अनादर' अर्थ में जाना जाता है।

सर्वेषामुकारान्तानामूकारादेशः ॥ ४ ॥

सर्वेषां विशेष्यशब्दानां विशेषणशब्दानां चोकारान्तानां स्त्रीलिङ्गविषये ऊमात्रादेशो भवति। पटु। पटू। पट्टिका। म्वटु। म्वटू। स्थूला। गरु। गरू। कठिना। गरु। गरू। अश्वा। द्रबु। द्रबू। रजकी। वोवरु। वोवरू। (सू० ८) तन्तुवाया। गगरु। गग्रू (सू० ८) मूषका। पक्षे-मनुष्यजातेः। द्रविबाय्। वोव्रिबाय्।

सभी विशेष्य और विशेषण शब्दों के तथा उकारान्तों के स्त्रीलिङ्गविषय में 'ऊ' मात्र आदेश होता है। पटु-पटू। पट्टिका-फट्टी। म्वटु-म्वटू-स्थूला-मोटी। गरु-गरू-कठिना-कठिन। गरु-गरू-अश्वा-घोड़ी। द्रबु-द्रबू-रजकी-धोबिन। केवरु-वोव्रू-(सू० ८) तन्तुवाया-जुलाही। गगरु-गगरू-(सू० ८)-मूषका-चूही। पक्ष में मनुष्य जाति के-द्रविबाय्। वोव्रिबाय्।

वा छदुशब्दात् ॥ ५ ॥

स्पष्टम्। छ्वटु। छ्वटू। ह्रस्वा। पक्षे छ्वटिञ्। इति मनुष्य जातेरेव।

स्पष्ट है। छ्वटु-छ्वटू-ह्रस्वा-ठिंगना। पक्ष में-छ्वटिञ्-यह मनुष्य जाति का हो।

खरश्च ॥ ६ ॥

खर्शब्दात्स्त्रीलिङ्गविषये विकल्पेन ऊमात्रागमो भवति। खरू। खरी। पक्षे। खरिञ्।

'खर्' शब्द से स्त्रीलिङ्गविषय में विकल्प से 'ऊ' मात्र आगम होता है। खरू-खरी-पक्ष में-खरिञ्।

लान्तानां नः ॥ ७ ॥

उकारविशिष्टानां लकारान्तानां लकारस्य नकारादेशो भवति। वोलु। वाजू। (ऊर्मिका) कुण्डलिका। डुलोऽन्त्यात् लि आगमःइष्यते। डुलु। डुलिजि्। कुण्डलिका।

'उकार' विशिष्ट लकारान्तों के 'लकार' को 'जकार' आदेश होता है। वोलु-वाजू-(ऊर्मिका) कुण्डलिका। डुल के अन्त के अक्षर से 'लि' आगम होता है। डुलु-डुलुजि्-कुण्डलिका।

त्र्यक्षरादीनामुलोप उलोश्च ॥ ८ ॥

त्र्यक्षरादिकानां शब्दानां उलु प्रत्ययसंबन्धिन उपधाया उकारस्य लोपो भवति। गाटुलु। गाट्जू। दक्षा। फुटुलु। फुट्जू। पोटलिका। चक्लु। चक्जू। चक्रिका। पतुलु। पत्जू। उडुपिका। ग्वगुलु। ग्वग्जू। रक्तालुः। च्वतुलु। च्वतुजू। व्यभिचारिणी। वातुलु। वात्जू। चण्डाली। टठुलु। टठ्जू। काष्ठपात्रिका। त्र्यक्षरादिकानां किम्। गरू। अश्वा। गूरु्। गूरू्। गोपालिका। खरु्। खलतिः। खरू्। रोगविशेषः। उलोः किम्। त्रोलू। त्राजू। मोलू। माजू। गूलु्। गूजू।

तीन अक्षरों वाले शब्दों के 'उलु' प्रत्यय से संबद्ध उपधा के 'उकार' का लोप होता है। गाटुलु-गाट्जू-दक्षा-चतुर। फुटुलु-फुट्जू-पोटलिका-पोटली। चक्लु-चक्जू-चक्रिका—चक्र बाली। पतुलु-पत्जू-उडुपिका-नक्षत्रों बाली। ग्वगुलु-ग्वग्जू-रक्तालुः-शलगम। च्वतुलु-च्वत्जू-व्यभिचारिणी-व्यभिचार कराने बाली। वातुलु-वात्जू-चण्डाली-चण्डालिन। टटुलु-टठ्जू-काष्ठपात्रिका-लकड़ी का छोटा वर्तन। त्र्यक्षरादि का क्या ? गरु्-अश्वा-घोड़ी। गूरु्-गुरू्-गोपालिका-ग्वालिन। खरु्। (खलतिः) खरू्-रोगविशेषः-विशेष रोग। उलु से क्या ? त्रोलु-त्राजू। मोलु-माजू। गूलु-गूजू।

कवर्गान्तानां चवर्गः ॥ ९ ॥

उकारविशिष्टानां केवलानां च कवर्गान्तानां पुंल्लिङ्गानां स्त्रीलिङ्गविषये चवर्गादेशो भवति। बतकु। बत्चू। वर्तिका। ह्खु। ह्छु। शुष्का। ड्ँयूगु। डोँजू। सूत्रादिगुटिका।

उकारविशिष्ट केवल और कवर्गान्त पुंल्लिङ्गों के स्त्रीलिङ्ग विषय में 'चवर्ग' आदेश होता है। बतकु-बत्चू-वर्तिका-बत्ती। ह्खु- ह्छु-शुष्का-सूखी। ड्ँयूगु-डीँजू-सूत्रादिगुटिका।

न खूंखुच्वक्वोः ॥ १० ॥

स्पष्टम्। खूंखु। खूंखू। अवटीटा। च्वकु। च्वकू। अम्ला।

तवर्गन्तानामप्रसिद्धः ॥ ११ ॥

स्पष्टम् । मतु । मचू । उन्मत्ता । क्वथु । क्वछू । भारिका । व्वरुदु । व्वरजू । पुनर्भूः । वन् । वञ् । वन्या । मान् । माञ् । वैश्या । छान् । छाञ् । तक्षकी । हूनु । हूञ् । शुनी । एवं सर्वत्र ।

स्पष्ट है । मतु-मचू-उन्मत्ता-पागल । क्वथु-क्वछू-भारिका-भार ढोने वाली । व्वरुदु-व्वर्जू-पुनर्भू । वन्-वञ्-वन्या-जंगली । मान्-माञ्-वैश्या । छान्-छाञ्-तक्षकी-तरखानिन । हूनु-हूञ्-शुनी-कुतिया । इसी तरह सब जगह ।

कंगोऽल्पार्थेराकारश्च ॥ १२ ॥

कंग् वृहदङ्गारधानिका । तस्मादल्पाथ र् प्रत्ययो भवति आकारश्च भवति । काँग्र् । हसन्तिका ।

'कंग्' बहुत से अङ्गारों को रखने का पात्र । उससे 'थोड़े' अर्थ में 'र्' प्रत्यय और 'आकार' होता है । काँग्र्-हसन्तिका-काँगड़ी ।

चासः कृत्रिमे सस्य च खः ॥ १३ ॥

चास् सहजकासस्तस्मात्कृत्रिमेऽर्थे र् प्रत्ययः सकारस्य च खकारो भवति । चाख्र् । कृत्रिमकासः ।

'चास्' स्वाभाविक खाँसी, उससे कृत्रिम अर्थ में 'र्' प्रत्यय और 'सकार' को 'खकार' होता है । चाख्र्-कृत्रिमकासः-कृत्रिम खाँसी ।

त्रकस्तुलायाम् ॥ १४ ॥

तुलाया अर्थे त्रक्शब्दात् र् प्रत्ययो भवति । त्रख् । द्रोणः । त्रक्र् तुला ।

'तराजू' अर्थ में 'त्रक् शब्द से 'र्' प्रत्यय होता है । त्रख्—द्रोणः-मापविशेष । त्रक्र्-तुला-तराजू ।

म्वंडुशब्दस्यान्त्यस्वरलोपः ॥ १५ ॥

म्वंडु वृहत्काष्ठम् । तस्मादल्पस्यार्थे र् प्रत्ययो भवति । अन्त्यस्वरस्य च लोपो भवति । म्वंडु । म्वंड्र् । अल्पकाष्ठम् ।

म्वंडु-बड़ा काठ का टुकड़ा । उससे 'छोटे' अर्थ में 'र्' प्रत्यय होता है और अन्त के स्वर का लोप होता है ।

फ्वतुशब्दस्य च ॥ १६ ॥

र् प्रत्ययान्त्यस्वरलोपौ भवतः फ्वतु । फ्वत्र् । कटोलिका ।

'र्' प्रत्यय और अन्त के स्वर का लोप होता है फ्वतु-फ्वत्र्-कटोलिका ।

लटोश्च ॥ १७ ॥

लट्ट पुच्छस्तस्मादल्पस्यार्थे र् प्रत्ययान्त्यस्वरलोपो भवत:। लट्ट। लट्र्। पुच्छिका। तत्सादृश्येऽपि व्यवह्रियते। कूटि लट्र्। क्षुद्रकाष्ठम्।

'लट्ट' पूँछ को कहते हैं, उससे 'थोड़े' अर्थ में 'र्' प्रत्यय और अन्त के स्वर का लोप होता है। लट्ट-लट्र्-पुच्छिका-छोटी पूँछ। तत्सादृश्य में भी व्यवहृत होता है। कूटि लट्र्-क्षुद्र काष्ठम्-छोटी लकड़ी।

मक्शब्दाच्चप्रत्यय: ॥ १८ ॥

मख् परशुस्तस्मादल्पार्थे च प्रत्ययो भवति। मक्च्। परश्वधिका।

अल्पार्थे कृत्रिमार्थे च स्त्रीलिङ्गोद्देशकेऽपि च।
सादृश्ये स्वविशेषेऽर्थे स्त्रीलिङ्ग प्रत्यया: खलु॥

अल्पार्थे यथा। कतुरू। कपाल:। कत्रू। कपालिका। कृत्रिमार्थे यथा। चाखर्। कृत्रिमकास:। वस्तुन: सजीवस्य निर्जीवस्य वा स्त्रीलिङ्गेनोद्देशे कर्तव्ये सति स्त्रीप्रत्ययो भवति। म्वंगुरु-छागपोत:। म्वंग्रू-छागपोता। बछु। वत्स:। बछ्र्। वत्सा। न चात्र वत्सस्य स्त्रीवत्सा इत्यवगम्यते, किन्तु बछु शब्दस्य पुंल्लिगस्य स्त्रीलिङ्गेन निर्देश:। सादृश्ये यथा। क्वथु। क्वछु ततुरु-पीड़ा। तत्रू। कोपपीड़ा स्व-विशेषेऽर्थे यथा। नरु्। वस्त्रभुज:। नरू्। भुज:। अत्र नरूशब्दस्य स्वयं स्त्रीलिङ्गत्वान्नाल्पत्वाद्यर्थग्रह:, किन्तु वस्त्रभुजस्याधारार्थेऽत्र स्त्रीलिङ्गोद्देश: यद्वा परस्परं विनिमयोपशमाद्यत्राद्य: शब्द: पुंल्लिङ्गोभवति तत्र तत्संबन्धिनोऽन्यशब्दस्य स्त्रीलिङ्गेनोद्देश: क्रियते। यत्र तु स्त्रीलिङ्गस्तत्र पुंल्लिङ्गोद्देश:। नरु। नरू। खेरु। खरू। खलति:।

'मख्' कुल्हाड़ा, उससे 'थोड़े अर्थ में 'च' प्रत्यय होता है। मक्च्-परश्वधिका-कुल्हाड़ी।

अल्प अर्थ में, कृत्रिम अर्थ में, स्त्रीलिङ्ग-उद्देशक में, सादृश्य में और स्वविशेष अर्थ में स्त्रीलिङ्ग प्रत्यय होते हैं।

अल्पार्थ में जैसे—कतुरु-कपाल: -खोपड़ा। कत्रू—कपालिका—खोपड़ी।

कृत्रिम अर्थ में जैसे—चाख्र्-कृत्रिमकासः—कृत्रिम खांसी। सजीव वा निर्जीव वस्तु के स्त्रीलिङ्ग से उद्देश करने पर स्त्री-प्रत्यय होता है। म्वंगरु—छागपोतः—बकरे का बच्चा। म्वंगरू-छागपोता—बकरे की बच्ची। बछु-वत्सः-बछड़ा। बछूर्-वत्सा-बछड़ी। यहां बछड़े को स्त्री बछड़ी नहीं समझी जाती, किन्तु 'बछु' शब्द पुंल्लिङ्ग का स्त्रीलिङ्ग से निर्देश है।

सादृश्य में जैसे—क्वथु-क्वछु। ततुरु-पीड़ा-दर्द। तत्रू-कोप-पीड़ा-क्रोध से पीड़ा।

स्वविशेष अर्थ में जैसे-नरु-वस्त्रभुजः-कपड़े की भुजा। नरू—भुजः-भुजा। यहां 'नरू' शब्द के स्वयं स्त्रीलिङ्ग होने से न कि अल्पत्व से अर्थग्रहण होता है, किन्तु वस्त्र की भुजा के आधार अर्थ में यहां स्त्रीलिङ्ग उद्देश है। अथवा परस्पर विनिमय के उपशम से यहां आद्य शब्द पुंल्लिङ्ग होता है। वहां उससे सम्बद्ध अन्य शब्द का स्त्रीलिङ्ग से उद्देश किया जाता है। यहां स्त्रीलिङ्ग है, वहां पुंलिङ्ग उद्देश है। नरु, नरू, खरु, खरू खलतिः।

हस्तुशब्दान्नित्यमिञ् ॥१९॥

उकारान्तत्वात् ऊमात्रादेशनिवृत्यर्थं नित्यमिञ् प्रत्ययो भवति। हस्तिञ। हस्तिनी।

उकारान्त होने से 'ऊ' मात्र आदेश निवृत्ति के लिए नित्य 'इञ्' प्रत्यय होता है। हस्तिञ-हस्तिनी-हथिनी।

काव्नाग्वूंट्भ्यश्च ॥२०॥

एभ्यः शब्देभ्यो नित्यमिञ् भवति। काविञ्। काकी। नागिस्-नागा। वूंटिञ्। उष्ट्रा।

इन शब्दों से नित्य 'इञ्' प्रत्यय होता है। काविञ्-काकी-छोटी लड़की। नागिस्-नागा-नागिन। बूंटिञ्-उष्ट्रा-ऊंटिनी।

अन्यतोऽपि पशुजातेः ॥ २१ ॥

स्पष्टम्। खरिञ्-खरी-गदही।

व्यठुगूठ्भ्यां निन्दार्थे ॥ २२ ॥

स्पष्टम्। व्यठिञ्। स्थूला। गूठिञ्। स्थूला। निन्दायां किम् व्यठू। स्थूला।

स्पष्ट है। व्यठिञ्-स्थूला-मोटी। गूठिञ्-स्थूला-मोटी। निन्दा में क्या? व्यठू-स्थूला-मोटी।

ब्वटशब्दात्स्त्रियाम् ॥ २३ ॥

स्त्रीलिङ्गविषये इञ् भवति न निन्दार्थे। ब्वटिञ्। बटिञ्। ब्वटजातिः स्त्री। पक्षे। ब्वटबाय्।

स्त्रीलिङ्गविषय में 'इञ्' होता है, निन्दा अर्थ में नहीं। ब्वटिञ्-बटिञ्-ब्वटजातिः स्त्री-ब्वट जाति की स्त्री, पक्ष में, ब्वटबाय्।

बुगिय्शब्दाद्यलोपश्च ॥ २४ ॥

बुगिय् स्वामी तस्मादिञ् प्रत्ययो भवति। यकारस्य च लोपो भवति। बुगिञ्। स्वामिनी।

'बुगिय्' स्वामी, उससे 'इञ्' प्रत्यय होता है और 'यकार' का लोप होता है। बुगिञ्-स्वामिनी-मालकिन।

जलात्पादनिदाघे ॥ २५ ॥

जलशब्दात्पादस्वेदार्थे इञ् भवति। जलिञ्। पादस्वेदः।

'जल' शब्द से पाँओं के पसीने' के अर्थ में 'इञ्' होता है। जलिञ्-पादस्वेदः-पाँओं का पसीना।

गराद्गृहसंस्कारे ॥ २६ ॥

गृहसंस्कारेऽभिधेये गरशब्दात्स्त्रियामिञ् भवति। गरिञ्। गृहसंस्कारिणी। अन्यत्र। गर्वाज्यञ्। गृहिणी।

गृहसंस्कार-अभिधेय में 'गर' शब्द से स्त्रीलिङ्ग में 'इञ्' होता है। गरिञ्-गृहसंस्कारिणी-घर का संस्कार करने वाली। दूसरी जगह-गर्वाज्यञ्-गृहिणी-घर वाली।

द्वबुशब्दादायुधे ॥ २७ ॥

स्पष्टम्। द्वविञ्। सृगरूपो रजकायुधः। अन्यत्र। द्वबू वा द्वबिवाय्। रजकस्त्री।

स्पष्ट है। द्वविञ्-सृगरूपो रजकायुधः-सृग रूप धोबी का आयुध-विशेष। दूसरी जगह-द्वबिवाय्-रजकस्त्री-धोबी की स्त्री।

मनुष्यजातेरञ् ॥ २८ ॥

मनुष्यजातिवाचकाच्छब्दादञ् प्रत्ययो भवति। बटञ्। ब्राह्मणी। मुसलमानञ्। म्लेच्छानी। हाकग्राकञ्। शाकविक्रेत्री-चाञ्यञ्-वणिक्स्त्री।

मनुष्य जाति वाचक शब्द से 'अञ्' प्रत्यय होता है। बटञ्-ब्राह्मणी-ब्राह्मणस्त्री। मुसलमानञ्-म्लेच्छानी-म्लेच्छस्त्री। हाक ग्राकञ्-शाक

विक्रेत्री-शाक बेचने वाली। चाञ्यत्र्-वणिक्स्त्री-वणिए की स्त्री।

वोलुप्रत्ययान्तान्नित्यम् ॥ २९ ॥

स्पष्टम्। गर्वाज्यत्र्। गेहिनी। न तु गर्वोलुशब्दस्य उकारान्तत्वात् ऊमात्रादेशः स्यान्नित्यग्रहणात्। प्रत्ययान्तान्नित्यम् वोलु। वाजू।

स्पष्ट है। गर्वाज्यत्र्-गेहिनी-घर वाली। वोलुशब्द के उकारान्त होने से 'ऊ' मात्र आदेश हो नित्य ग्रहण से। प्रत्ययान्त से नित्य। वोलु-वाजू।

प्रत्ययादेर्यो रान्तेभ्यः ॥ ३० ॥

रकारान्तेभ्यः शब्देभ्यः प्रत्ययादिवर्णस्य यकारो भवति। सालर्यंत्र्। अतिथिस्त्री। प्वहर्यंत्र्। गृहागता। रंगर्यंत्र्। रजकस्त्री। स्वनर्यंत्र्। स्वर्णकारस्त्री। दाँदर्यंत्र्। शाकविक्रेत्री। काँदर्यंत्र्। आपूपिकी। स्वञ्यत्र्। पुत्रश्वश्रूः। महार्यंत्र्। महाराजस्त्री। राज्यर्यंत्र्। राजस्त्री।

रकारान्त शब्दों से प्रत्ययादिवर्ण को 'यकार' होता है। सालर्यंत्र्-अतिथिस्त्री-अतिथि की स्त्री। प्वहर्यंत्र्-गृहागता-घर आई। रंगर्यंत्र्-रजकस्त्री-धोबी की स्त्री। स्वनर्यंत्र्-स्वर्णकारस्त्री-सुनार की स्त्री। दाँदर्यंत्र्-शाकविक्रेत्री-शाक बेचने वाली। काँदर्यंत्र्-आपूपिकी-......। स्वञ्यत्र्-पुत्रश्वश्रूः- बेटे की सास। महार्यंत्र्-महाराजस्त्री-महाराज की स्त्री। राज्यर्यंत्र्-राजस्त्री-राजा की स्त्री।

पण्डितगुजरयोरा ॥ ३१ ॥

आभ्यां शब्दाभ्यां प्रत्ययादिवर्णस्य अप्रसिद्ध आकारो भवति। पंडितात्र्। पण्डितस्त्री। गुजरात्र्। जाबालस्त्री।

'पण्डित' और 'गुजर' शब्दों से प्रत्ययादि वर्ण को अप्रसिद्ध 'आकार' होता है। पण्डितात्र्-पण्डितस्त्री-पण्डितानी। गुजरात्र्-जाबालस्त्री-गुजरी।

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
स्त्रीप्रत्ययप्रक्रिया समाप्ता ॥ ६ ॥

अथाख्यातप्रक्रियायाम् ॥७॥

धातुपाठः ॥१॥

धातवोऽन्योन्यसांकर्यात्कथ्यन्ते दोषसंज्ञया ।
ते दोषज्ञेन शोध्यन्ते सांकर्याच्च विकीर्णनात् ॥ १॥
तथा गिरं प्रणम्यादौ शारदाक्षेत्रधातवः ।
संकीर्णाश्चविकीर्णाश्च ग्रथ्यन्ते यत्नतो मया ॥ २ ॥

तत्र येषां धातूनामतीतकाले केवलं कर्मप्रयोगाः केवलं भावप्रयोगा एव संपद्यन्ते तेषां संकेतो यथा (अक) (अभा) । शेषा धातवोऽतीतकालेऽपि कर्तृप्रयोगिनो भवन्ति ।

वहां जिन धातुओं का अतीत काल में केवल कर्म में प्रयोग, केवल भाव में प्रयोग ही हुआ करता है, उनका संकेत जैसे—(अक) (अभा) । बाकी धातुएं अतीतकाल में भी कर्ता में प्रयुक्त हुआ करती हैं ।

धातुपाठः

अकाराद्याः

	धातुः	अर्थः	हिन्दी
	अच	प्रवेशे	प्रवेश में
	अछ	दौर्बल्ये	दुर्बलता में
	अड	नैर्बल्येऽभियोगे च	निर्बलता और अभियोग में
	अदर	आर्द्रीभवने	गीला होने में
अक	अद्राव्	आर्द्रीकरणे	गीला करने में
अक	अन, आन इति केचित्	आनयने	लाने में
अक	अन्ज़्र	समापने	समापन में
अक	अन्ज़्राव	च	और
	अन्द	अवसाने	अवसान में
अक	अवस,	वेष्टने	वेष्टन में
	अबसाव	च	और

अक	कतर	मेधाविर्भावे	मेधा के आविर्भाव में
अक	अबराव्	च	और
अक	अर्ज	अर्जने	कमाने में
अक	अर्पाव	पातने	गिराने में
	अल	अध्रुवीभावे	अनिश्चय भाव में
अक	अलर	चेष्टादाने कम्पने च	चेष्टा देने और कम्पन में
अक	अलराव	च	और
अक	अस	हसने	हंसने में
अक	अहल	मानने	मानने में

आकाराद्याः

अक	आछन	परिचयने	चुनने में
अक	आज़्र	तत्परतायाम्	तत्परता में
अक	आँट्र	कोपाद्विचारणे	गुस्से से विचार करने में
अक	आड्र	मिश्रणे पिण्डीकरणे	मिलने में और पिण्ड बनाने में
	आडराव्	च	और
अक	आपर	हस्तेन परमुखार्पणे	हाथ से दूसरे के मुख में देने में
अक	आपराव	च	और
	आमन	वैवर्ण्ये	रंग के बिगड़ने में
अक	आयव	सम्य...	...
अक	आरद	आराधने	आराधना में
अक	आरव	परुषीकरणे	कठोर करने में
अक	आलव	ऊर्ध्वभ्रामणे नौकापरिवर्तने च	ऊपर घुमाने में और नौका परिवर्तन में
अक	आवर	व्यापने आवरणे च	व्यापन में और ढकने में
अक	आवराव	च	और
	आवस	विशरणे	विशरण में
	आस	सत्तायाम्	सत्ता में

इकाराद्याः

अक इछ	इच्छायाम्	इच्छा में

ईकाराद्याः

ईर	ऊर्ध्वभ्रमणे	ऊपर भ्रमण में

ककाराद्याः

अक कड	निष्कासने	निकालने में
अक कत	यन्त्रवेष्टने	यन्त्र के वेष्टन में
अक कतर	कृन्तने	काटने में
अक कन्ज	पक्षिभर्जने	पक्षिभर्जन में
अभा कन्ज़्र	निर्द्रव्यीभवने	द्रव्यरहित होने में
अभा कन्ज़राव	च	और
अक कपट	कृन्तने	काटने में
अक कपटाव	च	और
अक कमव	अर्जने	कमाने में
अक कमनाव	च	और
अक कर	करणे	करने में
कल	मूकीभावे	चुप हो जाने में
अभा कश	कण्डूयने	खुज़लाने में
अक कस	तैलादिपचने	तैल आदि के पकने में
कह्र	पारुष्ये	कठोरता में
काच्चर	पिङ्गलीभवने	पीला होने में
अक काँछ	काङ्क्षायाम्	काङ्क्षा में
अक काँट	अप्रत्यक्षहरणे	पीठ पीछे हरण करने में
काठ	कर्कशीभावे	कठोर होने में
कान	काणीभवने पराभवे च	काणा होने में और तिरस्कार में
काम्प	कम्पने	कांपने में
अक काय	आलस्ये	आलस्य में
कायर	निःसारीभावे	निःसार होने में
अक कार	क्वथने	कढ़ने में
कावर्	श्यामीभवने	काला होने में

अक	कास	मुण्डनोपनयनयोः	मुण्डन और उपनयन में
	क्यन्न	क्लेदने	क्लिन्न होने में
	कुठ	वृत्तिसंकोचे	वृत्ति के संकोच में
	कुप	कोपे	क्रोध में
	क्वब	कुब्जीभवने	कुबड़ा होने में
	कुमल	कोमलीभवने	कोमल होने में
अक	कुह	निष्कर्षे	निष्कर्ष में
अक	कूर	निष्कर्षमूलशिथिलीकरणयोः	निष्कर्ष और मूल के शिथिल करने में
	कूर	क्रूरत्वे	क्रूरता में
	कृट, क्रट	कार्श्ये	कृशता में
अक	कृप	कर्तने	काटने में
	कृह्न	कृष्णीभवने	काला होने में
अक	कोंकव	गुणप्रशंसायाम्	गुण प्रशंसा में
	कोल	लौहित्ये	लाल रंग में
	क्त्र	आर्द्रीभवने	गीला होने में
अक	क्चव	आर्द्रीकरणे	गीला करने में
अक	क्न	विक्रीणने	बेचने में
अक	क्राव	करणे	करने में
	क्रेट	कार्कश्ये	कर्कशता में
अभा	क्रेश	गृध्नुतायाम्	गृध्नुता में

खकाराद्याः

अक	खट	गोपने	छिपाने में
अक	खण्ड्र	विभाजने	विभाग करने में
अक	खण्ड्राव	च	और
अक	खन	अवदारणे	अवदारण में
अभा	खप	व्यभिचारे	व्यभिचार में
अभा	खम	उच्छ्वासनिःश्वासे	सांस-निःश्वास में
	खर	अप्रीतौ	अप्रीति में
	खल	विस्तारे	विस्तार में
अक	(खर च)	(व्ययीकरणे)	खर्च करने में

	खस	आरोहे	आरोह में
अक	खह	चित्रीकरणे	चित्रित करने में
अक	खार	आरोहणे	चढ़ने में
अक	खि	खादने	खाने में
अभा	खिष्क	दम्भगतौ	दम्भगति में
	खखर	निःसारतायाम्	निःसारता में
अक	खखलाव	वस्तुनो जलावगाहने	वस्तु के जलावगाहन में
अक	खुत	अधः खनने	नीचे खोदने में
अक	खून्ज़्	तनूरुहकर्षणे	वृक्ष के खींचने में
	खोच	भये	भय में
	खोर	भये	भय में
	खोल	उद्घाटने	खोलने में
अक	ख्स	तनूरुहकर्षणे	वृक्ष के खींचने में

गकाराद्याः

	गछ्	गतौ युक्तीभवने च	गति में और युक्तीभवन में
अक	गण्ड	ग्रन्थे	ग्रन्थ में
	(गन)	(घनीभवने)	घना होने में
अक	गन्ज़्र	संख्याने	संख्यान में (गिनती)
अक	गन्ज़्राव	च	और
अक	गर	घट्टने	घट्टन में
	गर्म	घर्मीभवने	गर्म होने में
	गल	नाशे	नाश में
	गाँगल	परैश्चाञ्चल्ये	दूसरों से चञ्चलता करने पर
	ग्राँगल	च	और
अक	गार	प्रसादे अन्वेषणे च	प्रसाद में और खोज में
अक	गाल	नाशने	नाश में
अक	गिन्द	क्रीडायां	खेल में
	ग्यमट्	कृशीभवने	कृश होने में
अक	गिलव	अपहरणे भ्रामणे च	अपहरण और घुमाने में

अक ग्यव	गीतौ	गीति में
गीर	भ्रमणे	घूमने में
अभा गुज़राव	उपेक्षायाम्	उपेक्षा में
अभा गुन्द	उपालम्भे	उलाहने में
अक गुप	गोपने	छिपाने में
ग्वब	गौरवे	गौरव में
गुमन	धूसरे (धूसरतायाम्)	धूसरता में
गुरट	गौरे (गौरतायाम्)	गौरता में
अक गुलव	मुखलाडने	मुख लाडन में
चमक	दीप्तौ	दीप्ति में
अक ···	आवरणे	आवरण में
गेल	वियोगे (उपहासे च)	वियोग में और उपहास में
अक गोर	विलापे	विलाप करने में
गोवर	निद्राहतत्वे	निद्राभङ्ग होने में
ग्रक	चाञ्चल्यपाकातिशययोः	चञ्चलता और अधिक पकाने में
अभा ग्रज	गर्जने	गर्जना में
अक,भा ग्राश्र	ग्रहणे वृष्टिबन्धे च	ग्रहण में और वृष्टि बांधने में
अक,भा ग्राश्राव	च	और
ग्वच	पात्रस्थजलादिचेष्टायाम्	पात्र में स्थित जल आदि चेष्टा में
अक ग्ह	घर्षणे	घिसने में

चकाराद्याः

अक चताव	स्तुतौ	स्तुति में
चमक	दीप्तौ	चमकने में
अक चार	बलाद्बन्धने	जबरदस्ती बांधने में
अक चाव	पायने	पिलाने में
अक चि	पाने	पीने में
अक चीर	निष्पीडने	पीड़न करने अर्थ में

अक	चुकाव	मूल्यनिश्चयीकरणे	मूल्य निश्चित करने में
अभा	चुम	दीनतायाम्	दीनता में
	चौंखर	संकोचने	संकोच करने में

छकाराद्याः

अक	छक	कीर्णने	कीर्णन में
अक	छक्र	अवकीर्णने	अवकीर्णन में
अक	छक्राव	च	और
अक	छच्राव	श्वेतीकरणे	सफ़ेद करने में
	छत	श्वैत्यें	सफेदी में
	छन	पाते	गिराने में
अक	छप	वृष्टिकालयोः क्षेपे	वृष्टि और काल विताने में
अभा	छर	पुरीषोत्सर्गे	शौच करने में
अक	छल	क्षालने	धोने में
अक	छान	उत्पवने शातने च	उत्पवन और शातन में
अक	छाँट	क्रोधाद्गुह्याविष्करणे	क्रोध से गुह्य बात प्रकट करने में
अक	छाव	उपभोगे क्षेपणे च	उपभोग और फैंकने में
अभा	छिक	सेचने प्रमेहने च	सींचने और प्रमेहन में
अक	छिन्द्र	मोहने	मोहित करने में
	छिव	मदे	मद में
अक	छिव्राव	मादने	मस्ती पैदा करने में
	छ्वकल	संघट्टाभावे	संघट्ट (समूह) न होने में
अक	छ्वकव	जलावगाहने	जल में स्नान करने में
अक	छ्वञ्र	ऊनी करणे	ऊनीकरण में
अक	छ्वञ्राव	च	और
	छ्वन्न	अपचये	घटने में
अक	छ्वप्र	व्ययीकरणे	खर्च करने में
अक	छ्वप्राव	च	और
अक	छ्वम्ब	कर्णमर्दने	कान मसलने में
अक	छेर	अधिक्षेपे	अधिक्षेप में
अक	छोर	त्यागे	त्याग में

जकाराद्याः

अभा जख	सेवायाम्	सेवा में
अक जर	उट्टङ्कने	उट्टङ्कना करने में
अभा जूर	उपसेवायाम्	उपसेवा में

अप्रसिद्धचकाराद्याः

अक चट	छेदने	काटने में
चम	अल्पीभवने संगते च	थोड़ा होने में और इकट्ठा होने में
चमठ	पर्युषितत्वे	बासा होने में
चर	उपचये	वृद्धि में
चर	अन्तः कोपे(स्त्री भा)	भीतरी गुस्सा में
अक चर्च	चारक्रियायाम्	चारक्रिया में
चल	चलने	चलने में
अभा चस	अतिहासे	अति हंसने में
अक चान	प्रवेशने	प्रवेश करने में
अक चाप	अदने	खाने में
अक चार	चयने	चुनने में
अक चाल	सहने	सहन करने में
अभा च्यखल	सोत्प्राशे	सोत्प्राश में
अभा च्यङ्ग	हर्षे	हर्ष में
अभा च्यत्र	उपेक्षयेव प्रेक्षणे	उपेक्षा से ही देखने में
अक च्यल्ल	वलात्प्रवेशने (वलात्प्रवेशेनान्यस्य पीडने)	जबरदस्ती प्रवेश करने में (वलपूर्वक प्रवेश से दूसरे के तंग करने में)
अक चीअ्र	संज्ञापने	संज्ञापन में
अक चीअ्राव	च	और
च्वक्	क्रोधेऽम्लीभवने च	क्रोध में और खट्टा होने में
अकभा च्वक्र	कोपने	गुस्सा करने में
अकभा च्वक्राव	च	और
अक च्वग्नाव	चतुर्गुणीकरणे	चौगुना करने में
च्वच	वृत्तिसंकोचे	वृत्ति के संकोच में

अक च्वम्ब	वेधने	बींधने में
अक च्वम्राव	अल्पीकरणे संगतीकरणे च	थोड़ा करने में और इकट्ठा करने में
अकभा चुव	कलहे	झगड़ा करने में
अभा चूंट	अध: शब्दे (अपान शब्दे)	अधोवायु शब्द के साथ निकलने में
अक चूर	योन्याघाते	योनि-प्रहार में
अक चेट	कुट्टने	कूटने में
अकभा चेन	चेतने	होश में
अक च्ह	चूषे	चूसने में

अप्रसिद्धछकाराद्या:

अक छट	उत्क्षेपणे	ऊपर फेंकने में
छर	रिक्तीभवने	खाली होने में
अ(क)छल	छलने	छल करने में
अक छाड़	अन्वेषणे	खोजने में
अक छाँड	च	और
अक छण्ड	च	और
छाँछन	लघ्वीभवने	छोटा होने में
छ्यट	अशुद्धिभवने	अशुद्धि होने में
अक छ्यट्र	अशुद्धिकरणे	अशुद्ध करने में
अक छ्यटराव	च	और
छ्यन्न	छेदे	सुराख में
छ्यव	शमे	शान्ति में
अक छ्यव्र	शामने	शान्त करने में
अक छ्यव्राव	च	और
छ्वच	नि:सारीभवने	नि:सार होने में
छ्वट	ह्रस्वीभवने	ठिगना होने में
अक छ्वटर	ह्रस्वीकरणे	छोटा करने में
अक छ्वटराव	च	और
अक छुन	पातने	गिराने में

अप्रसिद्धजकाराद्याः

अक	ज्‌जर	तक्षणे	तक्षण में
अक	जप	जपने	जप करने में
अक	जर	सहने	सहन करने में
	जल	जलवत्स्वादावगमे	जल की तरह स्वाद की प्रतीति होने में
अभा	जाग	प्रतिजागरे	प्रतिजागर में
अक	जान	अवबोधने	जानने मे
अक	जाल	दाहे	जलाने मे
	जि	जनने	पैदा करने में
	जिङ्गर	विक्ललीभवने	व्याकुल होने में
अक	जीठ्र	दीर्घीकरणे	लम्बा करने में
अक	जीठ्राव	च	और
	ज्वङ्गर	वैकल्ये	व्याकुलता में
	ज्वज्र	जर्जरत्वे	जीर्ण होने में
	जुव	जीवने	जीवन में
अक	जुव्र	सजीवीकरणे	सजीव करने में
अक	जुव्राव	च	और
अभा	ज्वस्	कासे	खांसी में
	जेठ	आयतीभवने	चौड़ा होने में
अक	जेन	जये	जय में
	जोत	दीप्तौ	चमकने में
अक	जोवर	उत्पादने	पैदा करने म
अक	जोव्राव	च	और
अक	ज्‌ख	सहने	सहन करने में
अक	जल्	तक्षणे	तक्षण में

टकाराद्याः

अक	टक	शब्दवद्दन्तैश्छेदने	शब्द के साथ दान्तों से काटने में
अभा	टप	परोक्षपरिभाषणे	पीठ पीछे बात करने में
	टल	परिवर्ते	परिवर्त में

अभा	टाँग	घोरवाशिते	घोरवाशित में
अभा	टाल	उपेक्षागमने	उपेक्षा से जाने में
	ट्यठ	तिक्तीभवने	तीखा होने में
अक	ट्यप	संघट्टे	समूह में
	ट्यम्ब	लोपे	लोप में
अक	टुक	आखुवच्छेदने	चूहे की तरह काटने में
शक	ट्वकव	कूटाघाते	कपट से प्रहार करने में
	ट्वट	वृत्तिसंकोचे	वृत्ति के संकोच में
अक	टुव	संकोचने	संकोच करने में
	टोठ	प्रसादे	प्रसाद में
अभा	ट्क	धावने	दौड़ने में
अक	ट्स	अन्तर्नयने	भीतर ले जाने में
अक	ट्सन	च	और

ठकाराद्याः

	ठग	छलने	छलने में
अक	ठगाव	शाठ्ये	शठता में
	ठहर	संस्थाने	ठहरने में
अक	ठाक	उत्खनने (निरोधने)	खोदने में (रोकने में)
अक	ठास	उत्खनने	खोदने में
	ठीक	स्थितौ	स्थिति में
अक	ठुक	उत्खनने	खोदने में

डकाराद्याः

अक	डक	शब्दवत्पाने	शब्द के साथ पीने में
अक	डखव	दण्डवदाधारीकरणे	दण्ड की तरह बनाने म
अक	डख्र	आधारीकरणे	आधार बनाने में
अक	डख्राव	च	और
	डर	भये	भय में
	डल	उल्लङ्घने	उल्लङ्घन में
अकभा	डाँट	विद्वेषे	विद्वेष में
अक	डाल	परिवर्तने	परिवर्तन में
	ड्यल	शैथिल्ये	शिथिलता में
	ड्वक	देहानार्जवे	देहानार्जव में

	डुब	मज्जने	डूबने में
अक	डुलनाव	गोलवद्भ्रामणे	गोले की तरह घुमाने में
अक	डुलव	च	और
अक	डुव	संमार्जने	बुहारी फेरने में
	ड्वस	देहानार्जवे	देहानार्जव में
अक	डेष	प्रेक्षणे	देखने में
	डोल	अपरिचयने	नहीं चुनने में
	ड्वल, इत्यपरे	,,	,,

तकाराद्याः

	तग	तज्ज्ञतायाम्	तज्ज्ञता में
	तङ्ग	संकोचे	संकोच में
अक	तच्र	तापने	तपाने में
अक	तच्राव	च	और
अभाक	तछ	तक्षणे	तक्षण में
अक	तञ़र	विरलीकरणे	विरला करने में
अक	तञराव	च	और
	तत	तप्तीभवने	गर्म होने में
	तन	विरलीभवने	विरला होने में
अक	तप	औष्ण्योपादाने	गर्मी लेने में
	तम्बल	चाञ्चल्ये	चञ्चलता में
	तर	तरणे	तैरने में
अक	तल	स्नेहपाके	तैल-घी के भीतर पकाने में
अक	तव	भर्जने	भूनने में
अक	ताड	कोपाद्विचारणे	गुस्सा से विचार करने में
अक	तार	तारणे	तारने में
अक	ताल	उत्थापने	उठाने में
अक	ताव	तापने	तापने में
	त्यग्ब	दृक्चाञ्चल्ये	नेत्रों की चञ्चलता में
अक	तीज़्र	निशाने	निशान में
अक	तीज़्राव	च	और

	तीलन	स्निग्धपूतीभावे	तल-घी आदि में पवित्र होने में
	तुन्द	तीक्ष्णीभवने	तेज़ होने में
अक	त्वम्ब	तूलवद्विवरणे	तूलवत् विवरण में
अक	तुल	उत्थापने	उठाने में
	तूर	शीतीभवने	ठण्डा होने में
	तूरण	च	और
	तेज़	तीक्ष्णीभवने	तेज़ होने में
	तेल	विस्फोटादिदंशे	विस्फोट आदि दंश में
अक	तोल	तुलने	तोलने में
अक	तोवर	क्रूरदृष्टौ	क्रूरदृष्टि में
अक	तोवराव	च	और
	तोष	तोषे	सन्तोष में
	त्रकर	कर्कशीभवने	कर्कश होने में
अक	त्रकराव	कर्कशीकरणे	कठोर करने में
अक	त्रग्नाव	त्रिगुणीकरणे	तीन गुना करने में
	त्रच्	भये	भय में
अक	त्रच्राव	त्रासने	डरने में
अक	त्राव	त्यागे	त्याग में
अक	त्रुक	कणशश्छेदने भक्षणे च	कणशश्छेदन और भक्षण में
अक	त्र्वप्र	आच्छादने	ढकने में
अक	त्र्वम्ब	सूचीघाते	सुई से सुराख़ करने में
अक	त्र्वम्बव	च	और
	त्र्वश	कठिनीभवने	कठिन होने में
अक	त्र्वश्राव	कठिनीकरणे	कठिन करने में
	त्रोर	विस्फोटादिकार्कश्ये	विस्फोद आदि कार्कश्य में

थकाराद्याः

	थक	श्रमे	थकावट में
अक	थज्र	उच्चैः करणे	...
अक	थज्राव	च	और
	थद	उन्नतीभवने	ऊँचा होने में

	थम	अवष्टम्भे	ठहराने में
	थर	कम्पने	कांपने में
अक	थल	शाखाच्छेदने	टहनी काटने में
अक	थव	स्थापने	स्थापित करने में
अक	थाव, इति केचित्	"	"
	थाँथर	(सभयं) त्वरायाम्	(डर के साथ) जल्दी में
सकभा	थ्यक	श्लाघायाम्	श्लाघा में
अभा	थिप	ताडने	मारने में
अभा	थ्वक	निष्ठीवने	थूकने में
अक	थुर	घटने	घटने में

दकाराद्याः

अक	दग	घातने	मारने में
	दज़	भस्मीभवने	राख होने में
अक	दद्राव	क्षीणीकरणे	क्षीण करने में
अक	दप	आज्ञायां कथने च	आज्ञा में और कहने में
अभा	दबव	भूमिक्षेपे	भूमि पर फेंकने में
अभा	दम	वाताग्निशब्दयोः	वायु और आग के शब्द में
	दर	स्थैर्याविस्मृति-वर्षनिरोधेषु	स्थैर्याविस्मृति वर्ष निरोधों में
अक	दर॑	स्थिरीकरणे	स्थिर करने में
अक	दल	विदारेण	फाड़ने में
अभा	दव	शीघ्रगतौ	शीघ्रगति में
अक	दस	घातने	मारने में
अक	दाऽर	ध्याने	ध्यान में
अक	दाऽराव	च	और
अक	दार	धारणोद्धारयोः	धारण और उद्धार में
अक	दाव	दाप ने	दिलाने में
अक	दि	दाने	देने में
अक	द्वगव	अवखण्डने	अवखण्डन में
अक	द्वग्नाव	द्विगुणीकरणे	दुगुना करने में
	द्वदर	जीर्णीभवने।	जीर्ण होने में

अक द्वदराव	जीर्णीकरणे	जीर्ण करने में
अक द्वब्र	भूमिक्षेपे	जमीन पर फेंकनेमें
अक द्वब्राव	च	और
अक द्वय	दोहने	दोहने में
द्वष	च्यवने	च्यवन में
अक दून्छर	पृथक्पृथक्करणे	अलग अलग करने में
अक दून्छ्राव	च	और
दूर	दूरीभवने	दूर होने में
अक दोन	पिचुवद्विवरणे	पिचुवत् विवरण में
दोर	गतिचातुर्ये	गति की चतुराई में
अक द्न	वस्त्रादिरजोपहरणे	वस्त्र आदि रजोपहरण म
अक द्नव	च	और
अभा द्य	वैमनस्ये	वैमनस्य में
अभा द्वक	क्रीडायाम्	खेल में
द्वग	मूल्यातिशये	अधिक कीमत में
अक द्वग्राव	दुर्मूल्यीकरणे	खराब कीमत डालने में
द्रें ठ	कार्कश्ये	कर्कशता में
अक द्षाव	दोषदाने	दोष देने में

नकाराद्याः

अभा नच्	नर्तने	नाचने में
अक नग्र्	नग्नीकरणे	नंगा करने में
अक नग्राव	च	और
नट	कम्पे	कांपने में
अक नट्राव	कम्पने	काँपने में
नन	नग्नीभवने	नंगा होने में
अभा नप	उत्कोचदाने (उत्कोच-ग्रहणे)	रिश्वत देने (लेने) में
नम	नम्रीभवने	नम्र होने में
नव	अतिशयीभवने नूतनतायां च	अधिक होने में और नूतनता में
नश	अदर्शने	दर्शन न होने में

अक	नहाव	क्रियाघाते	क्रियाघात में
	नाँठ	निष्फलीभवने	निष्फल होने में
	नाँप	दीप्तौ	चमकने में
अक	नाव	शोधने	शोधन में
अक	नाश्‌र	नाशने	नाश में
अक	नाश्‌राव	च	और
अक	नि	हरणे	हरण करने में
	निक	अल्पीभवने	थोड़ा होने में
अक	निक्‌र	खण्डशःकरणे	टुकड़े करने में
अक	निक्‌राव	च	और
अक	न्यङ्गल	निगरणे	निगलने में
अक	न्यत	पशुरोमकृन्तने	पशु के बाल काटने में
अक	न्यवाज़	निवेदने	निवेदन में
	नील	हरितीभवने	हरा होने में
अक	न्वम्‌र	नम्रीकरणे	नम्र करने में
अक	न्वम्‌राव	च	और
अक	न्वव्‌र	अतिशयीकरणे	अधिक करने में
अक	न्वव्‌राव	च	और
अक	नेछ्व	ख्यातीकरणे	प्रसिद्धि करने में
	नेर	निर्गमने	निकलने में
अक	नोम्‌र	संक्षेपीकरणे	संक्षेप करने में
अक	नोम्‌राव	च	और
अक	न्याव	हरणे	हरण में

पकाराद्याः

	पक	गतौ	जाने में
	पच्	ऋणविश्वासे	ऋणविश्वास में
अकभा	पछ्ताव	पश्चातापे	पश्चाताप में
अक	पछान	उपलक्षणे	उपलक्षण में
	पज़	युक्तीभवने सत्याविर्भावे च	युक्त होने में और सत्य के आविर्भाव में

अक	पज़्र	आवेष्ट्य सीचने	बेंठन देकर सींचने में
अक	पज़्राव	च	और
अक	पज़्र	सत्याविष्करणे	सत्य के प्रकट करने में
अक	पज़्राव	च	और
	पट	प्राप्तौ	प्राप्ति में
अभा	पटाव	गतौ	गति में
	पठ	सिद्ध्याम्	सिद्धि में
अक	पठ्र	संस्कारे मीनादिशोधने च	संस्कार में और मछली आदि के साफ करने में
अक	पठ्राव	संस्करणे साधने च	संस्करण और साधन में
अभा	पद	कुत्सिते शब्दे	कुत्सित शब्द में
	पप	परिणामे	परिणाम में
अक	पय	धात्वादिपाके	धातु आदि के पकाने में
अक	पर	पठने	पढ़ने में
अक	परखोव	परीक्षायाम्	परीक्षा में
अक	पर्ज़न	उपलक्षणे	उपलक्षण में
अक	पर्ज़नाव	च	और
अक	पल	गुप्तदाने	गुप्त दान में
	पलज़	उपसेवायाम्	उपसेवा में
	पलट	द्रवीभवने	पिघलने में
अभा	पश	विषादे	विषाद में
	पष्प	क्षरणे	खरने में
	पाकन	विस्फोटादिपाके	फोड़ा आदि पकाने में
अक	पाकव	पचने	पकने में
अक	पाज़	निःसारणे	निकालने में
	पाथ	सद्भावे	सद्भाव में
	पार	केशवेणीकरणे पणस्थापने च	केशों की चोटी बाँधने में और पणस्थापन में
अक	पाल	रक्षणे	रक्षा करने में
अक	पाव	पातने	गिराने में
अभा	पास्र	धिक्करणे	धिक्कार करने में

अक	पास्राव	च	और
	पि	पतने	गिरने में
अभा	पिट	परिदेवने	रोने में
अक	पिट्राव	दीनीकरणे	दीनता पैदा करने में
अक	प्यतर	पालने	पालन करने में
	प्यद	वृत्तज्ञतायाम्	वृत्तज्ञता में
	पिल	प्राप्तौ	प्राप्ति में
अक	पिलन	प्रापरो	प्राप्त करने में
अक	पिलनाव	च	और
अभा	प्यव	पाकार्थमग्न्यारम्भे	पकाने के लिए आग के आरम्भ में
	पिशल	पेशलीभवने	पेशलीभवन में
	पिस	पाकेन बहिर्निःसरणे	पाक से बाहिर निकलने में
अक	पिह	संचूर्णन	संचूर्णन में
	पीट	खेदात्समीक्षणे	खेदपूर्वक देखने में
अभा	पीठ्र	सशिक्षं प्रतिक्षेपणे	सशिज्ञ प्रतिक्षेपण में
अभा	पीठ्राव	च	और
अक	पीनव	प्रसावने	प्रसावन में
	पीर	मेदुरतायाम्	मेदुरता में
अक	पुच़न	पुष्पादिखण्डशः करणे	पुष्प आदि के टुकड़े २ करने में
	पुन	शापसाफल्ये	शाप की सफलता में
अभा	प्वन्द	क्षुते	क्षुत में
	प्लव	नैर्बल्ये	निर्बलता में
अक	पुश्र	अर्पणे	अर्पण करने में
अक	पुश्राव	च	और
अक	पूज़	पूजायाम्	पूजा में
अक	पूठ्र	स्थूलीकरणे	मोटा करने में
अक	पूठ्राव	च	और
अक	पूर	पूरणे	भरने में
	पेड़	निर्यासे	निर्यास में

	पोठ	स्थूलीभवने	मोटा होने में
	पोर	पर्याप्त्यनार्द्रतयोः	पर्याप्ति एवं अनार्द्रता में
अभा	पोर व	बाधने	रुकावट में
	पोष	पर्याप्ततायाम्	पर्याप्तता में
	प्रख़्ट	प्रकटने	प्रकट करने में
अक	प्रज़न	उपलक्षणे	उपलक्षण में
अक	प्रज़नाव	च	और
	प्रज़ल	प्रज्वलने	प्रज्वलन में
	प्रन	नैर्मल्ये	निर्मलता में
	प्रय	प्रीणने	प्रीति में
	प्रस	प्रसवे	प्रसव में
अक	प्राट	खनने	खोदने में
	प्राण	पुराणीभवने	पुराना होने में
	प्रार	समीक्षणे	समीक्षा करने में
अक	प्राव	प्राप्तौ	प्राप्ति में
अक	प्रिछ	पृच्छायाम्	पूछने में
अक	प्रिण	उपालम्भे	उलाहने में
अक	प्रिन्ज़	प्रेरणे	प्रेरणा करने में

फकाराद्याः

अक	फक	सक्त्वादिभक्षणे (दारिद्र्याविष्कारे च)	सत्तू आदि के खाने में और दरिद्रता के आविष्कार में
	फट	काष्ठभेदाङ्कुरोद्भेदयोर्जलनिमज्जनादिषु च	काष्ठभेद और अङ्कुर फूटने एवं जल में निमज्जन आदि करने में
	फब	प्रशस्तीभवने	प्रशंसा होने में
	फर	स्तेये	चोरी में
अक	फर्काव	अर्थोपसर्जने	अर्थोपसर्जन में
	फल	वस्त्रजीर्णनसाफल्यविभागयोश्च	वस्त्रजीर्णन एवं साफल्य विभाग में
	फस	बद्धीभवने	बंधे होने में

अक	फस्र	बद्धीकरणे	बांधने में
	फह्‌र	पारुष्ये	कठोरता में
अभा	फाँग	शिशुमार्जाररोदने	बिल्ले के बच्चे के रोने में
अक	फान	निःशेषीकरणे	निःशेषीकरण में
	फाँफल	क्रियायोग्यीभवने	क्रियायोग्यीभवन में
अक	फालव	काष्ठभेदने	लकड़ी तोड़ने में
अक	फास्र	बद्धीकरणे	बांधने में
अक	फास्राव	च	और
	फिच	विस्मरणे	भूलने में
अक	फ्यचव	अप्रत्यक्षहरणे	पीठ पीछे हरण में
अक	फिर	पुस्तककथाभाण्डानां परिवर्तने	पुस्तक-कथा-भाण्ड आदि के परिवर्तन में
अक	फिख	भ्रामणे	घुमाने में
अक	फ्यश	ओष्ठादिलेहने	होंठ आदि के चाटने में
अक	फुक	अङ्गारप्रदीपने	अंगारों के प्रदीप्त करने में
अक	फुकार	कोपालापे	क्रोध की बातचीत में
	फुट	भङ्गे	टूटने में
अक	फुट्र	भञ्जने	तोड़ने में
	फुट्राव	च	और
	फ्वल्ल	विकसने	विकसित होने में
	फुश (फ्वश्)	अन्तः कोपे (स्त्री भा)	भीतरी क्रोध में
	फुह	च	और
अक	फूंक	आघ्राणे	सूंघने में
	फेर	भ्रमणविस्त्रीभवन-पश्चातापवैलोम्येषु	भ्रमणविस्त्रीभवनपश्चाताप वैलोम्य में
अक	फेश	ओष्ठादिलेहने	होंठ आदि के चाटने में
	फोर	स्फुरणे	फड़कने में
अक	फ्यार	रसनिष्कासने	रस निकालने में
अभा	फ़क	उच्छ्वासनिःश्वासयोः	उच्छ्वास-निःश्वास में

बकाराद्याः

अकभा	बक	भाषणे	बोलने में
अक	बगार	अक्षणे	अक्षण में
	वच	अनाहततायाम्	अनाहतता में
अक	वचराव	भयादिरक्षणे	भय आदि से रक्षा करने में
अक	बज	सेवायां स्नेहने च	सेवा में और स्नेह करने में
	बड	गतिवृद्धचोः	गति और वृद्धि में
अक	बडाव	गतिशमनयोः	गति और शान्त करने में
अक	बड्र	वर्धने	बढ़ाने में
अक	बड्राव	च	और
अक	बद्राव	पूपाङ्गारपाके	पूपाङ्गारपाक में
	बन	भवने	भवन में
अक	बन्ज़्र	विभाजने	विभाग करने में
अक	बन्ज़्राव	च	और
अकभा	बर	पूरणे वियोगदैन्ये च	भरने में और विरह की दीनता में
अक	बर्काव	पातने	गिराने में
	बल	आरोग्ये प्राणने च	आरोग्य में और प्राण-सञ्चार में
अक	बल्र	आरोग्यीकरणे	आरोग्य करने में
अक	बल्राव	च	और
	बस	निवासे	निवास में
	बसन	पीतीभवने	पीला होने में
	बहर	शूरतायाम्	शूरता में
	बाखन	बुद्धिभ्रंशे	बुद्धि भ्रष्ट होने में
अक	बाग्र	विभाजने	विभाग करने में
अक	बाग्राव	च	और
अक	बाज़्र	च	और
अक	बाज़्राव	च	और
	बाद (वाद)	प्रबलीभवने	प्रबल होने में
	बाँबर	त्वरायाम्	उतावलेपन में

अक	बाव	अभिप्रायाविष्करणे देवार्पणे च	अभिप्राय प्रकट करने में और देवता के अर्पण करने में
	बावज़	रोचने	अच्छा लगने में
अक	बाप	उच्चारणे	उच्चारण करने में
	बास	भासने	चमकने में
	बिगर	विकारे	विकार में
अक	ब्यत्र्‌र	विवरणे भिन्नीकरणे च	विवरण में और अलग करने में
अक	ब्यत्र्‌राव	च	और
	ब्यन्न	भिन्नीभवने	अलग होने में
	बिय	पर्युषितत्वे	बासा होने में
	ब्यह	उपवेशने	बैठने में
अक	बुछ	दंशक्रियायाम्	डसने की क्रिया में
अक	बुज़	भर्जने	भूनने में
	ब्वड	निमज्जने	डूबने में
	बुड	स्थविरीभवने	बूढ़ा होने में
	ब्वव	उत्पत्तौ	उत्पत्ति में
अक	बूग	भोगे	भोग में
अभा	बेछ	भिक्षायाम्	भिक्षा में
अक	बोज़	निशामने	सुनाने में
अक	बोल	पक्षिशब्दे	पक्षी के शब्द में
अक	ब्रक	दंष्ट्राघातकोपयोः	दान्त की चोट और क्रोध में
	ब्रज़	दीप्तौ	चमकने में
	ब्रम	भ्रान्तौ	वहम में
अक	ब्रम्‌र	बुद्धिहरणे	बुद्धि के हरने में
अक	ब्रम्‌राव	च	और
अक	ब्रश	दंष्ट्राघातकोपयोः	दान्त की चोट और क्रोध में
अक	ब्रिछ	परिदेवने	रोने में
	ब्रेठ	मूर्खीभवने	मूर्ख होने में

मकाराद्या:

अक मङ्ग	याचने	मांगने में
अक मच्राव	उन्मादने	पागलपन में
अक मठार	समीकरणे सान्त्वने च	अच्छा करने में और तसल्ली देने में
अक मण्ड	वस्त्रमर्दनालंकरणयो:	वस्त्र मसलने और सजाने में
मत	उन्मादे	पागलपन में
अक मथ	मर्दने	मसलने में
अक मनव	कोपापनयने	गुस्सा दूर करने में
अक मन्ज़र्	विकलीकरणे	व्याकुल करने में
अक मन्ज़राव	च	और
अक मन्द	मन्थने	मथने में
मन्दछ	मन्दाक्षे	कमज़ोर नज़र में
ममल	निश्चैतन्ये	जड़ में
अक मर	मरणसंधापनयो:	मरण और संधापन में
मर्च	अन्त: कोपे	भीतरी गुस्से में
अक मर्दाव	विस्फोटादिमर्दने	विस्फोट आदि के मर्दन में
अक मल	मर्दने	मसलने में
मष	विस्मृतौ	विस्मृति में
अक मष्र	विस्मारणे	भुलाने में
अक मष्राव	च	और
अक महार	कणश: करणे	कण-कण करने में
अक माज़	तत्परतायां शोधने च	तत्परता में और शोधन में
अक माँज	धातुनिर्मलीकरणे	धातु को साफ करने में
अक मार	मारणे	मारने में
अक मिलव	संयोजने	मिलाने में
अक मिलनाव	च	और
म्वकल	मुक्तौ	मुक्ति में
म्वच्	अवशेषे	अवशिष्ट में
अक मुचर	उद्घाटने	उद्घाटन में
अक मुचराव	च	और

अक मुछ	व्रतादित्यागे	व्रत आदि के त्याग में
म्वट	स्थूलीभवने	मोटा होने में
अक म्वट्र	स्थूलीकरणे	मोटा करने में
अक म्वट्राव	च	और
म्वण्ड	कुण्ठीभवने	कुण्ठित होने में
अक म्वण्ड्र	कुण्ठीकरणे	कुण्ठित करने में
अक म्वड्राव	च	और
म्वद्र	मधुरीभवने	मधुर होने में
अक म्वद्राव	मधुरीकरणे	मधुर करने में
अक मुन	धान्यखण्डने	धान तोड़ने में
अक म्वलव	मूल्यनिश्चयीकरणे	मूल्य निश्चित करने में
अक मुष	मोषणे	मोषण में
अक मुस	असम्यग्भक्षणे	अच्छी तरह न खाने में
अक मुसर	उद्घाटने	उद्घाटन में
अक मुसराव	च	और
अक मुह	मोहने	मोहन में
अभा मून्छ्र	समीक्षणे	समीक्षा करने में
अभा मून्छराव	च	और
अक मूंत्र	मन्त्रायत्ती (करणे) भवने	मन्त्र के अधीन होने वा करने में
अक मूर	त्वचो निष्कर्षे भक्षणे च	त्वचा के निष्कर्ष में और खाने में
मेठ	मधुरी भवने	मधुर होने में
अक मेन	मापने	मापने में
मेल	संगमे	संगम में
मोर	शमे	शान्ति में
अक मोरव	पीड़ासहने	पीड़ा सहन करने में

यकाराद्याः

अक यतर	शक्तौ	शक्ति में
अक यत्राव	च	और
याप	व्याप्तौ	व्याप्ति में

अक	यार	संख्याने	गिनती में
	यि	आगमने	आने में
अक	येर	तन्तुसंताने	तन्तुओं के समूह में

रकाराद्याः

अक	रङ्ग	रञ्जने	रंगने में
अक	रछ	रक्षायाम्	रक्षा में
अक	रछ्र	सम्यक्संस्करणे	अच्छी तरह संस्कार करने में
अक	रछ्राव	च	और
अक	रट	ग्रहणे	ग्रहण करने में
अक	रन	पाके	पकाने में
	रन्ज़	प्रीतौ रागे च	प्रीति और अनुराग में
अक	रन्ज़नाव	प्रीणने	प्रसन्न करने में
अक	रन्ज़व	च	और
	रम्ब	शोभायाम्	शोभा में
	रस	सरसीभवने	सरस होने में
	राव	नष्टीभवने	नष्ट होने में
अक	रावर	नष्टीकरणे	नष्ट करने में
अक	रावराव	च	और
अभा	रिन्ज़व	छद्मगतौ	कपट की चाल में
अभा	रिव	अलंकरणतत्परतायाम्	अलंकरण तत्परता में
अक	रुव	रोपणे	लगाने में
	रोच	रोचने	अच्छा लगने में
	रोज़	स्थितौ	स्थिति में
	रोट	अवष्टम्भे	अवष्टम्भ में
	रोष	रुष्टौ	क्रोध में
अक	र्‌कव	भूसंगानयने	भूसंगानयन में
	र्‌ड	रूढीभवने	रूढि होने में
	र्‌त	साध्वीभवने	साधु होने में
	र्‌ण	जीर्णीभवने	जीर्ण होने में
अभा	र्‌स	गमने	जाने में

लकाराद्याः

अक	लख	अन्तर्नयने	भीतरी नेत्र में
	लग	सङ्गे पीडायां सामञ्जस्ये च	सङ्ग में, पीडा में और सामञ्जस्य में
अभा	लङ्ग	पङ्गवीभवने	लंगड़ा होने में
	लज्ञ	योग्यतायाम्	योग्यता में
अभा	लटाव	गमने	जाने में
अभा	लड	युद्धे	युद्ध में
अक	लडाव	संप्रहारणे	प्रहार करने में
अक	लतव	लताघाते	लताप्रहार में
अक	लतार	अधिक्षेपे	अधिक्षेप में
अक	लद	वस्तुप्रेषणे गृहादि निर्माणोर्ध्वान्तरीकरणयोः सूत्रादि कर्मणि च	वस्तु भेजने में गृह आदि निर्माण आदि ऊर्ध्वान्तरी करने में और सूत्रादि कर्म में.
अक	लव	प्राप्तौ	प्राप्ति में
अक	लम	आकर्षणे	आकर्षण में
	लय	अर्घणे	अर्घण में
अक	ललव	अङ्कपालने	अङ्कपालन में
	लस	सम्यग्जीवने	अच्छी तरह जीने में
	लहन	नाडीशिथिलीभवने	नाडी के ढीला होने में
अक	लाग	अनुकरणधारण-कृषिसंपर्चनेषु	अनुकरण-धारण एवं कृषिसंपर्चन में
अक	लाय	आघाते प्रक्षेपे च	आघात और प्रक्षेप में
अक	लार	स्पर्शानुगमन-स्निग्धीकरणेषु	स्पर्श-अनुगमन एवं स्निग्धीकरण में
अक	लिख	लेखने	लिखने में
	ल्यच	निर्बलीभवने	निर्बल होने में
	ल्यड	पराजयीभवने	पराजयी होने में
अक	लिथव	मर्दने	मसलने में
	ल्यद्र	पीतीभवने	पीला होने में
अक	ल्यद्राव	पीतीकरणे	पीला करने में

अक	लिव	लेपने	लेप करने में
अक	ल्यव	लेहने	चाटने में
	लिस	प्रसन्नतायाम्	प्रसन्नता में
	ल्वत	लाघवे	हल्का होने में
अभा	ल्वल	उपक्रीडायाम्	उपक्रीडा में
अक	लूक्राव	क्षुद्रीकरणे	क्षुद्रीकरण में
अक	लूट	लुण्ठने	लूटने में
	लूब	लोभने	लालच करने में
अक	लूर	विनष्टीकरणे निपातने च	नष्ट करने और गिराने में
अक	लेख	लेखने	लिखने में
	लोक	क्षुद्रीभवने	क्षुद्र होने में
अक	लोन, ल्वन, इति केचित्	लवणे	नमक में
	लोर	वैकल्ये	घबराहट में
	लोस	श्रमे	थकावट में
	ल्य	सम्यक्पर्याप्तौ	अच्छी तरह पर्याप्ति में
	ल्ह	च	और
	ल्हन	पाकविकारे	पकाने के विकार में

वकाराद्याः

अक	वखन	व्याख्याने	व्याख्यान में
अभा	वज्र	वाद्यस्वने	बाज़े की आवाज़ में
अक	वज़व	सार्द्रीकरणे	गीला करने में
अक	वट	वेष्टने	बेठने में
अक	वड्र	निक्षेपे	फेंकने में
अक	वड्राव	च	और
अक	वथर	आस्तरणे	बिछाने में
अक	वथराव	च	और
अभा	वद	रोदने	रोने में
अक	वन	भाषणे	भाषण करने में
अक	वनव	स्त्रीणामेकस्वनगाने	स्त्रियों के एक स्वर से गाने में

अक	वन्द	उपहारे	भट देने में
	वय	पथ्यीभवने	पथ्य लेने में
अक	वर	वरणे	वरण में
अक	वल	आच्छादने	ढकने में
अक	वव	वापने	वापन में
अक	वष	वर्षणे	वर्षा होने में
	वस	अवरोहणे	अवरोह में
अक	वहार	विस्तारणे मक्षिकाद्यपवारणे च	विस्तार करने में और मक्खी आदि के हटाने में
अक	वहाराव	च	और
अभा	वाँच	वञ्चने	ठगने में
अक	वाट	संघापने	संघापन में
	वात	प्रापणे	प्राप्त करने में
अक	वाम	मक्षिकाद्यपवारणे	मक्खी आदि के हटाने में
अक	वाल	अवतारणेवृष्टिपाते च	उतारने में और वर्षा होने में
	विगल	विगलने	विगलन में
अक	विचार	विचारे	विचार में
	व्यच	संभवे	संभव होने में,
अक	व्यछन	विवरणे	विवरण में
अक	व्यज्र	ज्ञातीकरणे	ज्ञातीकरण में
अक	व्यज्राव	च	और
अक	व्यञ्र	पृथक्पृथक्करणे	अलग-अलग करने में
अक	व्यञ्राव	च	और
	व्यठ	स्थूलीभवने	मोटा होने में
अक	व्यठ्र	स्थूलीकरणे	मोटा करने में
अक	व्यठ्राव	च	और
	व्यद्र	शैथिल्ये	शिथिलता में
अक	व्यद्राव	शिथिलीकरणे	शिथिल करने में
अक	व्यन्द	आचरणे	आचरण में
	व्यप	संभवे	संभव होने में

अक	व्यप्र	संभावने	संभावना में
अक	व्यप्राव	च	और
	व्यलर	अस्वास्थ्ये	अस्वस्थता में
अक	व्यव	विकीर्णने	बिखेरने में
अक	व्यव्र	च	और
अक	व्यव्राव	च	और
	व्वतल	ऊर्ध्वीभवने	ऊपर होने में
	व्वथ	उत्थाने	उठाने में
अक	व्यथर	अवमार्जने	बुहारने में
अक	व्यथराव	च	और
	वुद	जागरणे	जागरण में
	वुदर	वियोगखेदे	वियोग के दुःख में
	वुन	दैवानार्जवे	दैवानार्जव में
	व्वन्नत	उन्नतीभावे	उन्नत होने में
	वुप	अन्तर्दाहे	भीतरीजलन में
	व्वपज़	उत्पत्तौ	उत्पत्ति में
	वुफ	विहायसागतौ	पक्षी की चाल में
अक	व्वफर	शैथिल्ये	शिथिलता में
	व्वबर	समाप्तौ	समाप्ति में
	व्वबस	वहुलीभवने	बहुत होने में
	व्वम	सीमानधिगमे	सीमा के प्राप्त न होने में
	वुय	पर्याप्तौ	पर्याप्ति में
अक	वुर	उम्भपटप्रच्छादन-निपातनेषु	उम्भपटप्रच्छादन एवं निपातन में
अक	व्वलङ्ग	उल्लंघने	उल्लंघन में
	व्यसर	विशीर्णने	विशीर्णन में
	विस	प्रसन्नीभवने	प्रसन्न होने में
	व्वक	दोषादिचेष्टायाम्	दोष आदि की चेष्टा में
	वुक्र	वक्रीभवने	टेढा होने में
अक	वुक्राव	वक्रीकरणे	टेढा करने में
अक	व्वखर	ऊर्ध्वाधरीकरणे	ऊपर-नीचे करने में
अक	व्वखराव	च	और
	(व्वगन	उत्तानीभवने)	ऊपर होने में

अक	वुग्राव	ऋणप्रतिग्रहणे	कर्जा लेने में
अक	वुङ्ग	श्वरवे	कुत्ते की आवाज़ में
	वुच	दग्धीभवने	जलने में
अक	वुछ	प्रेक्षणे	देखने में
	वुज	जागरणे जलादिव्य-क्तीभवने च	जागरण और जलादि व्यक्त होने में
	व्वजल	रक्तीभवने	लाल होने में
	व्वट	प्लवगतौ	प्लव गति में
अक	वुठ	वेष्टने	वेठने में
	वड	उड्डयने	उडने में
अक	वुडाव	नाशने चालने	नाश करने में और चलाने में
	व्वनल	अलंकरणे	सजाने में
	व्वलस	उल्लसने	उल्लसित होने में
	व्वशल	लौहित्ये	लाल रंग में
	वुष्ण	उष्णीभवने	गर्म होने में
	व्वस	वाहुल्ये	वहुलता में
अक	वुसर	उद्घाटने	उद्घाटन में
अक	वुसराव	च	और
	वुह	अनिर्वाणे	अनिर्वाण में
अभा	व्वहव	शापे	शाप में
अक	वोन	तन्तुवायकर्मणि	जुलाहे के कार्य्य में
अभा	वोर	भाषणे विस्मृत्यालापे च	बोलने एवं विस्मृति के भीतर आलाप करने में
	वोल	चञ्चलीभवने	चञ्चल होने में
अक	वोव्र	धातूनां तक्षणे	धातुओं के काटने में
अक	वोव्राव	च	और

शकाराद्याः

अक	शश्नाव	षड्गुणीकरणे	छः गुना करने में
	शम	उपशमे	शान्ति में

अकभा शष	सहने	सहन करने में
शहल	शीतिभवने	ठण्डा होने में
अभा शाश	उच्छ्वासनिःश्वासे	उच्छ्वास-निःश्वास में
(शिग्न्	परेर्ष्यादाने)	दूसरे से ईर्ष्या करने में
शिठ	शीनीभवने	शीनी होने में
श्रिठ	च	और
श्वङ्ग	शयने	सोने में
श्वद्ध	शोधने	शोधन में
शूब	शोभायाम्	शोभा में
अक शूब्र	शोभने	अच्छा लगने में
अक शूब्राव	च	और
अकभा शेंक	शङ्कायाम्	शङ्का में
अक शेर	संस्करणे	संस्करण में
श्रप	जीर्णने	जीर्ण होने में
अभा श्र्वक	क्रन्दने	चीखने में
अक श्रुत	शब्दवत्पाने	शब्द के साथ पीने में
श्रोच	शुद्धौ	शुद्धि में

सकाराद्याः

सखर	प्रस्थाने	प्रस्थान करने में
अक सगव	वृक्षादिसिञ्चने	वृक्ष आदि के सींचने में
अक सगनाव	च	और
अक सग्र	अगाधीकरणे	गहरा करने में
अक सग्राव	च	और
अभा सताव	बाधने	बाधा डालने में
सन	अगाधीभवने	गहरा होने में
अक सन्ज़्र	सज्जीकरणे	तय्यार करने में
अक सन्दर	संधुक्षणं	जलने में
अक सन्दराव	च	और
अक सन्दार	प्राणस्वास्थ्ये	प्राणों की स्वस्थता में
सपज़	सिद्धौ	सिद्धि में
सपद	च	और

	सपन	च	और
	सम	साम्ये	समता में
	समख	समक्षीभवने	सामने होने में
अक	संवाल	संस्करणे	संस्करण में
अक	सर	स्मरणे	याद में
अकभा	सह्	सहने	सहन करने में
	साँगर	विशरणे	विशरण में
अक	साद	संराद्धौ	संराद्धि में
अक	सार	स्वारैकत्रीभवनक्रमानयनेषु	स्वारैकत्रीभवनक्रमानयनों में
अक	साव	शायने	सुलाने में
अक	स्यज्र	ऋज्वीकरणे	सीधा करने में
अक	स्यज्राव	च	और
अक	स्यत्राव	अदृढीकरणे	दृढ न करने में
	स्यद	सिद्ध्यृज्वीभवनयोः	सिद्धि और सीधा होने में
	स्यन्द्र	अरुणीभवने	लाल होने में
	स्यन्त	अकर्कशीभवने	कठोर न होने में
अक	सिव	सेवने पाकविशेषे च	सेवन में और पाक विशेष में
	सीर	भ्रमणे	भ्रमण में
अक	सुक	व्यभिचारे (अन्तरावेशने)	व्यभिचार में
अक	स्वखव	मृडने	मृडन में
अक	स्वखनाव	च	और
	स्वग	मूल्याल्पतायाम्	कम कीमत में
अक	स्वग्राव	सुमूल्यीकरणे	अच्छा मूल्य करने में
अक	स्वच्राव	शामने	शान्त करने में
	स्वत	शमने	शान्त होने में
अक	स्वम्ब्र	समीकरणैकत्रीकरणयोः	उचित और इकट्ठा करने में
अक	स्वर	स्मरणे	याद में

अक	सुख	भाजनभस्मशुद्धौ	पात्रों को शुद्ध करने वाली भस्म में
अक	स्वर्श	हस्तादिशुद्धौ	हाथ आदि की शुद्धि में
अक	सुलव	अङ्कपालने	गोदी में पालने अर्थ में
अक	सुव	सूचीकर्मणि	सुई के कार्य में
	स्वसर	काष्ठादिजीर्णने	काठ आदि के जीर्ण होने में
अक	सोज़	प्राणिप्रेषणे	प्राणी के भेजने में
	सोर	अवसाने	समाप्ति में
अकभा	स्त	संघने	संघन में
स्रव		क्षरणे	क्षरण में
स्वगराव		सुमूल्यीकरणे	अच्छा मूल्य करने में
अभा	सूस	अपानवायौ	अपान वायु में

हकाराद्याः

	हकर	कार्कश्ये	कर्कशता में
अभा	हग हट	पुरीषोत्सर्गे	शौच करने में
		क्षीणीकरणे	क्षीण करने में
अक	हट्र	क्षीणीकरणे	क्षीण करने में
अक	हट्राव	च	और
	हन्द्र	शीतीभवने	ठण्डा होने में
अक	हन्द्राव	शीतीकरणे	ठण्डा करने में
	हप	कार्श्ये	कृश होने में
	हम	शमने	शान्त होने में
	हर	क्षरणपतनयोः	क्षरण और पतन में
	हल	वक्रतायाम्	वक्रता में
अक	हहर	विवाहकर्मणि	विवाहकार्य में
	हाँकल	शीतसंकोचने	सर्दी से सुकड़ने में
	हाँठ	नैष्फल्ये	निष्फलता में
अक	हाँठ्राव	निष्फलीकरणे	निष्फल करने में
	हान	शैत्ये	सर्दी में
	हामन	शीतलापाके (श्यामीभवने)	शीतला के पकने में (श्याम होने में

अकभा	हार	पराजयनिपातयोः	पराजय और निपात में
अक	हाव	दर्शने	दर्शन में
अक	हि	ग्रहणक्रीणनधारणेषु	लेना, खरीदना और धारण-करने में
अक	ह्यक	शक्तौ	शक्ति में
अक	ह्यछ	शिक्षायाम्	शिक्षा में
अभा	ह्यड	परिभाषणे	परिभाषण में
	हिल	प्रवलीभवने	प्रवल होने में
	ह्वख	शोषे	सूखने में
अक	ह्वख्र्	शोषणे	शोषण करने में
अक	ह्वख्राव	च	और
	ह्वच	विस्त्रीभवने	विस्त्री होने में
अक	ह्वच्राव	विस्त्रीकरणे	विस्त्रीकरण में
अक	ह्वब्र	पराजयने	पराजित करने में
अक	ह्वब्राव	च	और
अक	हुम	होमे	हवन में
अक	ह्वम्र	शामने	शान्त करने में
अक	ह्वम्राव	च	और
	होन	उत्कटीभवने	उत्कट होने में
अक	होर	प्रतिदाने	प्रतिदान में
	ह्न	शोथे	शोथ में
	ह्र	उपचये	वृद्धि में
	ह्न	प्रसवारम्भे	प्रसव के शुरू में
अक	ह्सव	श्वादिसूचनायाम्	कुत्ते आदि की सूचना में
अक	ह्सनाव	च	और

इति श्री शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते धातुपाठ-प्रक्रिया समाप्ता ॥ ७१ ॥

अथ परिशिष्टनामधातवो लिख्यन्ते ॥२॥

अग्य-लगुन्	अग्नाविव रिप्वादिषु संमुखीभवनम्	आग की तरह शत्रु आदि में सामने होना
अगादि-गछुन्	निष्कारणं क्रोधाविष्कारः	विना कारण क्रोध का आविष्कार
खख्‌र्-दिञ्	जन्तुनो भूमौ भ्रामणम्	जन्तु का भूमि पर घुमाना
छित-करुन्	तिरस्करणम्	तिरस्कार करना
जीरू-दिञ्	क्रोधाविष्काराय प्रेरणम्	क्रोध के आविष्कार के लिए प्रेरणा
डाल-मारञ्	उपेक्षाकरणम्	उपेक्षा करना
ड्यम्ब्‌ड्यम्ब् करून्	अन्तः सुषिरस्य शब्दानुकरणम्	अन्तः सुषिर के शब्द का अनुकरण
तो्थ्-करञ्	अहंकारपूर्वकं भर्त्सनम्	अहंकार पूर्वक डाँटना
दाम्-च्युन्	स्तन्यवत्पानम्	स्तनों के दूध की तरह पीना
दारिथ्-च्युन्	प्रपातनम्	गिराना (झरना)
निन-युन्	अनवधानता	असावधानता
न्यूरु्-युन्	समीपागमनम्	नज़दीक आना
पाय्-करुन्	उपायकरणम्	उपाय करना
फूह्-करुन्	कोपपूर्वकं चोदनम्	क्रोध से प्ररित
फश्-च्युन्	विनष्टीकरणम्	नाश करना
वर्-गछुन्	अनादरेण रोषणम्	अनादर के साथ गुस्सा करना
मान्मान्-करञ्	स्पर्धाकरणम्	स्पर्धा करना
रथि-खारुन्	सफलीकरणम्	सफल करना
वनु-च्युन्	स्मृतिपूर्वकमन्वेषणम्	याद से ढूंढना

वस्य-प्यनु	हृदयंगमीभवनम्	हृदयंगम होना
वोडाल-करुन्	उपेक्षाकरणम्	उपेक्षा करना
सर-करुन्	निर्णयीकरणम्	निर्णय करना
स्वर-करुन्	ईषच्चेष्टाकरणम्	थोड़ी चेष्टा करना
ह्‌क-युन्	शीघ्रागमनम्	जल्दी आना

(अन्येऽपि यथायोग्यं बोध्या: ।)

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते-धातुप्रक्रियाया: परिशिष्टे नामधातव: समाप्ता: ॥ ७२ ॥

अथाख्यातप्रक्रियायाम् ॥ ८ ॥

वर्तमानपादः ॥ १ ॥

अथ शब्दो मङ्गलार्थः ।

कालत्रयतद्विशेषक्रियाकर्मकर्त्रवबोधकृदाख्यातः ॥ १ ॥

कालत्रयस्य भूतभविष्यद्वर्तमानरूपस्य तद्विशेषाणां विध्यादीनां क्रियाकर्मणोः कर्मकर्तरि तथा विभक्तिस्वरूपेष्वप्रयुक्ततच्छब्दादिकर्तृषु क्रियाकर्त्रोश्चावबोधकृत्सम्यग्वोधकारक आख्यातो विज्ञेयः ।

भूतभविष्यवर्तमानरूप तीनों कालों की विशेष विधि आदि के क्रिया-कर्म का कर्म-कर्ता में तथा विभक्तियों के स्वरूपों में अप्रयुक्त उनके शब्द आदि कर्ताओं में क्रिया और कर्ता का ज्ञान कराने वाला अच्छी तरह ज्ञान कराने वाला 'आख्यात' जानना ।

आरब्धानारब्धसमापितक्रियाकाला वर्तमानभविष्यद्भूतसंज्ञाः ॥ २ ॥

आरब्धक्रियाकालो वर्तमानसंज्ञः । अनारब्धक्रियाकालो भविष्यत्संज्ञा । समापितक्रियाकालोऽतीतसंज्ञो भवति

आरब्धक्रियाकाल वर्तमान, अनारब्धक्रियाकाल भविष्यत् और समापित क्रियाकाल अतीत नाम से पुकारा जाता है ।

अश्रोतृश्रोतृवक्तृभेदात्प्रथममध्यमोत्तमाः ॥ ३ ॥

तेषु कालत्रयेषु तद्विशेषेषु च प्रत्येकस्मिन् अश्रोता प्रथमपुरुषः । श्रोता मध्यमपुरुषः । वक्ता उत्तमपुरुषो बोध्यः । अश्रोतेति लक्षणात्संनिधानेऽपि पुरुषे अयं करोतीति श्रोतारं वदेत्त्वमपि कुर्विति किमुतासंनिधाने इति निर्णयम् ।

उन तीनों कालों और उसके विशेषों में हर एक में 'अश्रोता' प्रथम पुरुष, 'श्रोता' मध्यम पुरुष और 'वक्ता' उत्तमपुरुष जानना चाहिए । 'अश्रोता' इस लक्षण से संनिधान भी पुरुष में 'यह करता है' यह 'श्रोता' को कहे 'तू भी कर' यह क्या नजदीक न होने पर- यह निर्णय लेना चाहिए ।

एकानेकाभ्यां द्वे द्वे वचने ॥ ४ ॥

तेषु त्रिषु पुरुषेषु प्रत्येकस्मिन्नेकवचनबहुबचनभेदाद्द्वेद्वे वचने भवतः। सुह् छुह् परान्। सः पठति। तिम् छिह् परान्। तौ पठतः वा ते पठन्ति।

उन तीनों पुरुषों में हर एक में एक वचन-वहुवचन भेद से दो वचन होते हैं। सुह् छुह् परान्-सः पठति-वह पढ़ता है। तिम् छिह् परान्-तौ पठतः-वे दो पढ़ते हैं वा ते पठन्ति-वे पढ़ते हैं।

युगपदुक्तौ वाचकासन्नो मुख्यः ॥ ५ ॥

द्वयोस्त्रयाणां वा पुरुषाणां युगपत्क्रियाया उक्तौ सत्यां वाचकासन्नः पुरुष एव मुख्यो विज्ञेयः। तद्यथा तच्छब्दयुष्मच्छब्दयोर्युगपद्वचने वाच्ये वाचकासन्नो युष्मच्छब्द एव मुख्यः संमुखत्वात्। एवं युष्मच्छब्दास्मच्छब्दयोर्युगपद्वचने वाच्ये वाचकस्यात्मैवासन्नतरः। अतस्तत्रास्मच्छब्दस्य मुख्यत्वम्। एवं तच्छब्दास्मच्छब्दयोस्त्रयाणामप्यवधार्यः। सुह् त च्ह् परिव्। स च त्वं पठतम्। च्ह् त ब्वह् परव्। त्वं चाहं पठाव। सुह् त ब्वह् परव्। स चाहं पठाव। सुह त च्ह् त ब्वह् परव्। स च त्वं चाहं पठाम।

दोनों वा तीनों पुरुषों की एक साथ क्रिया की उक्ति में वाचक के नजदीक का पुरुष ही मुख्य जानना चाहिए। सो जैसे 'तत्' शब्द और 'युष्मद्' शब्द के एक साथ कहने पर वाच्य में वाचक के नजदोक का 'युष्मद्' शब्द ही मुख्य है-संमुख होने से। इसी प्रकार 'युष्मद्' शब्द और 'अस्मद्' शब्द के एक साथ कहने पर वाच्य में वाचक की आत्मा ही नजदीकतर है। इस लिए वहां 'अस्मद्' शब्द की मुख्यता है। इसी तरह 'तत्' शब्द और 'अस्मद्' तथा तीनों को ही समझ लेना चाहिए। सुह् त च्ह् परिव-स च त्वं पठतम्-वह और तूं पढ़ो। च्ह् त ब्वह् परव्-त्वं चाहं पठाव। तूं और में पढ़ूं। सुह् त च्ह् त ब्वह् परव्-स च त्वं चाहं पठाम-वह और तूं और में पढ़ूं।

धातोः परे प्रत्ययाः ॥ ६ ॥

कालत्रयसंबन्धिविभक्तिप्रत्यया धातोः परे भवन्तीति परिभाष्यते। परान् छुह्। पठति। परुन्। अपठत्। परि। पठिष्यति।

तीनों कालों से सम्बद्ध विभक्ति-प्रत्यय धातु से परे होते हैं, ऐसा कहा जाता है। परान् छुह्-पठति-पढ़ता है। परुन्-अपठत्-पढ़ा। परि-पठिष्यति-पढ़ेगा।

तद्दा त्वारब्धे वर्तमाना ॥ ७ ॥

तत्काले आरब्धे कर्मणि धातोर्वर्तमाना विभक्तिर्भवति। पकान् छुह। गच्छति। परान् छुह। पठति।

उस समय शुरु किए कार्य में धातु से वर्तमान विभक्ति होती है। पकान् छुह्-गच्छति-जाता है। परान् छुह्-पठति-पढ़ता है।

नैर्यन्तरारब्धे च ॥ ८ ॥

यस्याः क्रियायाः कदाचिदपि उच्छित्तिर्न स्यात्तत्कर्म निरन्तरारब्धम् तस्मिन्नपि वर्तमाना विभक्तिर्भवति। ईश्वर जगतस् रछान् छुह्। ईश्वरो जगद्रक्षति। पान पानस् रछान् छुह्। आत्म (ना)-त्मानं पालयति।

जिस क्रिया की कभी भी उच्छित्ति न हो, वह कर्म निरन्तर शुरु हो, उसमें भो वर्तमान विभक्ति होती है। ईश्वर जगतस् रछान् छुह्-ईश्वरो जगद्रक्षति-ईश्वर संसार की रक्षा करता है। पान पानस् रछान् छुह्-आत्मनात्मानं पालयति-अपने से अपने को पालता है।

नियमारब्धे च ॥ ९ ॥

प्रतिकुम्भं गङ्गायाः स्नानं करिष्यामीत्यादिनियमेन या या क्रिया आरब्धा स्यात्तस्यां वाच्यायां सत्यां तत्र वर्तमाना विभक्तिर्भवति। व्याकरण् परान् छुह् लवकटु। व्याकरणमधीते बालः। गंगाय गछान् छुह्-प्रथ् कुम्बस्। गङ्गां गच्छति प्रतिकुम्भम्।

हर कुम्भ में गङ्गा का स्नान करूंगा, इस नियम से जो जो क्रिया शुरू की जाए, उसके वाच्य होने पर वहां वर्तमान विभक्ति होती है। व्याकरण् परान् छुह् लवकटु-व्याकरणमधीते बालः-बालक व्याकरण पढ़ता है। गंगाय गछान् छुह् प्रथ् कुम्बस्-गङ्गां गच्छति प्रतिकुम्भम्-हर कुम्भ में गङ्गा जाता है।

अनेककार्यवित्कर्तृसत्तायां तत्तत्क्रिया धातुभ्यश्च ॥ १० ॥

एकाधिककार्यज्ञस्य कर्तुः सत्तायां देहपाताभावे सति तत्संबन्धिषु कर्मस्वभिधेयेषु सत्सु धातुभ्यो वर्तमाना विभक्तिर्भवति। एककार्यज्ञस्य तु नियमारम्भतो वर्तमानाप्राप्तिरासीदिति। क्याह् छुह् मुचं,

करान् । किं मूर्तीः कुर्वन्नस्ति क्याह् छुह् जान् लेखान्। किं साधु लिखन्नस्ति क्याह् छुह् रतु ग्यवान् । किं साधु गायन्नस्ति । कथनसमकालमेव यदि प्रोक्तक्रियाविदो देहपातः स्यात् तदातीतावाप्तिर्भवेन्न तु वर्तमानाप्राप्तिरित्यादिविशेषा बुद्धिमद्भिः स्वयमूह्याः। किं च वर्तमानस्य केवलं न संप्रतिकालीनक्रियातो वर्तमानसंज्ञास्ति किन्तु वर्तमानकर्तृसत्वे एव प्रायशो वर्तमानसंज्ञास्तीति ।

एक से अधिक कार्य को जानने वाले कर्ता की सत्ता में देहपाताभाव होने पर उससे सम्बद्ध कर्म अभिधेय होने पर धातुओं से वर्तमान विभक्ति होती है। एक कार्य जानने वाले का तो नियमारम्भ से वर्तमान की प्राप्ति नहीं थी । क्याह् छुह् मुर्च् करान्-क्या मूर्तियों को कर रहा है—किं मूर्तीः कुर्वन्नस्ति । क्याह छुह् जान् लेखान्-किं साधु लिखन्नस्ति-क्या अच्छा लिख रहा है। क्याह् छुह् रतु ग्यवान्-किं साधु गायन्नस्ति-क्या अच्छा गा रहा है। कहने के साथ ही यदि उक्त क्रिया जानने वाले का देहपात हो जाए, तब अतीत की प्राप्ति हो, न कि वर्तमान की प्राप्ति, यह विशेष बुद्धिमान् पुरुषों को स्वयं समझ लेना चाहिए। वर्तमान की न केवल संप्रतिकालीन क्रिया से वर्तमान संज्ञा है, किन्तु वर्तृमानकर्तृसत्व में ही प्रायशः वर्तमान संज्ञा है ।

वर्तमानायां छुह् छिह् छुख् छिव् छुस् छिह् पुंसि ।। ११ ।।

छ्यह् छ्यह् छ्यख् छ्यव छ्यस् छ्यह् स्त्रियाम् ।। १२ ।।

पुंकर्तरि यथा । करान् छुह् । सः करोति । करान् छिह् । ते कुर्वन्ति । करान् छुख् । त्वं करोषि । करान् छिव् । यूयंकुरुथ । करान् छुस् । अहं करोमि । करान् छिह् । वयं कुर्मः । स्त्रीलिङ्गे यथा । करान् छ्यह् । सा करोति । करान् छ्यह् । ताः कुर्वन्ति । करान् छ्यख् । त्वं करोषि स्त्री० । करान् छ्यव । यूयं कुरुथ स्त्री करान् छ्यस् । अहं करोमि स्त्री० ।

करान् छ्यह् । वयं कुर्मः स्त्री० । कर करणे । छुह् आदयः प्रत्ययाः । धातोरानागमः (सू. १९) इति आम् । व्यञ्जनं परेण संधेयम् (सू० १/३) ।

पुंल्लिङ्ग कर्ता में जैसे-करान् छुह्-सः करोति-वह करता है। करान् छिह्-ते कुर्वन्ति-वे करते हैं। करान् छुख्-त्वंकरोषि-तूं करता है। करान् छिव-यूयं कुरुथ-तुम सब करते हो। करान् छुस्-अहं करोमि-मैं करता हूं। करान् छिह् वयं कुर्मः--हम करते हैं। स्त्रीलिङ्ग में जैसे-करान् छ्यह्-सा करोति- वह करती है। करान् छ्यह्-ताःकुर्वन्ति-वे करती हैं। करान् छ्यख्-त्वं करोषि स्त्री०-तूं करती है। करान् छ्यव यूयं कुरुथ स्त्री०--तुम सब करती हो। करान् छ्यस्-अहं करोमि स्त्री०--मैं करती हूं। करान् छ्यह्-वयं कुर्मः स्त्री०--हम सब करती हैं 'कर' करने अर्थ में, 'छुह्' आदि प्रत्यय हैं। धातोराननागमः (सू-१९) से 'आन्' प्रत्यय। व्यञ्जन अपने से परे के साथ मिला देना चाहिए (सू-१।३)।

क्रियाऽभावे नपराः ॥ १३ ॥

क्रियाया अभावे अभिधेये सति ते प्रत्यया नपरा नकारः परो येभ्यस्तथा स्युः। करान् छुन। न करोति। करान् छिन। न कुर्वन्ति। करान् छ्यन। सा न करोति। करान् छ्यख्न। त्वं न करोषि। कर करणे। छुह् प्रत्ययस्तस्मान्न प्रत्ययः। धातोरानागमः (सू०-१९)। प्रत्ययेषु हलोपः सर्वत्र (सू-४।१३१) इति हकारलोपः। एवं सर्वेषाम्।

क्रिया के अभाव अभिधेय होने पर वे प्रत्यय-नकार परे है जिन से, वैसे हों। करान् छुन-न करोति-नहीं करता है। करान् छिन-न कुर्वन्ति-नहीं करते हैं। करान् छ्यन्-सा न करोति-वह नहीं करती है। करान् छ्यख्न-त्वं न करोषि-तूं नहीं करता है। 'कर' करने अर्थ में। 'छुह्' प्रत्यय, उस से 'न' प्रत्यय। धातोरानागमः (सू०-१९)। प्रत्ययेषु हलोपः सर्वत्र (सू०४।१३१) से 'हकार' का लोप। इस तरह सभी के।

कामप्रवेदने आपराः ॥ १४ ॥

क्रियायाः कामप्रवेदने सति विभक्तिप्रत्यया आपरा आकारः परो येभ्यस्तथा स्युः। क्रियाभावस्य कामप्रवेदने सति न प्रत्यय आपरो भवति। करान् छ्वा। स किं नु करोति। करान् छ्या। सा किं नु करोति। कर करणे। छुह् छ्ह् प्रत्ययौ आपरौ। प्रत्ययेषु हलोपः सर्वत्र (सू४।१३१) इति ह लोपः। धातोरानागमः

(सू-१९) । छु इत्यस्य उकारो वः (सू०१।५) व्यञ्जनं परेण संधेयम् । (सू१/३) । एवं करान् छुना । किं न करोति । करान् छ्यना । सा किं न करोति । अत एव निर्देशाद्यथा नकारान्तस्याऽऽप्रत्ययः स्यात्तथा तिप्रत्ययान्तस्यापि बोध्यः (सू०४।-१७९) । करान् छुत्या । अपि किं करोषि । कर्यौन् त्या । अपि किं चकार । करित्या । अपि किं करिष्यति ।

क्रिया के कामप्रवेदन होने पर विभक्तिप्रत्यय 'आकार' परे है जिस से, वैसे हों । क्रियाभाव के कामप्रवेदन होने पर 'आ' परे होने पर 'न' प्रत्यय होता है । करान् छ्वा—स किं नु करोति-वह क्या करता है । करान् छ्या—सा किं नु करोति—वह क्या करती है । 'कर' करने में । छुह्—छ्यह् प्रत्यय 'आ' परे रहते । प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) से 'ह' का लोप । धातोरानागमः (सू० १९) । छु इत्यस्य उकारो वः (सू० १।११) इससे 'व' करने पर । दूसरी जगह—स्वरः सवर्ण दीर्घपरलोपौ (सू० १।५) व्यञ्जनं परेण सन्धे-यम् (सू० १।३) । इस तरह—करान् छुना—कि न करोति—क्या नहीं करता है । करान् छ्यना—सा किं न करोति—वह क्या नहीं करती है । इस लिए ही निर्देश से जैसे नकारान्त को प्रत्यय न हो, वैसे ति प्रत्ययान्त के लिए भी जानना । (सू० ४।१७९) करान् छुत्या-अपि किं करोति-क्या करता है । कर्यौन् त्या-अपि किं चकार-क्या किया । करित्या-अपि किं करिष्यति-क्या करेगा ।

मध्यमैकत्वादित्रये ऽपरा वा ॥ १५ ॥

कामप्रवेदने सति मध्यमैकत्वानेकत्वयोरुत्तमैकत्वे च अपरा अकारः परो येभ्यस्तथा वा विकल्पेन स्युः । न क्रियाभावकामप्रवेदने नकारस्य स्वयमकारान्तत्वात् । किं चादरवत्सु संबोधनप्रत्ययेषु चायमेव मुख्यः । प्रथमस्तु । आ प्रत्ययः कनिष्ठनीचयोः (सू० २।२।७) इति लिङ्गप्रकरणोक्तसूत्रेण तयोरेवावगन्तव्यः । करान् छुख । वा । करान् छुखा । किं त्वं करोषि । करान् छिव । वा । करान् छिवा । किं यूयं कुरुथ । करान् छुस । वा । करान् छुसा । किमहं करोमि । साधनं पूर्ववत् ।

कामप्रवेदन होने पर मध्यम पुरुष के एक वचन और वहुवचन में तथा उत्तम पुरुष के एक वचन में 'अकार' परे है जिससे, वैसे

'वा' विकल्प से हो। क्रियाभावकामप्रवेदन में 'नकार' के स्वयं अकारान्त होने से नहीं। आदर वाले संबोधनप्रत्ययों में यह ही मुख्य है। पहले तो-'आ प्रत्ययः कनिष्ठनीचयोः (सू० २।२।७) यह लिङ्ग-प्रकरण में कहे गए सूत्र से उन दोनों में ही जानना। करान् छुख-वा-करान् छुखा-किं त्वं करोषि-तू क्या करता है। करान् छिव-वा-करान् छिवा-किं यूयं कुरुथ-तुम सब क्या करते हो। करान् छुस-वा- करान् छुसा-किमहं करोमि-मैं क्या करता हूं। साधन पहले की तरह।

अपरा अय्परा वा स्त्रियां मध्यमे ॥ १६ ॥

स्त्रियाः सकाशात्कामप्रवेदने कर्तव्ये मध्यमपुरुषे प्रत्यया अकार-परा अय्परा वा भवन्ति। अत्रापि अय् प्रत्ययः। कनिष्ठनीचयोः (सू० २।२।७) इत्यर्थे लिङ्गप्रकरणोक्तसूत्रानुसारतो बोध्यः। करान् छ्यख्। वा। करान् छचखय्। किं त्वं करोषि स्त्री०। करान् छचव। वा। करान् छचवय्। किं यूयं कुरुथ स्त्रियः। करान् छचख्ना। वा। करान् छचख्नय्-किं त्वं न करोषि। करान् छचवना। वा। करान् छचवनय्। किं यूयं न कुरुथ।

स्त्री के पास से कामप्रवेदन करने पर मध्यमपुरुष में प्रत्यय अकार परे वा अय् परे होते हैं। यहां भी 'अय्' प्रत्यय। कनिष्ठ-नीचयोः (सू० २।२।७) इस अर्थ में लिङ्ग प्रकरण में कहे सूत्र के अनुसार जानना। करान् छचख-वा-करान् छचखय्-किं त्वं करोषि स्त्री०-तूं क्या करती है। करान् छचव-वा करान् छचवय्-किं यूयं कुरुथ स्त्रियः-तुम स्त्रियो क्या करती हो। करान् छचख्ना। वा। करान् छ्यख्नय्-किं त्वं न करोषि-तूं क्या नहीं करते हो। करान् छचवना-वा करान छचवनय्-किं यूयं न कुरुथ-तुम सब क्या नहीं करते हो।

उत्तमैकत्वे पंस्त्रियोः क्रमात् ॥ १७ ॥

पुरुषाय स्त्रिया कामप्रवेदने वाच्ये सति अकारपरो भवति। स्त्रियै स्त्रिया वाच्ये सति अय्परो भवति। करान् छचस्। किमहं करोमि। करान् छचसय्। किमहं करोमि।

पुरुष के लिए स्त्री से कामप्रवेदन वाच्य में होने पर अकार परे होता है। स्त्री के लिए स्त्री से वाच्य में होने पर 'अय्' परे होता है।

करान् छचस-किमहं करोमि-मैं क्या करता हूं। करान् छचसय्-किमहं करोमि-मैं क्या करता हूं।

वहुत्वे आ अय्पराः ॥ १८ ॥

पुरुषाय वाच्ये आपराः स्त्रिये वाच्ये अय् परा भवन्ति। प्रथम-पुरुषप्रत्यययोरुत्तमानेकत्वछ्यह् प्रत्ययेन सादृश्यात्तयोरपीत्थं विज्ञेयम्। करान् छचा स्वह। सा किं नु करोति। करान् छचा तिम। ताः किं नु कुर्वन्ति। करान् छचा असि। वयं किं नु कुर्मः। करान् छचय्। किं नु वयं कुर्मः। एवमन्ययोरपि।

पुरुष के लिए वाच्य में 'आ' परे, स्त्री के लिए वाच्य में 'अय्' परे होते हैं। प्रथमपुरुष प्रत्ययों में उत्तमपुरुष बहुवचन 'छ्यह्' प्रत्यय से समानता होने से उन दोनों में भी ऐसा जान लेना चाहिए। करान् छचा स्वह-सा किं नु करोति—वह क्या करती है। करान् छचा तिम-ताः किं नु कुर्वन्ति-वे क्या करती हैं। करान् छचा असि-वयं किं नु कुर्मः-हम क्या करते हैं। करान् छचय्—किं नु वयं कुर्मः-हम क्या करते हैं। इसी तरह दूसरों में भी।

धातोरानागमः ॥ १९ ॥

वर्तमानाया विषये धातोः पर आन् आगमो भवति। करान् छुह्। करोति। साधितमेव।

वर्तमान के विषय में धातु से परे 'आन्' आगम होता है। करान् छुह्-करोति- करता है। साधित ही है।

इकारान्ताद्वपूर्वः ॥ २० ॥

इकारान्ताद्धातोरान आगमो वकारपूर्वो भवति अर्थात् वान् आगमः स्यात्। मिषान् छुह्। हरति। दिवान् छुह्।-ददाति। यिवान् छुह्। आयाति। नि हरणे। दि दाने। यि आगमने। वर्तमानायां पुंसि छुह् प्रत्ययः। अनेन वान् आगमः। ख्यवान् छुह्-खादति। च्यवान् छुह्। पिवति। खि खादने। चि पाने। छुह् प्रत्ययः। अनेन वान् आगमः। सर्वत्राकारागमोऽनिदियिवर्जितात् (सू.८।२।११) इति सूत्रेण धातुस्वरादकारागमः। इकारो ऽसवर्णे योऽपरलोपः (सू. १।१०) इति सूत्रेण इकारस्य यत्वम्। व्यञ्जनं परेण सन्धेयम्।

इकारान्त धातु से 'आन्' आगम् वकार पूर्व होता है अर्थात् वान् आगम होता है। मिषान् छुह्-हरति-हरता है। दिवान् छुह्-ददाति-

देता है। यिवान् छुह्-आयाति-आता है। नि-हरण अर्थ में, दि-दान अर्थ में, यि-आने अर्थ में। वर्तमान पुंल्लिङ्ग में 'छुह्' प्रत्यय होता है, इससे 'वान्' का आगम हुआ। सर्वत्राकारागमोऽनिदियिवर्जितात् (सू. ८। २। ११) इस सूत्र से धातुस्वर से 'अकार' का आगम। इकारोऽसवर्णे योऽपरलोपः (सू. १।१०) इस सूत्र से 'इकार' को 'य', व्यंजन को परले से जोड दे।

आसो लोपो धातोश्च ॥ २१ ॥

आस सत्तायामित्यस्माद्धातोरान् प्रत्ययस्य लोपो भवति। आसधातोश्च लोपः स्यात्। छुह्। अस्ति। छिह्। सन्ति। इत्यादि। आस सत्तायां। वर्तमानायां छुह् प्रत्ययः। धातोरानागमः (सू. १९) अनेन लोपः आस धातोश्च।

'आस' सत्ता में, इस धातु से 'आन्' प्रत्यय का लोप होता है और 'आस' धातु का लोप होता है। छुह्-अस्ति-है। छिह्-सन्ति-हैं। इत्यादि। आस- सत्ता में। वर्तमान में 'छुह्' प्रत्यय। धातोरा-नागमः (सू.१९) इससे 'आस' धातु का लोप।

वाक्येष्वऽस्य प्रयोगो मुख्यः ॥ २२ ॥

सर्वषां वाक्यानां लालित्ये अयम् अस्त्यर्थकः छुह् प्रयोगो मुख्योऽवधार्यः। वत छुह् सुह् ख्यवान्। भक्तमस्ति सः खादन्। वत सुह् ख्यवान् छुह्। भक्तं स खादति। इति गौणः

सभी वाक्यों के लालित्य में 'यह है' इस अर्थ में 'छुह्' प्रयोग मुख्य समझना चाहिए। वत छुह् सुह् ख्यवान्-भक्तमस्ति सः खादन्-भात है वह खाता हुआ। वत सुह् ख्यवान् छुह्- भक्तं सः खादति-भात वह खाता है। यह गौण है

वाक्यारम्भपदात्परो मुख्यः ॥ २३ ॥

वाक्यारम्भस्य यदारम्भपदं स्यात्तस्मान्मुख्यः प्रयोगः प्रयोज्यः। तव पत छुह् आसनस् प्यठ् विहिथ् पूजा करान्। ततः अस्ति आसनोपरि निविश्य पूजां कुर्वन्।

वाक्यारम्भ का जब आरम्भ पद हो, उससे मुख्य प्रयोग प्रयुक्त करना चाहिए। तव पत छुह् आसनस् प्यठ् विहिथ् पूजा करान्-ततः अस्ति आसनोपरि निविश्य पूजां कुर्वन्-इसके बाद आसन पर बैठ कर पूजा कर रहा है।

वाक्यान्ते गौणः ॥ २४ ॥

गौणो वर्तमानायाः क्रियास्वरूपं वाक्यान्ते प्रयोज्यम् । तव पत आसनस् प्यठ् विहिथ् पूजा करान् छुह् । तत आसनोपरि निविश्य पूजां करोति । यद्यपि प्रथमोत्तरे वाक्ये एकार्थके स्तः परं तु वाग्लालित्ये प्रथममेव ज्यायः । किं चात्र वाक्ये स्पष्टं प्रतीयते । ईश्वर छुह् आसान् काशिय अन्दर् । ईश्वरः अस्ति भवत्-काश्याम् । एवमतीतादिषु च निश्चीयत इति ।

गौण वर्तमान क्रिया का क्रिया स्वरूप वाक्य के अन्त में प्रयुक्त करना चाहिए । तव पत आसनस् प्यठ् विहिथ् पूजा करान् छुह्-तत आसनोपरि निविश्य पूजां करोति-इसके बाद आसन पर बैठ कर पूजा करता है । यद्यपि प्रथमोत्तर वाक्य एकार्थ में हैं, परन्तु वाणी के लालित्य में पहले ही बड़ा । और इस वाक्य में स्पष्ट प्रतीत होता है । ईश्वर छुह् आसान् काशिय अन्दर-ईश्वरः अस्ति भवत्-काश्याम्-आप की काशी में ईश्वर है । इस तरह अतीत आदि में निश्चित किया जाता है ।

क्रियायाः किमादिशब्दस्वरूपेभ्यो वा सन प्रत्ययः शङ्कायाम् ॥ २५ ॥

कामप्रवेदनस्य शङ्कायामभीप्सितायां क्रियायाः परः किमादि-शब्दस्वरूपेभ्यो वा परः सन प्रत्ययो भवति । यत्र वाक्ये सार्वनामिकं ककारादिशब्दस्वरूपं स्यात्तत्रावश्यं तस्मात्पर एव भवति । यत्र तु न भवेत्तत्र क्रियायाः पर एव भवति । ख्यवान् छ्वासन । किं नु खादति । क्यासन ख्यवान् छ्वा । किं नु खादति । बट कैत्यासन आसान् छिह् । किं नु ब्राह्मणाः कतिचन भवन्ति । कर्सना वागि यिवान् छुह् । कस्मिन्दिनरात्रिभागे आयाति । अत एव ज्ञापकाद्यथा सन प्रत्ययो भवति तथा संप्रश्नेऽपि किमादिस्वरूपेभ्यः संबोधनमुख्य-प्रत्ययाश्च भवन्तीति । कैत्यासा लूख् आसि । कियन्तो लोका आसन् ।

कामप्रवेदन की शङ्का-अभीप्सित में क्रिया से परे वा क्रियादि-शब्दस्वरूपों से परे 'सन' प्रत्यय होता है । जिस वाक्य में सार्वनामिक ककारादिशब्दस्वरूप हो, वहां अवश्य उससे परे ही होता है । यहां न हो, वहां क्रिया से परे ही होता है । ख्यवान् छ्वासन-किं नु खादति-क्या खाता है । क्यासन ख्यवान छ्वा-किं नु खादति-क्या खाता है ।

क्यासन ख्यवान छ्वा-किं नु खादति-क्या खाता है। बट कैत्यासन आसान् छिह्-किनु ब्राह्मणाःकतिचन भवन्ति-क्या ब्राह्मण कितने हैं। कर्सना वागि यिवान् छुह्-कस्मिन्दिनरात्रिभागे आयाति-किस दिन-रात के भाग में आता है। इस लिए ही ज्ञापक से जैसे 'सन' प्रत्यय होता है वैसे संप्रश्न में भी किमादि स्वरूपों से संबोधन-मुख्यप्रत्यय होते है। कैत्यासा लूख् आसि-कियन्तो लोका आसन्-कितने लोग थे।

तेभ्यस्ताञ्ताञतौ स्वाज्ञातायाम् ॥ २६ ॥

तेभ्यः सार्वनामिकककारादिस्वरूपेभ्यः परस्ताञ् प्रत्ययस्ताञत् प्रत्ययो वा भवति आत्मनोऽज्ञातायामाशङ्कायां विवक्षितायां सत्याम्। क्याह् ताञ् वनुन्। वा-क्याह् ताञत् वनुन्। किंचिदुक्तम्। एवं। कर् ताञ् आव्। कस्मिंश्चित्काले आगतः। कूतु ताञ् दितुन्। कियन्मितं दत्तम्। इत्यादि। अत्र प्रत्ययञ्कारस्य विकल्पेन मकारो भवति। तत्र-क्याह् ताम् वनुन्। (किंचिदुक्तम्)। इत्यादि स्यात्।

उन सार्वनामिकककारादिस्वरूपों से परे 'ताञ्' प्रत्यय अथवा 'ताञत्' प्रत्यय होता है अपनी अज्ञात-आशङ्का विवक्षित होने पर। क्याह् ताञ् वनुन्-वा-क्याह् ताञत् वनुन्-किंचिदुक्तम्-कुछ कहा। इस तरह-कर् ताञ् आव् -कस्मिंश्चित्काले आगतः-किस समय आया। कूतु ताञ् दितुन्-कियन्मितं दत्तम्-कितना दिया। इत्यादि। यहां प्रत्यय 'ञ्कार' को विकल्प से 'मकार' होता है। वहां-क्याह् ताम् वनुन्-किंचिदुक्तम्-कुछ कहा, इत्यादि हो।

ड्यठातिशये पूर्वं च ॥ २७ ॥

तेभ्यः सार्वनामिकककारादिस्वरूपेभ्यः पूर्वं ड्यठशब्दः प्रजोज्यः तत्तत्स्वरूपस्यातिशयार्थे गम्यमाने। ड्यठ कर् आव्। वा-ड्यठ कन आव्। चिरादागतः। ड्यठ वयाह्। (अतिशयः)। ड्यठ कूति। (अनल्पाः)। ड्यठकनि। (चिरेण)। इत्यादि।

उन सार्वनामिकककारादिस्वरूपों से पूर्व 'ड्यठ' शब्द प्रयुक्त करना चाहिए उस-उस स्वरूप के अतिशय अर्थ गम्यमान में। ड्यठ कर् आव्-वा-ड्यठ कन आव्-चिरादागतः-चिरकाल से आया। ड्यठ वयाह्-अतिशयः-अधिक। ड्यठ कूति-अनल्पाः-अधिक। ड्यठकनि-चिरेण-चिरकाल से। इत्यादि।

आपरो वा ॥ २८॥

स सन प्रत्यय आकारः परो यस्मात्तथा वा भवति। क्यासना ख्यवान् छुह्। किं वस्तु नु खादति। कर्सना यियि। कदा नु आगच्छेत्। कूतिसना आसहान्। कतिचन स्युः। कतिसना ओसु। कुत्र नु आसीत्।

वह 'सन्' प्रत्यय 'आकार' परे रहते वैसा ही रहता है। क्यासना ख्यवान् छुह्-किं वस्तु नु खादति-क्या वस्तु खाता है। कर्सना यियि-कदानु आगच्छेत्-कब आए। कूतिसना आसहान-कतिचन स्युः-कितने हों। कतिसना ओसु-कुत्र नु आसीत्-कहां था।

माशब्द आदावन्ते वा ॥ २९ ॥

आशंकायां सत्यां क्रियायाः पूर्वं पश्चाद्वा माशब्दः प्रयोज्यः। करान् मा छुह्। (करोति मा स्वित्)। मा छुह् करान्। (मास्वित्करोति)। मा करान् छुह्। (मा करोति स्वित्)। कर्योन्मा। (मा कार्षीत्स्वित्)। सुह् मा करि। (करिष्यति मा स्वित्)। ब्वह मा कर। (अहं मा स्वित् करिष्यामि)।

आशंका होने पर क्रिया से पूर्व वा पश्चात् 'मा' शब्द प्रयुक्त करना चाहिए। करान् मा छुह्-करोति मा स्वित्-मत करता है। मा छुह् करान्-मा स्वित्करोति-मत करता है। मा करान् छुह्-मा करोति स्वित्-मत करता है। कर्योन्मा-मा कार्षीत्स्वित्-मत किया। सुह् मा करि-करिष्यति मा स्वित्-मत करेगा। ब्वह मा कर-अहं मा स्वित् करिष्यामि-मैं मत करूंगा।

वाद्यः पाद्यो वाऽऽनुप्रासिकशब्दः ॥ ३० ॥

यस्य कस्यचिच्छब्दस्यानुकरणशब्दे कर्तव्ये तस्यैव शब्दस्याक्षरं वकारेण पकारेण वा विपर्ययस्य आनुप्रासिकशब्द उच्चारणीयः। करान् वरान् छुह्। करोतीत्यादि। द्यार् व्यार् अनिन्। धनादिकमानयतु। वत वत ख्ययिन्। भक्तादि भक्षयतु। अन् वार् वन्वार्। (क्रमप्राप्तिः)। अन्वार् पनवार्।

जिस किसी शब्द के अनुकरण शब्द करने पर उसी शब्द के अक्षर को वकार से वा पकार से विपर्यय का आनुप्रासिक शब्द उच्चारण करना चाहिए। करान् वरान् छुह्-करोति-करता है। इत्यादि। द्यार व्यार अनिन्-धनादिकमानयतु-धनादि लाओ। वत वत

ख्ययिन्-भक्तादि भक्षयतु-भात आदि खाओ। अन्वार वन्वार्-क्रमप्राप्तिः-क्रम से प्राप्ति। अन्वार् पनवार्।

तयोरेकतराद्ये तदितरः ॥ ३१ ॥

तयोर्वकारपकारयोर्मध्यात् एकतरे शब्दस्य आद्याक्षरे सति तस्मादितरः प्रयोज्यः वकाराद्ये पकारः पकाराद्ये वकार इति। पर् वर्। पठेत्यादि। पेंस वेंस दितिन्। पणाद्यदात्। वाँगन् पाँगन् अन। वृन्ताकाद्यानय। वाज़ पाज़ छिह्। सूदादयः सन्ति। व्यचु शब्दस्य पोचु शब्द आनुप्रासिको बोध्यः। व्यचु पोचु। संग्रह इत्यादि।

उन वकार-पकार में मध्य से एकतर शब्द के आदि अक्षर होने पर उससे इतर वकारादि में 'पकार' पकारादि में 'वकार' प्रयुक्त करना चाहिए। पर् वर्-पठ-पढ़। इत्यादि। पेंस वेंस दितिन्-पणाद्यदात्-पण आदि दिया। वाँगन् पाँगन् अन-वृन्ताकाद्यानय-वृन्ताक आदि लाओ। वाज़ पाज़ छिह्-सूदादयः सन्ति-पाचक आदि हैं। 'व्यचु' शब्द का 'पोचु' शब्द आनुप्रासिक जानना। व्यचु पोचु-संग्रहः-संग्रह। इत्यादि।

अन्येनापि क्वचित् ॥ ३२ ॥

स आनुप्रासिकशब्दोऽन्येन वर्णेन विपर्ययस्य क्वचिद्व्यवह्रियते सार्थकशब्देन वा। निकु सुकु। संभारादि। म्यंड़ु ठ्यंडु। ग्रासादि। हलु कलु। वक्रादि। हलु वलु। परिकरादि। हान्जू गान्जू। नाविकादि। फलु फ्यतु। भूषणादि। ओन्तु वोन्तु। उत्तानादि।

वह आनुप्रासिक शब्द अन्य वण के साथ विपर्यय वा सार्थकशब्द के साथ कहीं व्यवहृत होता है। जिकु सुकु—संभारादि-संभार (सामग्री) आदि। म्यंड़ु ठ्यंडु-ग्रासादि-ग्रास आदि। हलु कलु-वक्रादि-वक्र (टेढ़ा) आदि। हलु वलु-परिकरादि-परिकर आदि। हान्जू गान्जू-नाविकादि-नाविक आदि। फलु-फ्यतु-भूषणादि-आभूषण-आदि। ओन्तु वोन्तु-उतानादि-उत्तान आदि।

तच्छब्दस्यैकत्वेनक्रियासंबन्धेऽस् ॥ ३३ ॥

कर्तायां क्रियां तस्यार्थं विदधाति तस्याः क्रियायाः परः अस् प्रत्ययः सर्वत्र स्यात्। करान् छुस्। तस्यार्थ करोति। करान् छिस्। तस्यार्थं कुर्वन्ति। करान् छुसस्। तस्यार्थं करोमि। करान् छिस्

तस्यार्थं कुर्मः। कर करणे। वर्तमानायां प्रथमैकवहुत्वे पुंसि छुह्, छिह् प्रत्ययौ घातोरानागम (सू० १६) इति आन्। अनेनान्ते अस् प्रत्ययः। प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) इति हकार लोपः। अस् प्रत्ययस्य स्वरादल्लोपः (सू-३६) इत्यकारलोपः। एवमन्यत्।

कर्ता जिस क्रिया को उसके लिए करता है, उस क्रिया से परे 'अस्' प्रत्यय सर्वत्र होता है। करान् छुस्-तस्यार्थं करोति-उसके लिए करता है। करान् छिस्-तस्यार्थं कुर्वन्ति-उसके लिए करते हैं। करान् छुसस्-तस्यार्थं करोमि-उसके लिए करता हूं। करान् छिस्-तस्यार्थं कुर्मः-उसके लिए करते हैं। 'कर' करने में। वर्तमान-प्रथमा-एकवचन-वहुवचन पुँल्लिंग में 'छुह-्छिह्' प्रत्यय। घातोरानागमः (सू० १६) इससे आन्। इससे अन्त में 'अस्' प्रत्यय। प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) में 'हकार' का लोप। स्वरादल्लोपः (सू० ३६) इससे 'अस्' प्रत्यय के 'अकार' का लोप हुआ। इस तरह और।

कर्मण्यन् ॥ ३४ ॥

तच्छब्दस्यैकत्वे कर्मणि सति क्रियायाः परः अन् प्रत्ययो भवति सर्वत्र। करान् छुहन्। तं करोषि। ख्यवान् छुहन्। तं खादसि।

'तत्' शब्द के एकवचन-कर्म में होने पर क्रिया से परे 'अन्' प्रत्यय होता है सब जगह। करान् छुहन्-तं करोषि-तूं उसे करता है। ख्यवान् छुहन्-तं खादसि-तू उसे खाता है।

वहुत्वेनाख् ॥ ३५ ॥

तेषामर्थे यां क्रियां निवर्तयेत्तच्छब्दस्य वहुत्वे वा कर्मणि सति क्रियायाः परः अख् प्रत्ययः स्यात् सर्वासु विभक्तिषु। करान् छुख्। तेषामर्थे करोति। करान् छिख्। तेषामर्थं कुर्वन्ति। करान् छुसख्। तेषामर्थे करोमि। करान् छिख्। तेषां 'अर्थे' कुर्मः। साधनं पूर्ववत्।

उनके अर्थ में जिस क्रिया को निवर्त करे, 'तत्' शब्द के वहुवचन में वा कर्म में होने पर क्रिया से परे सभी विभक्तियों में 'अख्' प्रत्यय होता है। करान् छुख्-तेषामर्थे करोति-उन के लिए करता है। करान् छिख्-तेषामर्थे कुर्वन्ति-उनके लिए करते हैं। करान् छुसख्-तेषामर्थे करोमि-उनके लिए करता हूं। करान् छिख्-तेषामर्थे कुर्मः—उनके लिए करते हैं। साधन पहले की तरह।

त्वच्छब्दे कर्मणि भूते च ॥ ३६ ॥

अतीतकालिकक्रियायास्त्वच्छब्दे कर्मणि सति क्रियायाः परः अख् प्रत्ययः स्यात् । कर्योनख् । तेन चक्रुषे । करुमख् । मया चकृषे ।

अतीतकालिक क्रिया के 'त्वत्' शब्द-कर्म में होने पर क्रिया से परे 'अख्' प्रत्यय होता है। कर्योनख्-तेन चक्रुषे-उसने किया। करुमख्-मया चक्रुषे-मैंने किया।

भविष्यद्वर्तमानोत्तमेष्वथ् ॥ ३७ ॥

त्वच्छब्दे कर्मणि सति भविष्यन्त्या वर्तमानाया उत्तमपुरुषेऽपि क्रियायाः परः अथ् प्रत्ययः स्यात् । करथ् । त्वां करिष्यामि । करोथ् । त्वां करिष्यामः । करान् छुसथ् । त्वां करोमि । करान् छिथ् । त्वां कुर्मः ।

'त्वत्' शब्द कर्म में होने पर उत्तम पुरुष में भी भविष्यत् और वर्तमान क्रिया से परे 'अथ्' प्रत्यय होता है। करथ्-त्वां करिष्यामि-तुझे करूँगा। करोथ्-त्वां करिष्यामः-तुझे करेंगे। करान् छुसथ्-त्वां करोमि-तुझे करता हूं। करान् छिथ्-त्वां कुर्मः-तुझे करते हैं।

प्रत्यये प्रत्ययखकारस्य हः ॥ ३८ ॥

तत्संबन्धादिप्रत्ययेषु परेषु प्रत्ययसंबन्धिनः खकारस्य हकारो भवति । करान् छुहस् । तस्यार्थे करोषि । करान् छुहख् । तेषामर्थे करोषि । कर् करणे । वर्तमानायां मध्यमैकत्वे छुख् । आन् आगमः (१९) सूत्रेण तच्छब्द (सू० ३३।३५) इत्यादिना अस् अख् प्रत्ययौ । अनेन खकारस्य हकारः । व्यञ्जनं परेण सन्धेयम् (सू० १।३) ।

तत्संबन्धादि प्रत्ययों के परे प्रत्यय से सम्बद्ध 'खकार' को 'हकार' होता है। करान् छुहस्-तस्यार्थे करोषि-तूं उसके लिए करता है। करान् छुहख्-तेषामर्थे करोषि-तूं उनके लिए करता है। 'कर्' करने अर्थ में। वर्तमान मध्यमपुरुष के एकवचन में 'छुख्'। आन् आगमः (१९) सूत्र से और 'तच्छब्दः' (सू० ३३।३५) से 'अस्-अख्' प्रत्यय। इससे 'खकार' को 'हकार' व्यञ्जन को परले से मिला दो (सू० १।३)।

स्वरादल्लोपः ॥ ३९ ॥

प्रत्ययस्वरात्परस्य अकारस्य लोपो भवति । करान् छुस् । तस्मै करोति । करान् छिस् । तस्मै कुर्वन्ति । करान् छिवस् । तस्मै कुरुथ ।

करान् छिवख् । तेभ्यः कुरुथ । प्रथमयोर्हकारस्य लोपे कृते अनेन अकारलोपः । शेषं स्पष्टम् ।

प्रत्ययस्वर से परे 'अकार' का लोप होता है । करान् छुस्-तस्मै करोति-उसके लिए करता है । करान् छिस्-तस्मै कुर्वन्ति-उसके लिए करते हैं । करान् छिवस्-तस्मै कुरुथ-उसके लिए तुम करो । करान् छिवख्-तेभ्यः कुरुथ-उनके लिए तुम करो । प्रथम दो में 'हकार' का लोप करने पर इससे 'अकार' का लोप । शेष स्पष्ट है ।

त्वच्छब्देनाय् ॥ ४० ॥

युष्मच्छब्दकवचननियतेन त्वच्छब्देन सह क्रियासंबन्धे सति क्रियायाः परः अय् प्रत्ययो भवति सर्वासु विभक्तिषु । करान् छुय् । तुभ्यं करोति । करान् छिय् । तुभ्यं कुर्वन्ति । करान् छुसथ् । तुभ्यं करोमि । करान् छिय् । तुभ्यं कुर्मः ।साधनं पूर्ववत् ।

'युष्मद्' शब्द एकवचन में नियत 'त्वत्' शब्द के साथ क्रिया-संबन्ध होने पर क्रिया से परे सभी विभक्तियों में 'अय्' प्रत्यय होता है । करान् छुय्-तुभ्यं करोति-तुम्हारे लिए करता है । करान् छिय्-तुभ्यं कुर्वन्ति-तुम्हारे लिए करते हैं । करान् छुसथ्-तुभ्यं करोमि-तुम्हारे लिए करता हूं । करान् छिय्-तुभ्यं कुर्मः-तुम्हारे लिए करते हैं । साधन पहले की तरह ।

युष्मदाऽवः ॥ ४१ ॥

युष्मच्छब्देन क्रियासंबन्धे सति क्रियायाः परः सर्वत्र अव प्रत्ययो भवति । करान् छुव । बः करोति । करान् छिव । वः कुर्वन्ति । करान् छुसव् । वः करोमि । करान् छिव । वः कुर्मः । क्वचित्संबोधनवत्प्रोक्तौ प्रत्ययौ भवत इति ।

'युष्मद्' शब्द से क्रियासंबन्ध होने पर क्रिया से परे सर्वत्र 'अव' प्रत्यय होता है। करान् छुव-वः करोति-तुम्हें करता है । करान् छिव-वः कुर्वन्ति-तुम्हें करते हैं । करान् छुसव्-वः करोमि-तुम्हें करता हूं । करान् छिव्-वः कुर्मः-तुम्हें करते है । कहीं संबोधन की तरह कहे गए प्रत्यय होते हैं ।

मच्छब्देनाऽम् ॥ ४२ ॥

अस्मच्छब्दैकत्वनियतप्रयोगेण मच्छब्देन सह संबन्धे सति क्रिया-परः अम् प्रत्ययः स्यात् । करान् छुम् । मां (वा) मे करोति । करान्

छिम् । मां (वा) मे कुर्वन्ति । करान् छुहम् । मे करोषि । करान् छिवम् । मां (वा) मे कुरुथ । साधनमुक्तवत् ।

'अस्मद्' शब्द एक वचन में नियत प्रयोग होने से 'मत्' शब्द के साथ संबन्ध होने पर क्रिया से परे 'अम्' प्रत्यय होता है । करान् छुम्-मां (वा) मे करोति-मुझे वा मेरे करता है । करान् छिम्-मां वा मे कुर्वन्ति-मुझे वा मेरे करते हैं । करान् छुहम्-मे करोषि-तूं मेरे करता है । करान् छिवम्-मां वा मे कुरुथ-मुझे वा मेरे तुम करो । साधन कहे की तरह ।

कर्मण्यस् भूते ॥ ४३ ॥

मच्छब्दे कर्मणि सति अतीतकाले क्रियायाः परः अस् प्रत्ययः स्यात् । कर्योनस् । तेनाहं चक्रे । कर्योयम् । त्वयाहं चक्रे ।

'मत्' शब्द के कर्म में होने पर अतीतकाल में क्रिया से परे 'अस्' प्रत्यय होता है । कर्योनस्-तेनाहं चक्रे-उससे मैं किया । कर्योयम्-त्वयाहं चक्रे-तुझ से मैं किया ।

बहुत्वेऽस्मत्प्रयोगसंबन्ध एव च ॥ ४४ ॥

अस्मच्छब्देन क्रियासंबन्धे सति क्रियायाः परः पूर्वं वा अस्मच्छब्दानेकत्वप्रयोग एव प्रयोज्यः । करान् छुह् अस्य । नः करोति । करान् छिह् अस्य । नः कुर्वन्ति । अस्य करान् छुख् । नः करोषि । अस्य करान् छिव । नः कुरुथ । एवं स्त्रीलिङ्गनियतप्रत्ययेषु च त्वच्छब्दादिसंबन्धप्रत्यया अवगन्तव्याः । तेभ्यश्च कामप्रवेदनतदभावादिप्रत्ययाश्च स्वयमेवावधार्याः । विस्तृतिभयान्नोदाहृताः ।

'अस्मद्' शब्द के साथ क्रियासंबन्ध होने पर क्रिया से परे वा पूर्व 'अस्मद्' शब्द का अनेकत्व प्रयोग ही करना चाहिए । करान् छुह् अस्य-नः करोति-हमें करता है । करान् छिह् अस्य । नः कुर्वन्ति । हमें करते हैं । अस्य करान् छुख्-नः करोषि-हमें तूं करता है । अस्य करान् छिव-नः कुरुथ-तुम हमें करो । और इस तरह स्त्रीलिङ्ग में नियत प्रत्ययों में 'त्वत्' शब्दादि से सम्बद्ध प्रत्यय जानने चाहिए तथा उनसे कामप्रवेदनतदभावादिप्रत्यय स्वयमेव जान लेना । विस्तार के भय से उदाहरण नहीं दिए जा रहे है ।

चरपवशफुहमर्चवुचफिचां नित्यं संबन्धप्रत्ययाः ॥ ४५ ॥

चर अन्तःकोपे । पवश फुह अमर्ष । मर्च अन्तः कोपे । वुच

दग्धीभवने । फिच विस्मरणे । एषां प्रोक्तसंबन्धप्रत्यया नित्यं भवन्ति । चरान् छ्यस् । (अन्तः कोपोऽस्य भवति) । फ्वशान् छ्यस् । फुहान् छ्यस् । (असहनमस्यास्ति) । मर्चान् छ्यस् । अन्तः कोपोऽस्य भवति । वुचान् छ्यस् । (अन्तर्दाहो भवत्यस्य) । फिचान् छ्यस् । (विस्मृतिर्भवत्यस्य) । साधनं सुगमम् । एषां धातुपाठे नित्यस्त्रीलिङ्ग-कथनात्स्त्रीलिङ्गप्रत्यय एव ।

'चर' भीतरीक्रोध में । फ्वश-फुह-नहीं सहन करने में । मर्च-भीतरी क्रोध में । वुच-जलने में । फिच-भूलने में । इन्हें कहे गए संबन्थ प्रत्यय नित्य होते हैं । चरान् छ्यस्-अन्तःकोपोऽस्य भवति-इसे भीतरी क्रोध हुआ करता है । फ्वशान छ्यस् फुहान् छ्यस्-असहन-मस्यास्ति-इसे असहनशीलता है । मर्चान् छ्यस्-अन्तः कोपोऽस्य भवति-इसे भीतरी क्रोध होता है । वुचान् छ्यस्-अन्तर्दाहो भवत्यस्य-इसे भीतरी जलन होती है । फिचान् छ्यस्-विस्मृतिर्भवत्यस्य-इसे विस्मृति हो जाती है । साधन आसान है । इन्हें धातुपाठ में नित्य स्त्रीलिङ्ग कहे जाने से स्त्रीलिङ्ग प्रत्यय ही ।

षष्ठी कर्तरि सर्वत्र ।। ४६ ।।

एषां धातूनां सर्वासु विभक्तिषु षष्ठीकर्तरि भवति । तमिस् चरान् छ्यह् । एषां सर्वेषां यत्र कर्तरि प्रयुज्यमाने सति तत्र संब-न्धिप्रत्ययानामनित्यता बोध्येति ।

इन धातुओं को सभी विभक्तियों में षष्ठी कर्ता में होती है । तमिस् चरान् छ्यह् । इन सभी के, यहां कर्ता में प्रयुक्त होने पर, बहां संबन्धिप्रत्ययों की अनित्यता जानना ।

गछोऽपि योग्यार्थेत्र ।। ४७ ।।

गछ गतौ सामञ्जस्ये । इत्यस्य योग्यार्थविषये अत्र षष्ठी कर्तरि भवति । तमिस् गछान् छुह् ज़ि परहा । (तस्याभीष्टमहं योग्योऽस्मि पठेयमिति) ।

'गछ' गति और सामञ्जस्य अर्थ में । इसे योग्यार्थविषय में यहां षष्ठी कर्ता में होती है । तमिस् गछान् छुह् ज़ि परहा-तस्याभी-ष्टमहं योग्योऽस्मि पठेयमिति-उसकी इच्छानुसार मैं योग्य हूं, पढ़ूं ।

(४७ योग्यार्थ इत्यत्र अभीष्टार्थेऽपि चरितार्थता ।)

प्रथमैकानेकत्वे च ।। ४८ ।।

तस्यैव धातोरत्र वर्तमानविभक्तौ नित्यं प्रथमपुरुषस्य एकत्व-बहुवचनप्रत्ययावेव भवतः न तु मध्यमपुरुषादयः । किंतु ते संबन्धिप्रत्ययैर्विविच्यन्ते । गछान् छुस् । गछान् छुख् । गछान् छुय् । गछान् छुव् । गछान् छुम् । । गछान् छुह् ।

उसी धातु से यहां वर्तमान विभक्ति में नित्य प्रथमपुरुष के एकवचन और बहुवचन प्रत्यय ही होते हैं, न कि मध्यमपुरुष आदि। किन्तु वे संबन्धिप्रत्ययों से युक्त होते हैं ।

सर्वत्रानः सकर्मकेभ्यः कर्मकर्तरि ।। ४९ ।।

सर्वत्र सर्वेषु कालेषु सकर्मकेभ्यो धातुभ्यः परः कर्मकर्तरि अन प्रत्ययो भवति ।

सब जगह सभी कालों में सकर्मक धातुओं से परे कर्मकर्ता में 'अन' प्रत्यय होता है ।

पूर्वे परे वा यिधातुरूपतः ।। ५० ।।

स अन प्रत्यययुक्तो धातुः पूर्वं वा परे यि आगमने इत्यस्य धातोः स्वस्वकालीनप्रयोगान्तर्वर्ति यद्रूपं स्यात्तस्मात्प्रयोज्यः ततः कर्मकर्तृप्रयोगा भवन्ति । रनन यिवान् छुह् बत । भक्तं पच्यते । बत छुह् रनन यिवान् । भक्तं पच्यते । पानय् छुह् यिवान् करन । स्वयं क्रियते । अर्थात् कृतं भवति । रन पाके पूर्वसूत्रेण (४९) अन प्रत्ययः। यि धातोः यिवान् छुह् इति रूपात्पूर्वं रनन इति प्रयुक्तः । अपरत्र वर्तमानापरस्वरूपे यिवान् इत्यस्मात्पूर्वं प्रयुक्तः । तृतीये तु परः ।

वह 'अन्' प्रत्यययुक्त धातु पहले वा परे 'यि' आने अर्थ में इस धातु का अपने-अपने समय के प्रयोग के भीतर जो रूप हो, उससे प्रयुक्त करना चाहिए । इसके बाद कर्म-कर्तृ प्रयोग होते हैं । रनन-यिवान छुह् बत-भक्तं पच्यते-भात पकाया जाता है । बत छुह् रनन यिवान्-भक्तं पच्यते-भात पकाया जाता है। पानय् छुह् यिवान् करन-स्वयं क्रियते-खुद किया जाता है । अर्थात् कृतं भवति-किया होता है । 'रन' पकाने अर्थ में, पूर्वसूत्र से (४९) 'अन' प्रत्यय । 'यि' धातु से 'यिवान् छुह्' इस रूप से पूर्व 'रनन' यह प्रयुक्त हुआ । दूसरी जगह वर्तमानापरस्वरूप में 'यिवान्' इससे पूर्व प्रयुक्त हुआ । तीसरे में तो पर ।

वाऽकर्मकेभ्यः ॥ ५१ ॥

अकर्मकेभ्यो धातुभ्यः प्रोक्ता क्रिया वा विकल्पेन भवति। किंच विभक्तिप्रयोगा अपि स्वयं कर्मकर्तृप्रयोगा भवन्ति। ज़ोतान् छुह्। वा। ज़ोतन यिवान् छुह्। दीप्यते। दज़ान् छुह्। वा। दज़न यिवान् छुह्। दह्यते। ज़ोत दीप्तौ। दज़ भस्मीभवने। शेषं पूर्ववत्।

अकर्मक धातुओं से कही गई क्रिया विकल्प से होती है और विभक्तिप्रयोग भी स्वयं कर्मकर्तृप्रयोग होते हैं। ज़ोतान् छुह-वा-ज़ोतन् यिवान् छुह्-दीप्यते-चमकाया जाता है। दज़ान् छुह्-वा-दज़न यिवान् छुह्-दह्यते-जलाया जाता है। 'ज़ोत' चमकने में। 'दज़' राख होने में। बाकी पहले की तरह।

वोजः कर्मकर्ता चाक्षुषज्ञान एव नित्यम् ॥ ५२ ॥

वोज़ निशामने इति धातोः कर्मकर्तृस्वरूपं नित्यं चाक्षुषज्ञान एव भवति न तु श्रवणज्ञाने। वोज़न यिवान् छुह्। स्वयं दृष्टं भवति। वोज़न आव्। दृष्टिमागतः। वोजन यियि। दृष्टिमागमिष्यति। श्रवणज्ञाने तु। वोज़ान् छुह्। शृणोति। न तु दृश्यते। वोज़नस् अन्दर् यिवान् छुह्। श्रवणमागच्छतीति कर्मकर्तृस्वरूपं सेत्स्यति।

'वोज़' सुनाने अर्थ में, इस धातु से कर्मकर्तृस्वरूप नित्यचाक्षुष-ज्ञान में ही होता है, न कि श्रवण ज्ञान में। वोज़न यिवान् छुह्-स्वयं दृष्टं भवति-स्वयं दृष्ट होता है। वोज़न आव्-दृष्टिमागतः-नज़र आया। वोज़न यियि-दृष्टिमागमिष्यति-नज़र आएगा। श्रवणज्ञान में तो-वोजान् छुह्-शृणोति-सुनता है, न कि देखा जाता है। वोज़नस् अन्दर यिवान् छुह्-श्रवणमागच्छति-सुना जाता है, यह कर्मकर्तृ-स्वरूप को सिद्ध करेगा।

गरः काठिन्ये च ॥ ५३ ॥

गर घट्टने इत्यस्य कर्मकर्तृस्वरूपं काठिन्ये भवति च शब्दात्स्वार्थे च। गरन यिवान् छुह्। कठिनीभवति। घटितं च भवति।

'गर' घट्टन अर्थ में, इस का कर्मकर्तृस्वरूप काठिन्य में होता है और शब्द से स्वार्थ में। गरन यिवान् छुह्-कठिनीभवति-कठिन होता है। और घटित होता है।

डषोऽनो लोपो द्रे॑ठादेशश्च ॥ ५४ ॥

डेष प्रेक्षणे इत्यस्मात् अन प्रत्ययस्य लोपो भवति डेषश्च द्रे॑ठ् आदेशो भवति। द्रे॑ठ् यिवान् छुह्। दृष्टिमायाति। डेषन यिवान् छुह्। इति न साधुशब्दः।

'डेष' देखने में, इससे 'अन' प्रत्यय का लोप और 'डेष' को 'द्रे ठ्' आदेश होता है। द्रे॑ठ् यिवान् छुह्-दृष्टिमायाति-नज़र आता है। डेषन यिवान् छुह्-यह साधु शब्द नहीं है।

नेश्चाञ्चल्येऽपि ॥ ५५ ॥

नि हरणे इत्यस्य कर्मकर्ता चाञ्चल्ये भवति-अपिशब्दात्स्वार्थेऽपि। निन यिवान् छुह्। चञ्चलो भवति। वा। हृतो भवति। अत्र स्वरादल्लोपः (सू०३९) इत्यकारलोपः।

'नि' हरण अर्थ में, इसका कर्म-कर्ता चाञ्चल्य में होता है, 'अपि' शब्द से स्वार्थ में भी। निन यिवान् छुह्-चञ्चलो भवति-चञ्चल होता है-वा-हृतो भवति-अपहृत होता है। यहां 'स्वरादल्लोपः (सू० ३९) से 'अकार' का लोप।

हेर्बन्धनेऽपि ॥ ५६ ॥

हि ग्रहणादिषु इत्यस्य कर्मकर्ता व्यवहारबन्धे भवति अपि शब्दात्स्वार्थेऽपि। ह्यन यिवान् छुह्। बद्धो भवति। क्रीतश्च भवति। धातोरकारागमे (८।२।११) सूत्रेण कृते। अकारादकारलोपः (सू० ३९)।

'हि' ग्रहण आदि अर्थ में, इसका कर्मकर्ता व्यवहारबन्ध में और स्वार्थ में भी होता है। ह्यन यिवान छुह्-बद्धो भवति-बद्ध होता है-क्रीतश्च भवति-और क्रीत होता है। धातु से 'अकार' का आगम (८।२।११) सूत्र से करने पर, अकार से 'अकार' का लोप (सू० ३९)।

भावशब्देभ्यो हेर्भूतप्रयोगा वर्तमानबोधकाः ॥ ५७ ॥

भावशब्देभ्यः पूर्वं परे वा हि ग्रहणे इत्यस्य धातोर्भूतप्रयोगा वर्तमानकालस्य बोधका भवन्ति। करुन् ह्यतुन्। कर्तुं प्रवृत्तः। ह्यतुख् परुन्। पठितुं प्रवृत्ताः। संप्रतिकाले करोति पठन्ति चेत्यर्थतोऽवगम्यते।

भावशब्दों से पूर्व वा परे 'हि' ग्रहण अर्थ में, इस धातु के भूतप्रयोग वर्तमानकाल के बोधक होते हैं। करुन् ह्यतुन्-कर्तुं प्रवृत्तः-

करने के लिए प्रवृत्त हुआ । ह्यतुख् परुन्-पठितुं प्रवृत्ताः-पढ़ने के लिए प्रवृत्त हुए । इस 'समय-करता है और पढ़ते हैं, यह अर्थ से जाना जाता है ।

ज़ानो भविष्यन्त्याश्च ॥ ५८ ॥

ज़ान अवबोधने इत्यस्य धातोर्भविष्यन्तीप्रयोगा भावशब्देभ्यः पूर्वे वा परे प्रयुक्ता वर्तमानकालबोधका भवन्ति । च शब्दात्केवलाः प्रयोगाश्चेति । करुन् ज़ानि । करणं जानाति । परुन् ज़ानि । पठनं जानाति । लेखुन् ज़ानन् । लेखनं जानन्ति । ज़ोनुन् जानन् । अर्जनं जानन्ति । च शब्दादन्यतोऽपि च । स्यठाह् ज़ानि । वहु जानाति । विद्या ज़ानि । विद्यां जानाति । इत्थमेवातीतप्रयोगा भविष्यदर्थे क्वचिद्व्यवह्रियन्ते । यथा । तमिस् ल्यूखुथ् सोनु नमस्कार् । तस्मै नो नमस्कारो लेख्यः । अत्र ल्यूखुथ् इति भूतकालप्रयोगो भविष्यदर्थे ।

'ज़ान' जानने में, इस धातु के भविष्यन्तीप्रयोग भावशब्दों से पूर्व वा परे प्रयुक्त वर्तमानकालबोधक होते हैं । 'च' शब्द से केवल प्रयोग । करुन् ज़ानि-करणं जानाति।करना जानता है । परुन् ज़ानि-पठनं जानाति-पढ़ना जानता है । लेखुन् ज़ानन्-लेखनं जानन्ति-लिखना जानते हैं । ज़ेनुन् जानन्-अर्जनं जानन्ति-कमाना जानते हैं । 'च' शब्द से अन्य से भी । स्यठाह् ज़ानि-वहु जानाति-बहुत जानता है । विद्या ज़ानि-विद्यां जानाति-विद्या जानता है । इसी तरह ही अतीत प्रयोग भविष्यद् अर्थ में कहीं व्यवहृत किए जाते हैं । जैसे-तमिस् ल्यूखुथ् सोनु नमस्कार्-तस्मै नो नमस्कारो लेख्यः-उसके लिए हमारा नमस्कार लिखना । यहां 'ल्यूखुथ्' यह भूतकाल प्रयोग भविष्यत् अर्थ में है ।

पाथो नित्यम् ॥ ५९ ॥

पाथ सद्भावे इत्यस्य भविष्यन्तीप्रयोगा नित्यं वतमानार्थे भवन्ति तस्य वर्तमानप्रयोगदर्शनाभावात् । पाथि । सन्नस्ति । पाथन् । सन्तः सन्ति । पाथख् । सन्नसि । पाथिव् । सन्तः स्थ । पाथ । सन्नस्मि । पाथव् । सन्तः स्मः । किं चास्य धातोरतीतप्रयोगादर्शनाच्चापूर्णभूतप्रयोगा अतीते भवन्ति । पाथिहे । (आसीत्) । पाथहान् । (आसन्) । पाथहाख । (आसीः) । पाथिहीव । (आस्त) । इत्यादि ।

तथा पाथि हेहय् इत्यादयश्च साधवो भवन्ति । तथा चास्य धातोः कृदन्त-स्वरूपाणि च न सेत्स्यन्तीति बोध्यम् ।

'पाथ' सद्भाव में, इसके भविष्यन्तीप्रयोग नित्य वर्तमान अर्थ में होते हैं, उसके वर्तमान प्रयोग न देखे जाने से । पाथि-सन्नस्ति-होता हुआ है । पाथन्-सन्तः सन्ति-होते हुए हैं । पाथख्-सन्नसि-तू होता हुआ है । पाथिव्-सन्तः स्थ-तुम होते हुए हो । पाथ-सन्नस्मि-होता हुआ हूँ । पाथव्-सन्तः स्मः-होते हुए हैं । और इस धातु के अतीत-प्रयोग न देखने से अपूर्णभूतप्रयोग अतीत में होते हैं । पाथिहे-आसीत्-था । पाथहान्-आसन्-थे । पाथहाख्-आसोः-तू था । पाथिहीव्-आस्त-तुम थे । इत्यादि । वैसे-पाथि हेहय्-इत्यादि साधु होते हैं । और वैसे इस धातु के कृदन्तस्वरूप सिद्ध नहीं होंगे, यह जान लेना चाहिए ।

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते आख्यात-प्रक्रियायां वर्तमानपादः प्रथमः ।। ८।१ ।।

अथाख्यातप्रक्रियायाम् ।। ८ ।।

भविष्यत्पादः ।। २ ।।

अनारब्धाक्रिया भविष्यत्कालः ।। १ ।।

वर्तमानासन्नोत्तरकालादुत्तरः सर्वः कालः भविष्यत्कालसंज्ञो भवति । तत्कालस्य सर्वाः क्रिया अनारब्धा एव भवन्ति ।

वर्तमान के नज़दीक उत्तरकाल से उत्तर सब काल भविष्यत्-काल नाम से पुकारे जाते हैं। उस काल की सभी क्रियायें अनारब्ध ही हुआ करती हैं।

विध्याशीर्भविष्यन्त्यपूर्णभूतार्थभेदाच्चतुर्विधः ।। २ ।।

स भविष्यत्कालो विधिः, आशीः, भविष्यन्ती, अपूर्णभूतार्था नाम क्रियातिपत्तिः, इति भेदतश्चतुष्प्रकारो भवति । क्रियातिपत्तेरत्रापूर्ण-भूतार्थकथनादतीतकालेऽपि भवति ।

वह भविष्यत्-काल विधि, आशी, भविष्यन्ती और अपूर्णभूतार्था नाम क्रियातिपत्ति, इस भेद से चार प्रकार का होता है। क्रियाति-पत्ति के यहां अपूर्णभूतार्थ कहने से अतीतकाल में भी होता है।

आसन्नदूराभ्यां विधिर्द्विविधः ।। ३ ।।

वर्तमानकालान्निकटकाल आसन्नविधिः दूरकालो दूरविधि-रिति द्विविधो भवति । तत्र वक्तुरुत्तमपुरुषस्य स्वस्मिन्विधि-निषेधाभावाच्चत्वार एव प्रथमपुरुषैकत्वानेकत्वमध्यमैकत्वानेकत्व-प्रत्ययाः प्रयुज्यन्ते ।

वर्तमानकाल से निकटकाल आसन्नविधि, दूरकाल दूरविधि; इस प्रकार दो भेद हुआ करते हैं। वहां वक्ता-उत्तमपुरुष के अपने में विधि-निषेध के न होने से चार ही प्रथमपुरुष के एकवचन-वहु-वचन, मध्यमपुरुष के एकवचन-वहुवचन प्रत्यय प्रयुक्त किए जाते हैं।

मुख्यगौणाभ्यां निकटविधिर्द्विधा ।। ४ ।।

अवश्यं करणीयाज्ञा मुख्यनिकटविधिः तदितरो गौणनिकटविधि-रिति द्विप्रकारो भवति ।

अवश्यं करणीयाज्ञा मुख्यनिकटविधि, उससे इतर गौण निकटविधि, दो प्रकार का होता है।

निकटविधौ इन् इन् हि इव् प्रत्ययाः ॥ ५ ॥

स्पष्टम्। करिन्। करोतु। करिन् तिम्। कुर्वन्तु। कर्। कुरु। करिव्। कुरुत। हि प्रत्ययस्य इकार उच्चारणार्थः। व्यञ्जनान्ताद्धलोपः (सू० ६) इति हकारस्य लोपः।

स्पष्ट है। करिन्-करोतु-वह करे। करिन् तिम्-कुर्वन्तु-वे करें। कर्-कुरु-तूं कर। करिव्-कुरुत-तुम करो।'हि'प्रत्यय का 'इकार' उच्चारणार्थ है। व्यञ्जनान्ताद्धलोपः (सू० ६) से 'हकार' का लोप।

व्यञ्जनान्ताद्धलोपः ॥ ६ ॥

व्यञ्जनान्ताद्धातोर्हिप्रत्ययहकारस्य लोपो भवति। कर्। कुरु। कर करणे मध्यमैकत्वे हि इकार उच्चारणार्थः अनेन हकार लोपः। व्यञ्जनान्तात्किम्। दिह्। देहि। निह्। हर्। दि दाने। निह् हरणे। हि प्रत्ययः। इकार उच्चारणार्थः।

व्यञ्जनान्त धातु से 'हि' प्रत्यय के 'हकार' का लोप होता है। कर्-कुरु-करो। कर-करने अर्थ में, मध्यमपुरुष के एकवचन में 'हि' इकार उच्चारणार्थ है, इससे 'हकार' का लोप। व्यञ्जनान्त से क्या ? दिह्-देहि-दो। निह्-हर्-हरण कर। 'दि'-दान अर्थ में, 'निह्' हरने अर्थ में। 'हि' प्रत्यय है। 'इकार' उच्चारणार्थ है।

ओदेदुपधाया उदीतौ ॥ ७ ॥

धातोरुपधाभूतस्य ओकारस्य एकारस्य च क्रमेण ऊकार-ईकारौ भवतः। रूज़िन्। तिष्ठतु। तूलिन्। तोलयतु। पूठिन्। पुष्यताम्। रोज़ स्थितौ। तोल। तुलने। पीठ। स्थूलीभवने। अनेन उपधाया ओकारस्य ऊकारः। नीरिन्। निर्गच्छत शींकिव्। शङ्कताम्। पीडिन्। निष्पीड्यताम्। नेर निर्गमने। शेंक शङ्कायाम्। पेड निर्यासे। अनेन उपधाया एकारस्य ईकारः।

धातु के उपधाभूत 'ओकार' और 'एकार' को क्रम से 'ऊकार' और 'ईकार' होते हैं। रूज़िन्-तिष्ठतु-ठहरो। तूलिन्-तोलयतु-तोलो। पूठिन्-पुष्यताम्-पुष्ट हो। 'रोज' स्थिति अर्थ में। 'तोल' तुलने अर्थ में। 'पीठ'–मोटे होने अर्थ में। इससे उपधा के 'ओकार' को 'उकार' होता है। नीरिन्-निर्गच्छतु-निकलो। शींकिव-शङ्कताम्-शङ्का करो।

पीडिन् निष्पी डयताम्-पीडन करो। नेर-निर्गमने-निकलने अर्थ में। शेंक-शङ्कायाम्-शङ्का अर्थ में। पेड-निर्यासे-निर्यास में। इस से उपधा के 'एकार' को 'ईकार' होता है।

न हौ ॥ ८ ॥

हि प्रत्यये परे उपधाया ओदेतोरूकारेकारौ न भवतः। रोज़्। तिष्ठ। तोल्। तोलय। नेर्। निर्गच्छ। शेंक्। शङ्कस्व। साधनं सुगमम्।

'हि' प्रत्यय परे रहते उपधा के 'ओ' और'ए'। से 'ऊ' और 'ए' नहीं होते हैं। रोज़्-तिष्ठ-ठहर। तोल्-तोलय-तोल। नेर्-निर्गच्छ-निकल। शेंक-शङ्का-शङ्का कर। साधन आसान है।

चरादीनामिन्प्रत्ययसंबन्धप्रत्ययैर्विधिः ॥ ९ ॥

चर अन्तः कोपे इत्यादीनां धातूनां प्रथमपुरुषस्य इन् प्रत्ययेन तच्छब्दादिसंबन्धे विधीयमाने सति सर्वप्रत्ययानां बोधो भवति स एवात्र विधिः। चरिनस्। चरिनख्। चरिनय्। चरिनव। एवं शेषाणामपि ज्ञेयम्।

'चर' भीतरी कोप में, इत्यादि धातुओं के प्रथम पुरुष के 'इन्' प्रत्यय से 'तत्' शब्दादि संबन्ध होने पर सभी प्रत्ययों का बोध होता है, वही यहां विधि है। चरिनस्, चरिनय्, चरिनव। इस तरह बाकी के भी जानना।

स्वरान्ताद्यागम इकारे ॥ १० ॥

स्वरान्ताद्धातोरिकाकारे परे यकारागमो भवति। दियिव्। दत्त। नियिव। हरत। दि दाने। नि हरणे। मध्यमानेकत्वे इव् प्रत्ययः अनेन यकारागमः।

स्वरान्त धातु से 'इकार'। परे 'यकार' का आगम होता है। दियिव्-दत्त-दो। नियिव्-हरत-हरो। दि-दाने-दान अर्थ में। नि-हरणे-हरण अर्थ में। मध्यमपुरुष के बहुवचन में 'इव्' प्रत्यय, इससे 'यकार' का आगम हुआ।

सर्वत्राकारागमो निदियिवर्जितात् ॥ ११ ॥

स्वरान्ताद्धातोः सर्वत्र सर्वासु विभक्तिषु अकारागमो भवति। नि हरणे। दि दाने। यि आगमने। एतान्वर्जयित्वा। ह्यह। क्रीणीहि। ख्यह्। खाद। च्यह्। पिब। हि क्रीणनग्रहणधारणषु। खि

खादने । च्चि पाने । मध्यमैकत्वे हि प्रत्ययः अनेनाकारागमः । इकारोऽसवर्णे योऽपरलोपः (सू. १।१०) इति यत्वम् । व्यञ्जनं परेण अंधेयम् (सू. १।३) । निदिर्यिर्वजितात्किम् । निह् । हर । दिह् । देहि । यिह् । एहि । साधितचरा एव ।

स्वरान्त धातु से सर्वत्र सब विभक्तियों में 'अकार' का आगम होता है । नि-हरणे-हरने अर्थ में । दि-दाने-दान अर्थ में । यि-आगमने-आने अर्थ में । इन्हें छोड़ कर । ह्यह-क्रीणोहि-खरीद । ख्यह्-खाद-खा । च्यह्-पिव-पी । हि-खरीदना, ग्रहण करना और धारण करने अर्थ में । खि-खादने-खाने में । चि-पाने-पीने में । मध्यमपुरुष के एकवचन में 'हि' प्रत्यय और इससे 'अकार' का आगम । इकारोऽसवर्णे योऽपरलोपः (सू. १।१०) से 'य' । व्यञ्जन को अपने से परे के साथ मिला देना चाहिए (सू. १।३) । निदियि, इन्हें छोड़ने से क्या । निह्-हर-हरण कर । दिह्-देहि-दो । यिह्-एहि-इधर आओ । साधन पहले हो चुका हुआ है ।

येर्व्वलादेशो वा ॥ १२ ॥

यि-आगमने इत्यस्य विधौ विषये व्वल आदेशो वा भवति । व्वलिन्-आयातु । व्वल-एहि । व्वलिव् । एत । साधनं पूर्ववत् ।

यि-आगमने-आने अर्थ में, इस की विधि वा विषय में 'व्वल' आदेश होता है । व्वलिन्-आयातु-आओ । व्वल-एहि-इधर आ । व्वलिव्-एत-तुम आओ । साधन पहिले की तरह ।

व्वब इनि यो वा ॥ १३ ॥

व्वब उत्पत्तौ इत्यस्य इन्प्रत्यये परे वकारस्य यकारो वा भवति । व्वयिन् । भवतु । पक्षे । व्वबिन् । एवमाशीर्यन्प्रत्ययेऽपि ज्ञेयः ।

व्वब-उत्पत्तौ-उत्पत्ति में, इस के 'इन्' प्रत्यय परे रहते 'वकार' को 'यकार' विकल्प से होता है । व्वयिन्-भवतु-हो । पक्ष में-व्वबिन् । इसी तरह आशीर्यन् प्रत्यय में भी जानना ।

गौणे प्रत्ययस्वरात्तः ॥ १४ ॥

गौणविधिरपि द्विविध एक उपेक्ष्याज्ञापनं द्वितीय आक्षेपतः कथनम् । तयोर्द्वयोरेव विध्योः प्रत्ययस्वरात्परस्तकारागमे भवति । करितन् । करोतु नाम । कुरितन् । कुर्वन्तु नाम । करितव् । कुरुत

नाम। कर करणे निकटविधौ इन् इन् हि एव प्रत्ययाः (सू. ५)। अनेन इकारात्परस्तकारः धातुस्वरस्य चाप्रसिद्धता विज्ञेया। खारितन्। आरोहयतु नाम। वालितन्। अवरोहयतु नाम। साधनं सुगमम्।

गौणविधि भी दो प्रकार की होती है—एक-उपेक्ष्याज्ञापन, दूसरा-आक्षेपतः कथन। उन दोनों विधियों में प्रत्ययस्वर से परे 'तकार' का आगम होता है। करितन-करोतु नाम-करिए। करितन्-करोत् नाम-करिए। करितन-कुर्वन्तु नाम-आप करो। करितव्-कुरुत नाम-तुम करो। कर-करने अर्थ में, निकटवि निकटविधि में 'इन् इन् हि एव प्रत्ययाः (सू० ५) इससे 'इकार' से परे 'तकार' और धातुधौ-स्वर को अप्रसिद्धता जाननी चाहिए। खारितन्-आरोहयतु नाम-चढ़िए। वालितन्-अवरोहयतु नाम-उतरिए। साधन सरल है।

हौ धातोरेव ॥ १५ ॥

हि प्रत्यये परे धातोरेव तकारागमो भवति। कर्त। कुरु नाम। दित। देहि नाम। कर करणे। दि दाने। हि प्रत्ययः व्यञ्जनान्ताद्धलोपः (सू० ५)। प्रत्ययलक्षणाद् (पा० १।१।६२)। अनेन कर् दि इत्याभ्यां परस्तकारागमः। कर्तन्। तं कुरु। करितोन्। तं कुरुत।

'हि' प्रत्यय परे रहते धातु से ही 'तकार' का आगम होता है। कर्त-कुरु नाम-कर। दित-देहि नाम-दे। कर-करणे-करने में। दि-दाने-दान में। 'हि' प्रत्यय-व्यञ्जनान्त होने से 'ह' का लोप (सू० ५)। प्रत्ययलक्षणाद् (पा० १।१।६२)। इससे 'कर्-दि' इन दोनों से परे 'तकार' का आगम होता है। कर्तन्-तं कुरु-उसे कर। करितोन्-तं कुरुत-उसे करो।

व्यञ्जनान्तात्संबन्धप्रत्ययादेरुकारः ॥ १६ ॥

व्यञ्जनान्तं धातुस्वरूपं मध्यमैकत्व एव भवति तस्मात्तच्छब्दादिसंबन्धप्रत्ययसंबन्धिन आदिस्वरस्य उकारो भवति। करुस्। तस्मै कुरु। करुख्। तेभ्यः कुरु। करुम्। मे कुरु। व्यञ्जनान्तात्किम्? दिस्। तस्मै देहि। निस्। तस्माद्धर। दि दाने। नि हरणे। हि प्रत्ययः। इकार उच्चारणार्थः। ततः दिह् स्वरूपात् अस् प्रत्ययः। प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) इति हलोपः। स्वरादल्लोपः (सू० ८।१।३९) इति अकारलोपः। एवं। कर्तस्। तस्मै कुरु। पर्तस्।

तस्मै पठ। अत्र तकारागमात्स्वरान्तत्वे सिद्धे प्रोक्तसूत्रावाप्तिर्न भवति।

व्यञ्जनान्त धातुस्वरूप मध्यमा के एकवचन में ही होता है, उससे 'तत्' शब्द से सम्बद्धप्रत्यय से सम्बद्ध आदि स्वर को 'उकार' होता है। करुस्-तस्मै कुरु-उसके लिए कर। करुख्-तेभ्यः कुरु-उनके लिए कर। करुम्-मे कुरु-मेरे कर। व्यञ्जनान्त से क्या? दिस्-तस्मै देहि-उसके लिए दे। निस्-तस्माद्धर-उस से हरण कर। दि दाने-दान अर्थ में। नि-हरणे-हरण अर्थ में। 'हि' प्रत्यय है। इकार उच्चारणार्थक है। इसके बाद 'दिह्' स्वरूप से 'अस्' प्रत्यय। प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) से 'ह्' का लोप। स्वरादल्लोपः (सू० ८।१।३९) से 'अकार' का लोप। इस तरह-कर्तस्-तस्मै कुरु-उस के लिए कर। पर्तस्-तस्मै पठ-उसके लिए पढ़। यहां 'तकार' के आगम से स्वर का अन्तत्व सिद्ध होने पर उक्त सूत्र की प्राप्ति नहीं होती है।

वकारात्सपूर्व ऊकारः ॥ १७ ॥

वकारात्परः संबन्धप्रत्ययादिस्वरः पूर्ववर्णेन सह ऊकारो भवति। कर्यूस्। कुरुत तस्मै। दिय्यूस्। तस्मै दत्त। करिव् दियिव् इति स्वरूपाभ्यामस् प्रत्ययः अनेन वकारेण सह अकारस्य ऊकारः यत्वम्।

'वकार' से परे संबन्धप्रत्ययादिस्वर पूर्ववर्ण के साथ 'ऊकार' होता है। कर्यूस्-कुरुत तस्मै-उसके लिए तुम करो। दिय्यूस्-तस्मै दत्त-उसके लिए दो। करिव्-दियिव्-इन स्वरूपों से 'अस्' प्रत्यय, इस वकार के साथ 'अकार्' को 'ऊकार' तथा 'य'।

तकारादोकारः ॥ १८ ॥

तकारात्परयोस्तयोर्वकारअकारयोरोकारो भवति। करितोन् तं कुरुत नाम। करितोस्। तस्य कुरुत नाम। करितोख्। तेषां कुरुत नाम। करितोम्। मे कुरुत नाम। साधनं पूर्ववत्।

'तकार' से परे उन दोनों 'वकार-अकार' में 'ओकार' होता है। करितोन्-तं कुरुत नाम-उसे तुम करो। करितोस्-तस्य कुरुत नाम-उस के तुम करो। करितोख्-तेषां कुरुत नाम-उनके करो। करितोम्-मे कुरुत नाम-मेरे तुम करो। साधन पहले की तरह।

मो निषेधार्थोऽत्रैव ॥ १६ ॥

निषेधार्थको मकारः अत्रैव विभक्तिविशेषे क्रियायाः पूर्वे वा परे प्रयोज्यो नान्यत्र। शेषे विभक्तिसमुदाये माशब्द आशङ्कार्थो भवति विध्याशिषोरेव निषेधार्थको भवतीति ज्ञेयम्। म करिन्। मा करोतु। म कर्। मा कुरु। म करिव्। मा कुरुत। साधनं सुगमम्। अत्रैव किम्। करान् छुन। न करोति। करुन् न। नाकरोत्। करिज़ि न। न कुर्यात्। करिज़्यन् न। तं न कुर्यात्। करिन। न करिष्यति।

निषेधार्थक 'मकार' यहीं विभक्तिविशेष में क्रिया से पूर्व वा परे प्रयुक्त करना चाहिए, अन्य किसी जगह नहीं। शेष विभक्ति-समुदाय में 'मा' शब्द आशङ्का के अर्थ में होता है और विधि तथा आशी अर्थ में ही निषेधार्थक होता है, यह समझना चाहिए। म करिन्-मा करोतु-मत कर। म कर्-मा कुरु-मत कर। म करिव्-मा कुरुत-मत करो। साधन सरल ही है। यहां ही क्या ? करान् छुन-न करोति-नहीं करता है। करुन् न-नाकरोत्-किया नहीं। करिज़ि न-न कुर्यात्-न करे। करिज़्यन् न-तं न कुर्यात्-उसे न करे। करि न-न करिष्यति-करेगा नहीं।

संबुद्धिगौणप्रत्यया मात्परा अपि ॥ २० ॥

लिङ्गप्रकरणोक्तोत्तमादिसंबोधनप्रत्यया गौणविधिप्रत्ययाश्च मकारात्पराः प्रयोज्याः। अपि शब्दात् गौणप्रत्ययः पूर्ववदप्यत्रापि प्रयोज्यः। अत एव निर्देशान्नकारात्परा अपि प्रयोज्याः। मा कर्। मा कुरु। मवा कर्। मा कुरु। मसा कर्-मा कुरु। एवं स्त्रीसंबोधनप्रत्ययाश्च। मत करितन्। मा करोतु नाम। मत कर्त। मा कुरु नाम। मत करितव्। मा कुरुत नाम। मत वा कर्त। मा कुरु नाम। मतसा कर्त। मा कुरु नाम। मता कर्त। मा कुरु नाम। इत्यादयः।

लिङ्गप्रकरण में कहे उत्तमादि संबोधन प्रत्यय और गौणविधि-प्रत्यय मकार से परे प्रयुक्त करने चाहिए। अपि शब्द से गौण प्रत्यय पहले की तरह यहां भी प्रयुक्त करना। 'अत एव' निर्देश से 'नकार' से परे भी प्रयुक्त करने चाहिए। माकर-मा कुरु-मत-कर। मवा कर्-मा कुरु-मत-कर। मसा कर्-मा कुरु-मत-कर। इस तरह स्त्री संबोधन प्रत्यय। मत करितन्-मा करोतु नाम-मत करे। मत

कर्त-मा कुरु नाम- तूं मत कर। मत करितव्-मा कुरुत नाम-तुम मत करो। मत वा कर्त-मा कुरु नाम-तूं मत कर। मतसा कर्त-मा कुरु नाम-तूं मत कर। मता कर्त-मा कुरु नाम-तूं मत कर। इत्यादि।

विधितद्वतिपत्तिभेदाद्दूरविधिर्द्विविधः ॥ २१ ॥

एक आगामिकाले कर्मप्रेरणम् अपरस्तस्य कर्मणः अनिष्पत्ति-कथनमिति दूरविधिर्द्विधा भवति।

एक आगामिकाल में कर्म प्रेरणा और दूसरा उस कर्म का अनिष्पत्तिकथन, इस प्रकार दूरविधि दो प्रकार की हुआ करती है।

दूरविधौ ज़िप्रत्ययः सर्वेषु ॥ २२ ॥

सर्वेषु वचनेषु 'ज़ि' प्रत्यय एक एव ज्ञेयः स च तच्छब्दादिकर्तृ-प्रयोगेण भिद्यते।

सभी वचनों में 'ज़ि' प्रत्यय एक ही जानना और वह 'तत्' शब्दादिकर्तृ प्रयोग से विदीर्ण हो जाता है।

तद्वतिपत्तौ हेपरः ॥ २३ ॥

हे शब्दः परो यस्मादेवंविधो 'ज़ि' प्रत्ययस्तदतिपत्तौ प्रत्ययो भवेत्। चरादीनां तु युष्मदि हेपर इति किन्त्वाक्षेपादतीतकालोऽपि भवतीति बोध्यम्।

हे शब्द है परे जिससे ऐसा 'ज़ि' प्रत्यय, उस को अतिपत्ति में प्रत्यय हो। चरादिओं के तो युष्मद् में 'हे पर' यह और आक्षेप से अतीतकाल भी होता है, यह जानना।

व्यञ्जनान्तादिचागमो ज़ौ ॥ २४ ॥

व्यञ्जनान्ताद्धातोर्ज़ि प्रत्यये परे इच् आगमो भवति, चकार उच्चारणार्थः। करिज़ि। कुर्यात्। कर करणं दूरविधौ ज़ि प्रत्ययः (सू. २२)। अनेन इच् चकारलोपः अयमेव प्रयोगः सर्वेषु वचनेषु विज्ञेयः। सुह करिज़ि। सः कुर्यात्। तिम् करिज़ि। ते कुर्युः। चह् करिज़ि। त्वं कुर्याः। त्वहि करिज़ि। यूयं कुर्यात। व्यञ्जनान्तात्किम्। दिज़ि। दद्यात्। ख्यज़ि। खादेत्। तदतिपत्तिप्रयोगाश्च यथा। करिज़िहे। कुर्वीत नाम।

व्यञ्जनान्त धातु से 'ज़ि' प्रत्यय परे रहते 'इच्' आगम होता है, चकार उच्चारणार्थ है। करिज़ि-कुर्यात्-करे। कर-करणे-करने में

दूरविधौ-दूरविधि में 'ज्ञि' प्रत्यय (सू० २२) इससे 'इच्' चकारलोप; यही प्रयोग सभी वचनों में जानना। सुह् करिज्ञि-सः कुर्यात्-वह करे। तिम् करिजि-ते कुर्युः-वे करें। चह् करिजि-त्वं कुर्याः तू करे। त्वहि करिज्ञि-यूयं कुर्यात-तुम सब करें। व्यञ्जनान्त से क्या। दिज्ञि-दद्यात्-दे।खज्ञि-खादेत्-खाए। उसके प्रतिपत्ति प्रयोग जैसे-करिज्ञि-हि-कुर्वीत नाम-करे।

नासमोर्लोपो जेः ॥२५॥

अस् अम् इत्येतयोः प्रत्यययोः स्वरादल्लोप (सू० ८।१।३९) इति प्राप्तो लोपो ज्ञि प्रत्ययात् न भवति। करिज्यम्। तस्य कुर्याः। असमोः किम्। करिज्ञिय्। ते कुर्यात्। जेः किम्। करिज्ञिहेम्। तस्य कुर्वीत नाम। अत्र अस् प्रत्ययस्य स्वरादल्लोप (सू० ८।१।३९) इत्यकारलोपः।

'अस्-अम्' इन दोनों प्रत्ययों में 'स्वरादल्लोपः (सू० ८।१।३९) से प्राप्त लोप 'ज्ञि' प्रत्यय से नहीं होता है। करिज्यम्-तस्य कुर्याः-उसके करे। असम का क्या? करिजिय्-ते कुर्यात्-वे करे। जि का क्या? करिज्ञिहेम्-तस्य कुर्वीत नाम-उस का करे। यहां 'अस्' प्रत्यय का 'स्वरादल्लोपः (सू० ८।१।३९) से 'अकार' का लोप।

आशिषि यन् यन् यख् इव् प्रत्ययाः ॥ २६ ॥

स्पष्टम्। तत्रास्या विभक्तेर्लोकेऽत्यल्पप्रसिद्धतया तत्स्वरूप-साधनसूत्राणि नाभिहितानि। परन्तु पूर्णभूते ये आदेशा वक्ष्यन्ते, तेऽत्रापि धीमद्भिरवधार्याः। येषां च धातूनां क्रिया लोके प्रचारितास्ति ते उदाहृतिद्वारा व्यक्तीक्रियन्ते। कर्यन्। क्रियात्। लश्यन्। जीव्यात्। रब्यन्-पच्यात्। जेब्यन्-जीयात्। आपूयन्-भूयात्। अत्रैव सकारान्तस्य शकारो दृश्यते। नान्तानां तु पूर्णभूतप्रक्रियया (८।३।७३)। सूत्रेण नकारस्य जकारः। लश्यनय्। ते जीव्यात्। पोष्यनय्। ते पर्याप्यात्। लस सम्यग्जीवने। पोश पर्याप्तनायाम्। शेषं पूर्ववत्। एवं। ब्वय्यन्। भूयात्। म ब्वय्यन्। मा भूयात्।

स्पष्ट है। वहां इस विभक्ति के लोक में अत्यल्प प्रसिद्ध होने से उस के स्वरूप को सिद्ध करने वाले सूत्र नहीं कहे गए हैं। परन्तु पूर्ण-

भूत होने पर जो जो आदेश कहे जाते हैं, वे यहां भी बुद्धिमान् पुरुषों को निश्चय कर लेना चाहिए और जिन धातुओं की क्रियालोक में प्रचारित है, वे उदाहरण द्वारा व्यक्त की जाती हैं। कर्यन-क्रियात्-करे। लश्यन्-जीव्यात्-जीता रहे। रञ्यन्-पच्याम्-पकावे। जेञ्यन्-जीयात्-जय प्राप्त करे। आश्यन्-भूयात्-होवे। यहां हो सकारान्त को 'शकार' देखा जाता है। 'नान्तानां तु पूर्णभूतप्रक्रियवत्' (८।३।७३) सूत्र से 'नकार' को ञकार। लश्यनय्-ते जीव्यात्-वे जिएं। पोष्यनय्-ते पर्याप्यात्-वे पर्याप्त होवें। लस-सम्यग्जीवने-अच्छी तरह जीवन में। पोष-पर्याप्ततायाम्-पर्याप्तता में। बाकी पहले की तरह। इस तरह-ब्वय्यन्-भूयात्-होवे। म ब्वय्यन्-मा भूयात्-मत होवे।

छावो यखि यो वा ॥ २७ ॥

छाव उपभोगे। इत्यस्य यख् प्रत्यये परे वकारस्य यकारो भवति वा विकल्पेन। छाय्यख्। निर्विश्याः। पक्षे। छाव्यख्। निर्विश्याः।

छाव-उपभोग में, इसके 'यख्' प्रत्यय परे रहते 'वकार' को 'यकार' विकल्प से होता है। छाय्यख्-निर्विश्याः-प्रवेश करना चाहिए। पक्ष में-छाव्यख्-निर्विश्याः-प्रवेश करना चाहिए।

भविष्यन्ती इ अन् अख् इव् अ अव प्रत्ययाः ॥ २८ ॥

सुगमम्। करि। करिष्यति। करन्। करिष्यन्ति। करख्। करिष्यसि। करिव्। करिष्यथ। कर। करिष्यामि। करव्। करिष्यामः।

सुगम है। करि-करिष्यति-करेगा। करन्-करिष्यन्ति-करेंगे। करख्-करिष्यसि-तू करेगा। करिव्-करिष्यथ-तुम करोगे। कर-करिष्यामि-मैं करूंगा। करव्-करिष्यामः-हम करेंगे।

स्वरान्तानामुत्तमे मागमः ॥ २९ ॥

स्वरान्तानां धातूनामुत्तमपुरुषे मकारागमो भवति। दिम। दास्यामि। दिमव्। दास्यामः। दि दाने उत्तमपुरुषैकत्वानेकत्वयोः अ अव् प्रत्ययौ अनेन मागमः। उत्तमे किम्। दियि। दास्यति। दिन्। दास्यन्ति। दिख्। दास्यसि। दियिव्। दास्यथ। दि दाने। इ अन् अख् इव् प्रत्ययाः। स्वरान्ताद्यागम इकारे (सू० १०) इत्यनेन इकारागमः। अपरत्र स्वरादल्लोपः (सू० ८।१।३९) इत्यकारलोपः।

तच्छब्दादिसंबन्धप्रयोगाश्च यथा। कर्यंम्। तस्य करिष्यति। (अस्यां विभक्तौ प्रथमपुरुषकर्तृसंबन्धार्थे स्वरादल्लोपः (८।१।३९) कार्य-मनित्यं ज्ञेयम्)। करनस्। करिष्यन्ति तस्य। कर्यूस्। करिष्यथ तस्य। करस्। करिष्यामि तस्य। करन्। करिष्यामि तम्। करोस्। करिष्यामस्तस्य। करोन्। करिष्यामस्तम्। पूर्वं साधितानि। चरादीनां तु विधिवदत्रापि विधिर्ज्ञेयः।

स्वरान्त धातुओं के उत्तमपुरुष में 'मकार' का आगम होता है। दिम-दास्यामि-दूंगा। दिमव्-दास्यामः-हम देंगे। 'दि' दान अर्थ में, उत्तमपुरुष के एकवचन और वहुवचन में 'अ-अव्' प्रत्यय, इससे 'म' का आगम। उत्तमपुरुष में क्या। दियि-दास्यति-देगा। दिन्-दास्यन्ति-देंगे। दिख्-दास्यसि-तूं देगा। दियिव्-दास्यथ-तुम दोगे। 'दि' दान अर्थ में। इ अन् अख् इव् प्रत्यय। स्वरान्ताद्यागम इकारे (सू० १०) इस से 'इकार' का आगम। दूसरी जगह स्वराद-ल्लोपः (सू० ८।१।३९) से 'अकार' का लोप। 'तत्' शब्दादि से सम्बद्ध प्रयोग जैसे-कर्यस्-तस्य करिष्यति-उसका करेगा। इस विभक्ति में प्रथमपुरुषकर्ता के संबन्धार्थ में स्वरादल्लोपः (सू० ८।१।३९) कार्य अनित्य जानना। करनस्-करिष्यन्ति तस्य-उसका करेंगे। करहन्-करिष्यसि तम्-तूं उसे करेगा। करहस्-करिष्यसि तस्य-तूं उसका करेगा। कर्यूस्-करिष्यथ तस्य-तुम उसका करोगे। करस्-करिष्यामि तस्य-मैं उसका करूंगा। करन्-करिष्यामि तम्-उसे मैं करूंगा। करोस्-करिष्यामस्तस्य-उसका हम करेंगे। करोन्-करिष्यामस्तम्-हम उसे करेंगे। पहले साधित हैं। चरादि की तो विधिवत् यहां भी विधि जानना।

अपराः प्रत्ययाः संप्रश्ने ॥ ३० ॥

ते भविष्यन्तीप्रत्यया अपरा अकारः परो येभ्यस्तथा संप्रश्ने प्रत्ययाः स्युः।

वे भविष्यन्ती प्रत्यय 'अकार' परे होने पर संप्रश्न में होते हैं।

प्रथमोत्तमैकत्वे दीर्घः ॥ ३१ ॥

तस्य अकारस्य प्रथमैकवचने उत्तमैकवचने च दीर्घो भवति। ते प्रत्ययाश्च यथा। या अन अख इव आ अव भवन्ति। उदाहरणानि।

कर्या । किं कुर्यात् । करन-किं कुर्युः । करख्-किं कुर्याः । करिव-किं कुर्यात । करा-कुर्याम् किं । करव् । किं कुर्याम । साधितचराण्येव ।

उस 'अकार' का प्रथम-एकवचन और उत्तम-एकवचन में दीर्घ होता है । वे प्रत्यय जैसे—या, अन, अख, इव, आ, अव होते है। उदाहरण—कर्या-किं कुर्यात्-क्या करे। करन-किं कुर्युः-क्या करें। करख्-किं कुर्याः- तू क्या करे। करिव-किं कुर्यात-तुम क्या करें। करा- किं कुर्याम्-मैं क्या करूं। करव्-किं कुर्याम-हम क्या करें । साधित ही हैं ।

क्रियातिपत्तिः इहे अहान् अहाख् इहीव अहा अहाव् प्रत्ययाः ॥३२॥

स्पष्टम् । करिहे । अकरिष्यत् । करहान् । अकरिष्यन् । करहाख् । अकरिष्यः । करिहीव-अकरिष्यत । करहा-अकरिष्यम् । करहाव्-अकरिष्याम । स्वरान्तधातूनां यथा । च्ययिहे । अपास्यत् । च्यहान् । अपास्यन् । च्यहाख् । अपास्यः । च्ययिहीव् । अपास्यत । च्यमहा । अपास्यम् । च्यमहाव् । अपास्याम । चि पाने स्वरान्ताद्यागम इकारे (सू० १०) इति यकारागमः । सर्वत्राकारागमो निदियिवर्जितात् (सू० ११) इति धातोरकारागमः । स्वरादल्लोपः (सू० ८।१।३६) इत्यकारस्य लोपः । स्वरान्तानामुत्तमे मागमः (सू. २६) इति मकारागमः । सर्वत्र यत्वम् ।

स्पष्ट है । करिहे-अकरिष्यत्-करेगा । करहान्-अकरिष्यन्-करेंगे। करहाख्-अकरिष्यः-तू करेगा । करिहीव्-अकरिष्यत-तुम करोगे। करहा-अकरिष्यम्-मैं करूंगा । करहाव्-अकरिष्याम-हम करेंगे । स्वरान्त धातुओं के जैसे—च्ययिहे-अपास्यत्-पिएगा । च्यहान्-अपास्यन्-पिएंगे । च्यहाख्-अपास्यः-तूं पिएगा । च्ययिहीव्-अपास्यत-तुम पिओगे । च्यमहा-अपास्यम्-मैं पिऊंगा । च्यमहाव्-अपास्याम-हम पिएंगे । 'चि' पीने में 'स्वरान्ताद्यागम इकारे (सू. १०) इस से 'यकार' का आगम । सर्वत्राकारागमो निदियिवर्जितात् (सू. ११) से धातु को 'अकार' का आगम । स्वरादल्लोपः (सू. ८।१।३६) से 'अकार' का लोप । स्वरान्तानामुत्तमे मागमः (सू. २६) से 'मकार' का आगम । सब जगह 'य' ।

कौतुके सर्वे प्रत्यया हयुपराः ॥ ३३ ॥

कौतुकेन क्रियातिपत्तावभिहितायां सत्यां सर्वे प्रोक्तप्रत्ययास्तच्छब्दादिसंबन्धप्रत्ययाश्च हय् परा हयुशब्दः परो येभ्यस्तथा प्रयोज्याः ।

करिहे इय् । चेदकरिष्यत् । करहान् हय् । चेदकरिष्यन् । करिहेस् हय् । चेत्तथाकरिष्यत् । करहानस् इय् । चेत्तथाकरिष्यन् ।

कौतुक से क्रियातिपत्ति में कहे जाने पर सभी उक्त प्रत्यय और 'तत्' शब्दादि से सम्बद्ध प्रत्यय 'हय्' शब्द परे होने पर वैसे प्रयुक्त करने चाहिए । करिहे इय्-चेदकरिष्यत्-यदि करेगा । करहान् हय्-चेदकरिष्यन्-यदि करेंगे । करिहेस् हय्-चेत्तथाकरिष्यत्-यदि वैसा करेगा । करहानस् इय्-चेत्तथाकरिष्यन्-यदि वैसा करेंगे ।

आक्षेपेऽपि नय्पराः ॥ ३४ ॥

आक्षेपेण क्रियातिपत्तावभिहितायां सत्यां ते प्रत्यया नय्परा भवन्ति । अपिशब्दाद्धेतुमद्भावेऽपि । करिहे नय् । चेन्नाकरिष्यत् । वा । खलु नाकरिष्यत् । करहान् नय् । चेन्नाकरिष्यन् ।

आक्षेप से क्रियातिपत्ति में कहे जाने पर वे प्रत्यय 'नय्' हैं परे जिन से, ऐसे होते हैं । अपिशब्द से हेतुमद्भाव में भी । करिहे नय्-चेन्नाकरिष्यत्-यदि न करेगा । वा-खलु नाकरिष्यत्-नहीं करेगा । करहान् नय्-चेन्नाकरिष्यन्-यदि न करेंगे ।

कर्तुः परौ वा ॥ ३५ ॥

स हय् प्रत्ययः नय् प्रत्ययश्च कर्तुः परौ वा भवतः । सुहय् करिहे । स चेदकरिष्यत् । तिम् हय् करान् । ते चेदकरिष्यन् । सुनय् करिहे । स चेन्न कुर्यात् । तिम् नय् करहान् । ते चेन्न कुर्युः । सुय्-करिहे । इति निश्चयप्रत्ययेन स्वरूपं विवेच्यम् । अत्र प्रत्ययेषु हलोपः सर्वत्र (सू० ४।१३१) इति सुह् शब्दहकारस्य लोपः । शेषं साधनं पूर्ववत् । चरादीनां तु प्रोक्तवद्बोध्यम् ।

वह 'हय्' प्रत्यय और 'नय्' प्रत्यय कर्ता से परे होते हैं । सुहय्-करिहे-स चेदकरिष्यत्-वह यदि करेगा । तिम् हय् करान्-ते चेदकरिष्यन्-वे यदि करेंगे । सुनय् करिहे-स चेन्न कुर्यात्-वह यदि न करे । तिम् नय् करहान्-ते चेन्न कुर्युः-वे यदि न करें । सुय् करिहे । यहां निश्चय प्रत्यय से स्वरूप की विवेचना करनी चाहिए । यहां प्रत्ययों में हलोपः सर्वत्र (सू० ४।१३१) से 'सुह्' शब्द के 'हकार' का लोप । बाकी साधन पहले की तरह । चरादि के तो कहे की तरह जानना ।

इति शरदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
आख्यातप्रक्रियायां भविष्यत्पादो द्वितीयः ॥ ८।२ ॥

अथाख्यातप्रक्रियायाम् ॥ ८ ॥

समापितक्रियाकालो भूतकालः ॥ १ ॥

स्पष्टम् । समाप्तक्रियाकाल को 'भूतकाल' कहते हैं ।

भूतसामान्यपूर्णापूर्णभेदाच्चतुर्विधः ॥ २ ॥

सोऽतीतकालः भूतसामान्यभूतपूर्णभूत-अपूर्णभूतभेदैश्चतुष्प्रकारो विज्ञेयः ।

वह अतीत काल भूतसामान्य, भूतपूर्णभूत, भूतअपूर्ण और भूत भेदों से चार प्रकार का जानना ।

भावकर्मिणां भूते उन् उख् उथ् उव उम् उ प्रत्ययाः ॥ ३ ॥

भावधातूनां येषां धातुपाठे अतीतप्रयोगा भावे पठिताः । भावप्रयोगस्तु यत्र तृतीया कर्तृस्थाने स्यात् । कर्मिणां धातूनां च येषां धातुपाठे अतीतकालप्रयोगाः कर्मणि अभिहिताः । कर्मप्रयोगस्तु यत्र तृतीया कर्तृस्थाने प्रथमा कर्मस्थाने स्यात् । तेषामुभयेषां धातूनां भूते उन् आदि प्रत्यया बोध्याः । अत्र शब्दशास्त्रे भावकर्मिणां धातूनामतीतकाले कर्तृप्रयोगाभावः । अकर्मकाणां तु कर्मप्रत्ययाभावः । कर्तृप्रयोगस्तु यत्र प्रथमा कर्तृस्थाने स्यादिति । भावे यथा । असुन् । अहस्यत । नचुन् । अनृत्यत । चसुन् । व्यहस्यत । अस हसने । नच नर्तने चस अतिहासे । अनेन उन् । कर्मणि यथा । करुन् । तेन तया वा कृतम् । करुख् । तैस्ताभिर्वा कृतम् । करुथ् । त्वया कृतम् । करुव । युष्माभिः कृतम् । करुम् । मया कृतम् । करु । अस्माभिःकृतम् । कर करणे अनेन उन् आदिप्रत्ययाः ।

जिन भावधातुओं के धातुपाठ में अतीत प्रयोग भाव में पढ़े गए हैं । भावप्रयोग तो यहां तृतीया कर्ता के स्थान में हो और जिन कर्मिधातुओं के धातुपाठ में अतीतकाल प्रयोग कर्म में कहे गए हैं । कर्मप्रयोग तो यहां तृतीया कर्ता के स्थान में, प्रथमा कर्मस्थान में हो । उन दोनों धातुओं के भूत में 'उन्' आदि प्रत्यय जानने । यहां शब्दशास्त्र में भावकर्मिधातुओं के अतीतकाल में कर्तृप्रयोग का अभाव है । अकर्मकों के तो कर्म प्रत्यय का अभाव । कर्तृ प्रयोग तो यहां प्रथमा कर्तृस्थान में हो । भाव में जैसे—असुन्-अहस्यत-हंसा

गया। नचुन्-अनृत्यत-नाचा गया। चसुन्-व्यहस्यत-अति हंसा गया। असि-हसने में। नच-नाचने में। चस-अतिहास में। इससे 'उन्'। कर्म में जैसे—करुन्-तेन तया वा कृतम्-उस (पुरुष) ने वा उस (स्त्री) ने किया। करुख्-तैस्ताभिर्वा कृतम्-उन (पुरुषों) ने वा उन (स्त्रियों) ने किया। करुथ्-त्वया कृतम्- तूं ने किया। करुव-युष्माभिः कृतम्-तुमने किया। करुम्-मया कृतम्-मैंने किया। करु-अस्माभिः कृतम्-हमने किया। कर-करने में, इससे 'उन्' आदि प्रत्यय।

कर्मणि पुंवहुत्वे इदाद्यस्वरस्य ॥ ४ ॥

कर्मिणां धातूनां पुंल्लिङ्गस्य वहुवचने कर्मणि सति सर्वेषां प्रत्ययानामादिस्वरस्य इकारो भवति। लीखिन्। तेन अलिख्यन्त। लीखिख्। तैर्लिखिताः पुं०। लीखिथ्। त्वया लिखिताः पुं०। लीखिव। युष्माभिर्लिखिताः। लीखिम्। मया लिखिताः पुं०। लीखि। अस्माभिर्लिखिताः। लेख लेखने। भावकर्मिणां भूत (सू० ३) इति उन् आदिप्रत्ययाः। अनेनादिस्वरस्य इकारः। पुंस्येकारस्य यूदीतौ (सू०२१) इत्यनेन सूत्रेण एकारस्य ईकारः।

कर्मि धातुओं के पुंल्लिङ्ग के वहुवचन कर्म में होने पर सभी प्रत्ययों के आदि स्वर को 'इकार' होता है। लीखिन्-तेन अलिख्यन्त-उससे लिखे गयें। लीखिख्-तैर्लिखिताः पुं०-उन से लिखे गये। लीखिथ्-त्वया लिखिताः पुं०-तुझ से लिखो गयो। लीखिव-युष्माभिर्लिखिताः-तुम से लिये गये। लीखिम्-मया लिखिताः पु०-मुझ से लिखे गये। लीखि-अस्माभिर्लिखिताः-हम से लिखे गये। लेख-लिखने अर्थ में। 'भावकर्मिणां भूते (सू० ३) से उन् आदिप्रत्यय। इससे आदि स्वर को 'इकार', पुंस्येकारस्य यूदीतौ (सू. २१) इस सूत्र से 'एकार' को ईकार।

स्त्रियां यत् ॥ ५ ॥

सकर्मकाणां धातूनां स्त्रीलिङ्गस्य वहुत्वे कर्मणि सति प्रत्ययादिस्वरस्य यकारो भवति। कर्यन्। तेन ताः कृताः। कर्यख्। तैस्ताः कृताः। लेछ्यन्। तेन ताः लिखिताः। रछ्यन्। तेन ता रक्षिताः। कर करणे। लेख लेखने। रछ रक्षायाम्। उन उख् प्रत्ययौ अनेन उकारस्य यत्वम्। स्त्रियामीदेतौ सर्वत्र (सू० २३) इति उपधाया एकारः। कवर्गस्यैकत्वेऽपि (सू० ७१) इत्यनेन लेखः खकारस्य छकारः।

सकर्मक धातुओं के स्त्रीलिङ्ग के वहुवचन कम में प्रत्ययादि स्वर को 'यकार' होता है। कर्यन्-तेन ताः कृताः-उसने वे कीं। कर्यख्-तैस्ताः कृताः-उन्होंने वे कीं। लेछ्यन्-तेन ता लिखिताः-उसने वे लिखीं। रछ्यन्-तेन ताः रक्षिताः-उसने उनकी रक्षा की। कर-करने में। लेख-लिखने में। रछ-रक्षा में। उन्-उख् प्रत्यय। इससे 'उकार' को 'य'। स्त्रियामीदेतौ सर्वत्र (सू० २३) से उपधा को 'एकार'। कवर्गस्यैकत्वेऽपि (सू० ७१) इस से लेख 'खकार' को छकार।

इकारान्तादेकत्वेऽपि ॥ ६ ॥

इकारान्ताद्धातोरेकत्वे कर्मणि च प्रत्ययादिस्वरस्य यकारो भवति। ख्ययन्। तेन सा भुक्ता। च्ययन्। तेन सा पीता। नियन्। तेन सा नीता। खि खादने। चि पाने। नि हरणे। उन् प्रत्ययः, अनेनोकारस्य यत्वम्। सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इति सूत्रेण प्रथमयोः अकारागमः।

इकारान्त धातु से एकवचन कर्म में प्रत्ययादि स्वर को 'यकार' होता है। ख्ययन्-तेन सा भुक्ता-उसने वह खाई। च्ययन्-तेन सा पीता-उस ने वह पी। नियन्-तेन सा नीता-उसने वह ली। खि-खाने में। चि-पीने में। नि-हरण में। उन् प्रत्यय, इस से 'उकार' को 'य'। सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इस सूत्र से प्रथम दोनों में 'अकार' का आगम।

ह्दिोरत् ॥ ७ ॥

हिग्रहणक्रीणनधारणेषु। दि दाने। इत्यनयोः स्त्रीवहुत्वे कर्मणि सति आदिस्वरस्य अकारो भवति। चानुकृष्टं नानुवर्तत इति एकत्वे कर्मणि न ज्ञेयः। ह्यचन्। तेन ता धृताः। दिचन्। तेन ताः दत्ताः। उन् प्रत्ययः प्रथमस्य सर्वत्राकारागमो निदियिवर्जितात् (सू० ८।२।११) इत्यकारागमः। ह्दिोस्तकारागमः (सू० ३२) इति तकारागमः। अनेन प्रत्ययादिस्वरस्य अकारः। तवर्गस्याप्रसिद्ध (सू० ७२) इत्यप्रसिद्धचकारादेशः। ह्दिोः किम्। ख्ययन्। सा भुक्ता। च्ययन्। सा पीता। नियन्। सा नीता। पूर्वं साधितान्येव।

'हि' ग्रहण करने, खरीदने और धारण करने अर्थ में। दि-दान करने अर्थ में। इन दोनों के स्त्रीलिङ्ग-वहुवचन कर्म में होने पर

आदि स्वर को 'अकार' होता है। 'चानुकृष्टं नानुवर्तते' के अनुसार एकवचन कर्म में नहीं जानना। ध्रचन्-तेन ता धृता:-उसने वे धारण कीं। दिचन्-तेन ताः दत्ताः-उसने वे दीं। उन् प्रत्ययः प्रथमस्य सर्वत्राकारागमो निर्दियिर्वर्जितात् (सू० ८।२।११) से 'अकार' का आगम। हिद्योस्तकारागमः (सू० ३२) से 'तकार' का आगम। इस से प्रत्ययादि स्वर को अकार। तवर्गस्याप्रसिद्धः (सू० ७२) से अप्रसिद्ध चकार आदेश। हि-द्यु का क्या ? ख्ययन्-सा भुक्ता-वह खाई गई। च्ययन्-सा पीता-वह पी गई। नियन्-सा नीता-वह ली गई। पहले सिद्ध किए जा चुके हैं।

एकत्वे ऊमात्रादेशः ॥ ८ ॥

सकर्मकाणां धातूनां स्त्रीलिङ्गस्यैकत्वे कर्मणि सति प्रत्ययादि-स्वरस्य ऊमात्रादेशो भवति ऊमात्रान्तत्वे सिद्धे पूर्वोक्तलिङ्गप्रकरण-प[1]रिभाषया पूर्ववर्णस्वरस्याप्रसिद्धतावधार्या । करून्। सा कृता। मारूथ्। त्वया सा हता। खारूम्। मया सा रोहिता। कर करणे। मार मारणे। खार आरोहणे। उन् उथ् उम् प्रत्ययाः। अनेनादि-स्वरस्य ऊमात्रादेशः।

सकर्मक धातुओं के स्त्रीलिङ्ग के एकवचन कर्म में होने पर प्रत्ययादिस्वर को 'ऊ' मात्र आदेश होता है। ऊमात्रान्तत्व सिद्ध होने पर पूर्वोक्त लिङ्गप्रकरण की परिभाषा से पूर्व वर्णस्वर को अप्रसिद्धता जानना। करून्-सा कृता- वह की। मारूथ्-त्वया सा हता-तूने वह मारी। खारूम्-मया सारोहिता-मैंने वह चढ़ी। कर-करने अर्थ में। मार-मारने अर्थ में। खार-चढ़ने अर्थ में। उन् उथ् उम् प्रत्यय। इससे आदि स्वर को 'ऊ' मात्र आदेश।

च़ुवमोरवयोर्नित्यम् ॥ ९ ॥

च़ुव कलहे। मोरव पीडासहने। इत्यनयोरेकत्वे कर्मणि नित्यं प्रत्ययादिस्वरस्य ऊमात्रादेशः स्यात्। तयोः पुंलिङ्गकर्माभाव-त्वान्नित्यपदग्रहणम्। च़ुवून्। तेन युद्धम्। मोरवून्। सोढा। एकत्वे किम्। च़ुव्यन्। युद्धाः। मोरव्यन्। सोढाः। भावकर्मिणाम् (सू०

---

1. (ऊदन्तत्वेसिद्धे पूर्वस्वरस्याख्याततता ज्ञेयेति २।१।७ सूत्रे द्रष्टव्यम्।)

३) इति उन् । स्त्रियां यत् (सू० ५) इति उकारस्य यकारः ।

चुव-कलह अर्थ में । मोरव-पीडा सहन करने अर्थ में । इन दोनों में एकवचन कर्म में नित्य प्रत्ययादिस्वर को 'ऊ' मात्र आदेश होता है । उन दोनों में पुंल्लिङ्गकर्माभावत्व से नित्यपदग्रहण है । चुवून्-तेन युद्धम्-उसने युद्ध किया । मोरवून्-सोढाः-सहन कीं । एकत्व में क्या । चुव्यन्-युद्धाः-युद्ध (बहुत) । मोरव्यन्-सोढाः-सहन कीं । भावकर्मिणाम् (सू० ३) से उन् । स्त्रियां यत् (सू० ५) से 'उकार' को 'यकार' ।

पुंकर्तृप्रत्ययोकारस्य स्त्रियां ॥ १० ॥

पुंल्लिङ्गस्य यः कर्तृसंबन्धी उकारस्तस्य स्त्रीलिङ्गविषये ऊमात्रादेशः स्यात् । वोतु । प्राप्तः । वाचू । प्राप्ता ।

पुंल्लिङ्ग का जो कर्तृसंबन्धी 'उकार' है, उसे स्त्रीलिङ्ग विषय में 'ऊ' मात्र आदेश होता है । वोतु-प्राप्तः-पाया । वाचू-प्राप्ता-पाई ।

इकारस्य यत् ॥ ११ ॥

पुंल्लिङ्गस्य यः कर्तृसंबन्धी इकारस्तस्य यकारो भवति स्त्रीलिङ्गविषये । थकि । श्रान्तास्ते । थच्य । श्रान्तास्ताः ।

पुंल्लिङ्ग का जो कर्तृसंबन्धी 'इकार' है, उसे स्त्रीलिङ्गविषय में 'यकार' होता है । थकि-श्रान्तास्ते-वे थके । थच्य-श्रान्तास्ताः-वे थकीं ।

अप्रसिद्धचवर्गादकारः ॥ १२ ॥

अप्रसिद्धचवर्गात्परस्य स्त्रीलिङ्गकर्तृसंबन्धिनो यकारस्य अकारो भवति । वाच । प्राप्तास्ताः । [1]खछ आरूढास्ताः । दज़-दग्धास्ताः ।

अप्रसिद्ध चवर्ग से परे स्त्रीलिङ्गकर्तृसंबन्धी 'यकार' को 'अकार' होता है । वाच-प्राप्तास्ताः-वे प्राप्त हुईं । खछ-आरूढास्ताः-वे सवार हुईं । दज़-दग्धास्ताः-वे जलीं ।

सकाराच्च ॥ १३ ॥

सकारात्परस्य प्रत्यययकारस्य अकारो भवति । आस । आसत्ताः । वस । निवसितास्ताः । लोस । श्रान्तास्ताः । पक्षे । लोछ् ।

---

१. खछ इति छकारस्थाने खच इति चकारेणोच्चार्यते ।

'सकार' से परे प्रत्यय 'यकार' को 'अकार' होता है। आस-आसन्‌ ता:-वे थीं। वस-निवसितास्ता:-वे रहीं। लोस-श्रान्तास्ता:-वे थकीं। पक्ष में-लोछ्।

सामान्यभूते ओन् ओख् ओथ् ओव् ओम् ओव् प्रत्ययाः पुंसि ।। १४ ।।

भावकर्मिणां धातूनां सामान्यभूते ओन् आदिप्रत्ययाः पुंल्लिङ्गैकत्वे कर्मणि बोध्याः। कर्योन्। तेनाकारि। कर्योख्। तैरकारि। कर्योथ्। त्वयाकारि। कर्योव। युष्माभिरकारि। कर्योम्। मयाकारि। कर्योव्। अस्माभिरकारि। कर करणे सामान्यभूते ओन् आदि-प्रत्ययाः। यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यकारागमः।

भावकर्मिधातुओं के सामान्यभूत होने पर 'ओन्' आदि प्रत्यय पुंल्लिङ्ग एकवचन कर्म में जानने। कर्योन्-तेनाकारि-उसने किया। कर्योख्-तैरकारि-उन्होंने किया। कर्योथ्-त्वयाकारि- तूने किया। कर्योव-युष्माभिरकारि-तुमने किया। कर्योम्-मयाकारि-मैंने किया। कर्योव्-अस्माभिरकारि-हमने किया। कर-करने अर्थ में सामान्य-भूत में ओन् आदि प्रत्यय। यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) से 'यकार' का आगम।

बहुत्वे एकारः ।। १५ ।।

पुंल्लिङ्गस्य बहुत्वे कर्मणि सति प्रत्ययादिस्वरस्य एकारो भवति। कर्येन। तेनाकृषत। कर्येख्। तैरकृषत। कर्येथ्। त्वयाकृषत। कर्येव। युष्माभिरकृषत। कर्येम्। मयाकृषत। कर्येय्। अस्माभिरकृषत। साधनं पूर्ववत्। अनेन प्रत्ययोकारस्य एकारः।

पुंल्लिङ्ग के बहुवचन कर्म में होने पर प्रत्ययादि स्वर को 'एकार' होता है। कर्येन्-तेनाकृषत-उसने किया। कर्येख्-तैरकृषत-उन्होंने किया। कर्येथ्-त्वयाकृषत-तूं ने किया। कर्येव-युष्माभिरकृषत-तुमने किया। कर्येम्-मयाकृषत-मैंने किया। कर्येय्-अस्माभिरकृषत-हम ने किया। साधन पहले की तरह। इस से प्रत्यय 'ओकार' को 'एकार' होता है।

स्त्रियामेयादेशः सर्वत्र ।। १६ ।।

सर्वत्र सामान्यपूर्णभूते एकत्वबहुत्वयोः कर्मणि च प्रत्ययादिस्वरस्य एय आदेशो भवति स्त्रीलिङ्गे एव । कर्येयन् । तेन साकारि । कर्येयन् । तेन ता अकृषत । कर्येयख् । तैः साकारि । कर्येयख् । तैस्ता अकृषत । कर करणे । ओन् ओख् प्रत्ययौ । अनेन ओकारस्य एयादेशः । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) इति यागमः ।

सब जगह सामान्यपूर्णभूत में एकवचन और बहुवचन में तथा कर्म में प्रत्ययादि स्वर को स्त्रीलिङ्ग में ही 'एय' आदेश होता है । कर्येयन्-तेन साकारि-उसने वह की । कर्येयन्-तेन ता अकृषत-उसने उन्हें की । कर्येयख्-तैः साकारि-उन्होंने वह की । कर्येयख्-तैस्ता अकृषत-उन्होंने उन्हें की । कर-करने अर्थ में । ओन्-ओख् प्रत्यय । इससे 'ओकार' को 'एय' आदेश । यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) से 'य' आगम ।

अप्रसिद्धचवर्गादायः ।। १७ ।।

स्त्रीलिङ्गस्य सर्वत्र सामान्यपूर्णभूते एकत्वबहुत्वयोः कर्मणि च अप्रसिद्धचवर्गात्परस्य प्रत्ययादिस्वरस्य आय आदेशो भवति । ह्यचायन् । सा प्रत्यग्राहितेन । दिचायन् । सा तेनादायि । हिद्योस्तकारागमः (सू० ३२) हेरकारागमः (८।२।११) सूत्रेण 'तवर्गस्याप्रसिद्धः (सू० ७२) इति चत्वम् । अनेन आयादेशः । मचायिस् । अस्य नित्यं संबन्धप्रत्ययत्वात् तस्यैवादिस्वरस्य आयादेशः । तत्रालुप्तयकारेभ्यः कर्तृधातुभ्यः (४९ सूत्रस्थेभ्यः) आयादेशो विकल्पेन विज्ञातव्यः । थोचाय । वा । थोचेय । शुद्धीबभूव सा । तेजाय । वा । तेजेय । तीक्ष्णीबभूव सा । वावजाय । वा । वावजेय (रुरुचे सा) । इत्यादि । खोचाय । बिभाय सा । पचाय । प्रतीयाय । रोचाय । रुरुचे सा । व्वछाय । उत्तस्थौ सा । वछाय । अवरुरोह सा । खछाय । आरुरोह सा । दजाय । देहे सा । रोजाय । तस्थौ सा । बुजायन् । बभ्रज्ज ताम् । खोच् भये । पच ऋणादिविश्वासे । रोच् रोचने । व्वथ उत्थाने । वस अवरोहणे । खस आरोहे । दज् भस्मीभवने । रोज़ स्थितौ । बुज़ भर्जने । ओवावादयः सामान्यपूर्णयोः (सू० ७८) इत्युक्त्या स्त्रियां एय प्रत्ययः । तस्य एकारस्य अनेन आयादेशः । खसवसोस्थः सर्वत्र

(सू० ६६) इति सकारस्य थकारः। तवर्गस्याप्रसिद्धः (सू० ७२) इति थकारस्य छकारः। बुज भर्जने इत्यस्य उन् प्रत्ययः। शेषं पूर्ववत्।

स्त्रीलिङ्ग के सर्वत्र सामान्यपूर्णभूत एक वचन और वहुवचन में तथा कर्म में अप्रसिद्ध 'चवर्ग' से परे प्रत्ययादिस्वर को 'आय' आदेश होता है। ह्यचायन्-सा प्रत्यग्राहि तेन-उस ने वह ग्रहण की। दिचायन्-सा तेनादायि-उसने वह दी। ह्यिदोस्तकारागमः (सू.३२) हेरकारागमः (८।२।११) सूत्र से, तवर्गस्याप्रसिद्धः (सू. ७२) से 'च'। इस से 'आय' आदेश। मर्चायस्। इसे नित्य संबन्धप्रत्ययत्व से उसी आदि स्वर को 'आय' आदेश। वहां 'आलुप्तयकारेभ्यः कर्तृ-धातुभ्यः (४९ सूत्रस्थेभ्यः) 'आय' आदेश विकल्प से जानना चाहिए। थोचाय-वा-योचेय-शुद्धोवभूव सा-वह शुद्ध हुई। तेज़ाय-वा-तेज़ेय-तीक्ष्णोबभूव सा-वह तेज़ हुई। वावजाय-वा-वावज़ेय-रुरुचे सा-वह अच्छी लगी। 'इत्यादि। खोचाय-विभाय सा-वह शोभित हुई। पचाय-प्रतीयाय-गई। रोचाय-रुरुचे सा-वह अच्छी लगी। व्वछाय-उत्तस्थौ सा-वह उठी। वछाय-अवरुरोह सा-वह सवार हुई। खछाय-आरुरोह सा-वह सवार हुई। दज़ाय-देहे सा-वह देह में। रोज़ाय-तस्थौ सा-वह ठहरी। बुज़ायन्-वभ्रज्ज ताम्-उसे (स्त्री)भूना। खोच-भय में। पच-ऋणादि विश्वास में। रोच-अच्छा लगने में। व्वथ-उठाने में। वस-नीचे उतरने में। खस-चढ़ने में। दज़-राख होने में। रोज़-स्थिति में। बुज़-भूनने में। ओवावादयः सामान्यपूर्णयोः (सू० ७८) इस उक्ति से स्त्रीलिङ्ग में एय प्रत्यय। उस 'एकार' को इस से 'आय' आदेश। खस-वसोस्थः सर्वत्र (सू. ६६) से 'सकार' को 'थकार'। तवर्गस्याप्रसिद्धः (सू.७२) से 'थकार' को 'छकार'। बुज़-भर्जन अर्थ में, इसे 'उन्' प्रत्यय। बाकी पहले की तरह।

एयश्च पुंसि ॥ १८ ॥

अप्रसिद्धचवर्गात्परस्य एय् प्रत्ययस्य पुंल्लिङ्गविषये आय आदेशो भवति। यकारोऽस्वरः। लाछाय्। जिजीवुः। खछाय्। आरुरुहुः। लस सम्यग्जीवने। खस आरोहे। पुंकर्तरि (सू. ३९) इति एय् प्रत्ययः। लसश्च (सू. २९, ३३, ६७, ७२) इति। खसवसोस्थ (६६) इति सकारस्य थकारे कृते अनेन एय प्रत्ययस्य आय् आदेशः। एयः किम्। लाछाय्। जिजीवुः। सामान्यपूर्णयोः आय् (सू० ४०)।

शेषमुक्तवत् ।

अप्रसिद्ध 'चवर्ग' से परे 'एय्' प्रत्यय को पुंल्लिङ्ग विषय में 'आय' आदेश होता है । यकार स्वर रहित है । लाछाय्-जिजीवु:-जीना चाहने वाला । खछाय्-आरुरुहु:-सवारी की इच्छा करने वाला । लस-अच्छी तरह जीने अर्थ में । खस-चढ़ने में । पुंकर्तरि (सू. ३९) से 'एय्' प्रत्यय । लसश्च (सू. २९, ३३, ६७, ७२) । खसवसोस्थ: (६६) से 'सकार' को 'थकार' करने पर, इससे 'एय्' प्रत्यय को 'आय्, आदेश । एय का क्या ? लाछाय्-जिजीवु:-जीना चाहने वाला । सामान्यपूर्णयो: आय् (सू. ४०) । बाकी कहे की तरह ।

इदुदूद्युतानां पूर्ववर्णस्वराप्रसिद्धता ॥ १९ ॥

इकारतन्मात्रायुतानामुकारतन्मात्रायुतानामूकारतन्मात्रायुतानां च वर्णानां तत्पूर्ववर्णसंवन्धिनः स्वरस्य अप्रसिद्धता अवधार्या सा चावर्णस्यैव । वाति । प्राप्ता: । तारिन् । तारिता: । पकु । गत: । वाचू । प्राप्ता । मारून् । हता । वात प्रापणे । अकर्मिणां भूते कर्तरि एय् (३९) सूत्रेण । वातस्तात् (सू. ८६) इत्यनेन छिह आदेश: छकारहकारयोर्लोप: । तार तारणे उन् प्रत्यय: । कर्मणि पुंवहुत्वे इदाद्यस्वरस्य (सू. ४) इत्युकारस्य इकार: । पक गतौ । थकपको-रोवादीनां पुंवर्तमानादेशाश्छहोर्लोपश्च भूते (सू. ७७) इत्यनेन छुह् आदेश: छहोर्लोपौ । पुंकर्तृ प्रत्ययोकारस्य स्त्रियां च (सू. १०) इत्युकारस्य ऊमात्रादेश: । तवर्गस्याप्रसिद्ध: (सू. ७२) इति चत्वम् । अनेन पूर्ववर्णस्वरस्याप्रसिद्धता । मार् मारणे उन् प्रत्यय: । एकत्वे ऊमात्रादेश: (सू. ७) । अनेनोपधाया अप्रसिद्धता ।

इकार तन्मात्रायुक्त, उकार तन्मात्रायुक्त और ऊकार तन्मात्रा-युक्त वर्णों के उस से पूर्व वर्ण से सम्बद्ध स्वर की अप्रसिद्धता जानना चाहिए और वह 'अ' वर्ण की ही । वाति-प्राप्ता:-प्राप्त हुए । तारिन्-तारिता:-तार दिए गए । पकु-गत:-गया । वाचू-प्राप्ता-प्राप्त हुई । मारून्-हता-मारी गई । वात-प्राप्त करने अर्थ में । अकर्मिणां भूते कर्तरि एय् (३९) सूत्र से, वातस्तात् (सू. ८६) इससे 'छिह्' आदेश, छकार और हकार का लोप । तार-तारने अर्थ में 'उन्' प्रत्यय । कर्मणि पुंवहुत्वे इदाद्यस्वरस्य (सू. ४) से 'उकार' को 'इकार' । पक-गति अर्थ में । थकपकोरोवादीनां पुंवर्तमानादेशाश्छहोर्लोपश्च

भूते (सू. ७७) इससे 'छुह्' आदेश और 'छ और ह' का लोप। पुंकर्तृ प्रत्ययोकारस्य स्त्रियां च (सू. १०) से 'उकार' को 'ऊ' मात्र आदेश। तवर्गस्याप्रसिद्धः (सू. ७२) से 'च'। इससे पूर्ववर्णस्वर की अप्रसिद्धता। मार्-मारने अर्थ में 'उन्' प्रत्यय। एकत्वे ऊमात्रा-देशः (सू. ७), इस से उपधा की अप्रसिद्धता।

उद्युतस्योपधाया आत ओत्वम् ॥ २० ॥

उकारयुतस्य वर्णस्य य उपधाभूत आकारस्तस्य ओत्वं भवति। तोकन्। तारितः। वोतु। प्राप्तः। तार तारणे उन्। व्यञ्जनं परेण सन्धेयम् (सू. ११३) हकारस्य उपधाया आकारस्य ओकारः। वात प्रापणे। अर्कमिणामिति (३९) सूत्रेण) ओव्। वातस्तात् (सू. ८६) इति छुह् आदेशः छहोर्लोपश्च। तकारस्य उकारान्तत्वे सिद्धे अनेन उपधाकारस्य ओकारः। ओसु। आसीत्। आस सत्तायाम्-उक्तवत् छुह् आदेशः। अनेन उपधाकारस्य ओकारः। उद्युतस्य किम्। तारिन्। तारितास्ते। पूर्वं साधितम्।

'उकार' युक्त वर्ण का जो उपधाभूत 'आकार' उसे 'ओ' होता है। तोकन्-तारितः-तार दिया। वोतु-प्राप्तः-पाया। तार-तारने अर्थ में उन्। व्यञ्जनं परेण सन्धेयम् (सू. ११३) 'हकार' को उपधा के 'आकार' को 'आकार' होता है। वात-प्राप्त करने अर्थ में। अर्कमिणामिति (३९) सूत्र से ओव्'। वातस्तात् (सू. ८६) से 'छुह्' आदेश और छ तथा ह का लोप। 'तकार' का उकारान्तत्व सिद्ध होने पर, इससे उपधा के 'अकार' को 'ओकार'। ओसु-आसीत्-था। आस सत्ता में, कहे की तरह 'छुह्' आदेश। इससे उपधा के 'अकार' को 'ओकार'। उद्युत का क्या? तारिन्-तारितास्ते-वे तारे गए। पहले सिद्ध किए जा चुके हैं।

पुंस्येकारस्य यूदीतौ कर्मकत्वानेकत्वे ॥ २१ ॥

पुंल्लिङ्गस्य एकवहुत्वे कर्मणि सति उपधाभूतस्य एकारस्य क्रमेण यूदीतौ भवतः भूतविषये एकत्वे यूकारः वहुत्वे ईकारः। ल्यूखन्। लिखितम्। लीखिन्। लिखिताः। पूर्वं साधितम्। च्यूटन्। कुट्टितः। चीटिन्। कुट्टिताः। चेट कुट्टने उन्। कर्मणि पुंवहुत्वे (सू.४) इत्यादिना उकारस्येकारः। अनेन क्रमादुपधाया यूकार ईकारौ॥

पुंल्लिङ्ग के एकवचन-वहुवचन कर्म में होने पर उपधाभूत 'एकार' को क्रम से 'यू और ई' होते हैं। भूतविषय एकवचन में

'यूकार' और बहुवचन में 'ईकार' होता है। ल्यूखन्-लिखितम्-लिखा। लीखिन्-लिखिताः- लिखे। पहले सिद्ध किए जा चुके हैं। च्यूटन्-कुट्टितः-कूटा। चोटिन्-कुट्टिताः-कूटे। चेट-कुट्टन अर्थ में 'उन्'। कर्मणि पुंबहुत्वे (सू. ४) इससे 'उकार' को एकार'। इससे क्रमपूर्वक उपधा के यूकार और ईकार'।

फेरब्यहमेलां च। २२॥

एते धातवः कर्तर्येव नित्यं भवन्ति। एषां धातूनामुपधाया यूकार-ईकारौ भवतः भूतविषये। फ्यूरु्। परिवर्तितः। फीरि। परिवर्तिताः। ब्यूठु। आसितः। वीठि। आसिताः। म्यूलु। संगतः। मीलि। संगताः। फेर भ्रमणविस्त्रीभवनपश्चातापवैलोम्येषु। ब्यह उपवेशने। मेल संगमे। पुंकर्तरि (सू. ३९) इति ओव् एय् प्रत्ययौ। खरतरफरमरमोरां रात् (सू. ६१) इति। ब्यहोहात् (सू. ६७) इति। गलचलडलडोलफलफ्वलमेलां लात् (सू. ६३) इति सूत्रैः छुह् छिह् आदेशौ छहोर्लोपश्च। ब्यहः डेषव्यहरोपमपां ठ (सू. ६२) इति हस्य ठः। अनेन सर्वत्र क्रमात् यूदोतौ। प्रोक्तानां धातूनां किम्। मेठ्यौव्। मधुरीवभूव। पेड्यौव। प्रसृतीवभूव। ब्रेठ्यौव्। मूर्खीवभूव। मेठ मधुरीभवने। पेड नियासे। ब्रेठ मूर्खीभवने। पुंकर्तरि (सू. ३९) इति औव्। यागमः सर्वेषु सामान्यपूर्णेषु च (सू. ४६) इति यकारागमः।

ये धातु कर्ता में ही नित्य होते हैं। इन धातुओं की उपधा के 'यूकार-ईकार' भूतविषय में होते हैं। फ्यूरु्-परिवर्तितः-बदल दिया। फीरि्-परिवर्तिताः-बदल दिए। व्यूठु-आसितः-बिठाया। वीठि्-आसिताः-बिठाए। म्यूलु-संगतः-मिला। मीलि-संगताः-मिले। फेर भ्रमण- विस्त्रीभवन-पश्चाताप-वैलोम्य में। ब्यह-उपवेशने-बैठने में। मेल-संगमे -संगम में। पुंकर्तरि (सू० ३९) से 'ओव् और एय् प्रत्यय। खरतरफरफ़ेरमरमोरां रात् (सू० ६१) इति। ब्यहोहात् (सू० ६७) इति। गलचलडलडोलफलफ्वलमेलां लात् (सू० ६३) इन सूत्रों से 'छुह्-छिह्' आदेश और 'छ' तथा 'ह' का लोप। ब्यहः डेषव्यहरोपमपां ठ (सू० ६२) से 'ह' को 'ठ'। इस से सब जगह क्रम से 'यू' और 'ई'। प्रोक्त धातुओं का क्या ? मेठ्यौव्-मधुरीवभूव-मीठा हुआ। पेड्योव्-प्रसृतीवभूव-फैलाव हुआ। ब्रेठ्यौव्-मूर्खीवभूव-

मूर्ख हुआ। मेठ-मोठा होने में। पेड-निकालने में। ब्रेठ-मूर्ख होने में। पुंकर्तरि (सू० ३९) से 'ओव्'। यागमः सर्वेषु सामान्यपूर्णेषु च (सू० ४६) से 'यकार' का आगम।

स्त्रियामीदेतौ सर्वत्र ॥ २३ ॥

सर्वत्र एकत्ववहुत्वे कर्मणि कर्तरि च स्त्रीलिङ्गविषये उपधायाः क्रमात् ईकार-एकारौ भवतः। एकत्वे ईकारः वहुत्वे एकारः भूतविषये। चीटून्। कुट्टिता। चेंच्यन्। कुट्टिताः। चेट कुट्टने उन्। एकत्वे ऊमात्रादेशः (सू० ८) अपरत्र। स्त्रियां यत् (सू० ५) इति उकारस्य यकारः। स्त्रियां भूतानेकत्वकर्मणि च (७० सूत्रेण) इति टकारस्य चकारः। अनेन क्रमादीदेतौ। फीरू। भ्रान्ता सा। फेर्य। भ्रान्ताः। पीठू। निविष्टा। पेछ्य। निविष्टाः। मोजू। मिलिता। मेज्य। मिलिताः। फेर। भ्रमणे। ब्यह। उपवेशने। मेल। संगमे। पुंकर्तरि (सू० ३९) इति ओव् एय्। पूर्ववत् छुह् छिह् आदेशः छहोर्लोपः। पुंकर्तृप्रत्ययोकारस्य स्त्रियां च (सू० १०) इति एकत्र ऊमात्रादेशः। अपरत्र इकारस्य यत् (सू० ११) इति यः। ब्यहः डेषब्यहरोपमपांठ (सू० ६२) इति ह्स्य ठः। सादेशकर्तृभूतानेकत्वे च (सू० ७०) इति ठकारस्य छकारः। लान्तस्य जः (७४) इति लकारस्य जकारः। अनेन सर्वत्र क्रमादोकार-एकारौ।

सब जगह एकवचन-वहुवचन कर्म और कर्ता में स्त्रीलिङ्गविषय में उपधा को क्रम से ईकार और एकार होते हैं। एक वचन में ईकार, वहुवचन में एकार भूतविषय में। चीटून्-कुट्टिता-कूटी गई। चेंच्यन्-कुट्टिताः-कूटी गईं। चेट-कूटने अर्थ में 'उन्'। एकवचन में 'ऊ' मात्र आदेश (सू० ८) दूसरी जगह—स्त्रियां यत् (सू० ५) से 'उकार' को यकार। स्त्रियां भूतानेकत्वकर्मणि च (७०) सूत्र से 'टकार' को 'चकार'। इस से क्रमपूर्वक 'ई-ए'। फीरू-भ्रान्ता सा-वह भ्रान्त हुई। फेर्य-भ्रान्ताः-भ्रान्त हुईं। पीठू-निविष्टा-प्रविष्ट हुई। पेछ्य-निविष्टाः-प्रविष्ट हुईं। मोजू-मिलिता-मिली। मेज्य-मिलिताः-मिलीं। फेर-भ्रमण में। ब्यह-बैठने में। मेल-संगम में। पुंकर्तरि (सू० ३९) से ओव्-एय्। पहले की तरह छुह्-छिह् आदेश और 'छ-ह' का लोप। पुंकर्तृप्रत्ययोकारस्य स्त्रियां च (सू० १०) से एक जगह 'ऊ' मात्र आदेश। दूसरी जगह 'इकारस्य यत् (सू० ११) से 'य'। ब्यहः डेष-

ब्यहृरोपमपां ठ (सू० ६२) से 'ह' को 'ठ'। सादेशकर्तृभूतानेकत्वे च (सू० ७०) से 'ठकार' को छकार। लान्तस्य जः (७४) से 'लकार' को 'जकार'। इससे सब जगह क्रमपूर्वक ईकार और एकार।

ओकारस्योकारः सादेशपुंकर्तरि च ॥ २४ ॥

सर्वस्मिन्नेकत्ववहुत्वे पुंकर्मणि प्रत्ययादेशयुते सर्वस्मिन्पुंकर्तरि च उपधाभूतस्य ओकारस्य ऊकारो भवति भूतविषये। बूजुन्। श्रुतः। बूजिन्। श्रुताः। बूलुन्। भाषितम्। बूलिन्। भाषिताः। बोज्। निशामने। बोल पक्षिशब्दे च। उन् वहुत्वे उकारस्य इत् (४ सूत्रेण) अनेनोपधाया ऊत्वम्। कर्तरि यथा। रूठ्। रुष्टः। रूठि। रुष्टाः। रोष रुष्टौ। पुंकर्तरि (सू० ३९) इति ओव् एय्। द्वषपोषमपरोवां पात् (सू० ६५) इति छुह् छिह् आदेशौ छहो-र्लोपश्च। डेषव्यहृरोपमपां ठ (सू० ६२) इति यस्य ठत्वम्। अनेन उपधाया वकारः। सादेशकर्तरि किम्। पोठ्यौव्। पुष्टं तेन। पोयौंव्। पर्याप्तम्। पोठ।···लीभवने। पारे पर्याप्त्यनार्द्रत्वयोः। पुंकर्तरि (सू० ३९) इति ओव्। यागमः (सू ४६)।

सभी एकवचन-वहुवचन-पुंकर्म में प्रत्ययादेशयुक्त होने पर और सभी पुंकर्ता में उपधाभूत 'ओकार' को भूत विषय में 'ऊकार' होता है। बूजुन्-श्रुतः-सुना। बूजिन्-श्रुताः-सुने। बूलुन्-भाषितम्-भाषण दिया। बूलिन्-भाषिताः-भाषण दिए। बोज्-निशामने-सुनाने में। बोल-पक्षी के शब्द में। उन् वहुत्वे उकारस्य इत् (४ सू०) इससे उपधा को 'ऊ' हुआ। कर्ता में जैसे --रूठ्-रुष्टः-नाराज़ हुआ। रूठि-रुष्टाः-नाराज़ हुए। रोष-नाराज़ होने में। पुंकर्तरि (सू० ३९) से 'ओव्-एय्। द्वषपोषमपरो वां पात् (सू० ६५) से छुह्-छिह् आदेश और 'छ-ह' का लोप। डेषव्यहृरोपमपां ठ (सू० ६२) से 'प' को 'ठ'। इस से उपधा का 'वकार'। सादेशकर्ता में क्या ? पोठ्यौव-पुष्टं तेन-उस ने पुष्ट किया। पोयौंव्-पर्याप्तम्-पर्याप्त। पोठ···होने में। पारे पर्याप्तनार्द्रत्वयोः पुंकर्तरि (सू० ३९) से 'ओव्'। 'य' का आगम (सू० ४६)।

स्त्रियामूदोतौ ॥ २५ ॥

सर्वस्मिन्नेकत्ववहुत्वे कर्मणि प्रत्ययादेशयुते एकत्ववहुत्वे स्त्री-कर्तरि च उपधाभूतस्य ओकारस्य ऊकार-ओकारौ भवतः भूतविषये।

बूजून्-श्रुता तेन । बोज़न्-श्रुतास्तेन । कर्तरि यथा । रूठ् । रुष्टा सा । रोछ्य । रुष्टास्ताः । एवमन्येषां बोध्यम् ।

सभी एकवचन-वहुवचन कर्म में प्रत्ययादेश युक्त होने पर और एकवचन-वहुवचन स्त्रीकर्ता में उपधाभूत 'ओकार' को भूतविषय में । 'ऊकार-ओकार' होते हैं । बूजून-श्रुता तेन-उसने (स्त्री) सुना । बोज़न्-श्रुतास्तेन-उस ने सुने । कर्ता में जैसे-रूठ्-रुष्टा सा-वह रूठी । रोछ्य-रुष्टास्ताः-वे रूठीं । इस तरह अन्य का भी जानना ।

मरश्च पुंसि ॥ २६ ॥

मर मरणे इत्यस्य धातोः सर्वस्मिन्कर्तरि पुंल्लिङ्गविषये उपधाया ऊत्वं भवति भूतविषये । मूदु । मृतः । मूदि । मृताः । मर मरणे । पुंकर्तरि (सू० ३९) इति ओव्-एय् । खरतर (सू० ९१) इत्यादिना छुह् छिह् आदेशः छहोर्लोपः । मरश्च मरणे (सू० ६५) इति रस्य दत्वम् । अनेन उपधाया ऊत्वम् ।

मर-मरने अर्थ में, इस धातु से सभी कर्ता पुंल्लिङ्गविषय में उपधा को 'ऊ' होता है भूत विषय में । मूदु-मृतः-मर गया । मर-मरने अर्थ में । पुंकर्तरि (सू० ३९) इस से 'ओव्-एय्' । खरतर (सू० ९१) से 'छुह्-छिह्' आदेश और 'छ-ह' का लोप । मरश्च मरणे (सू० ६५) से 'र' को 'द' । इस से उपधा का 'ऊ' ।

लसश्च ॥ २७ ॥

लस सम्यग्जीवने इत्यस्य पुंल्लिङ्गे उपधाया ऊकारो भवति । तत्रैकत्वे ख्यातो वहुत्वे अप्रसिद्ध इति ज्ञेयम् । लूस्तु । जीवितः । लूस्ति । जीविताः । लूस्तुख् । जीवितस्त्वम् । लूस्तिव । जीविता यूयम् । लूस्तुम् । जीवितोऽहम् । लूस्ति । जीविता वयम् । लस सम्यग्-जीवने । पुंकर्तरि (सू० ३९) इति ओव् एय् ओख् एव ओस् एय् प्रत्ययाः । आसखसफस (सू० ९६) इत्यादिना छुह् छिह् छुख् छिव छुम् छिह् क्रमादादेशाः छहोर्लोपश्च । लसश्च पुंभूते (सू० ३३) इति तकारागमः । अनेन उपधाया ऊत्वम् ।

लस-अच्छी तरह जीने के अर्थ में, इसे पुंल्लिङ्ग में उपधा को 'ऊकार' होता है । वहां एकवचन में प्रसिद्ध, वहुवचन में अप्रसिद्ध, ऐसा जानना । लूस्तु-जीवितः-जिन्दा हो गया । लूस्ति-जीविताः-जिन्दा हो गए । लूस्तुख्-जीवितस्त्वम्-तू जीवित है । लूस्तिव-जीविता

यूयम्-तुम जीते हो। लूस्तुम्-जीवितोऽहम्-मैं जीवित हूं। लूस्ति-जीविता वयम्-हम जीते हैं। लस-अच्छी तरह जीने में। पुंकर्त्तरि (सू० ३९) से ओव्, एय्, ओख्, एव, ओस्, एय् प्रत्यय। आसखसफस (सू० ९६) से छुह्, छिह् छुख् छिव, छुम्, छिह् क्रम से आदेश और 'छ-ह्' का लोप। लसश्च पुंभूते (सू० ३३) से 'तकार' का आगम। इस से उपधा को 'ऊ'।

स्त्रियामेकत्वानेकत्वे ऊदातावप्रसिद्धौ ॥ २८ ॥

लस सम्यग्जीवने इत्यस्य स्त्रीलिङ्गस्य एकवचन-बहुवचनयोः क्रमात् उपधाया अप्रसिद्धौ ऊकार-आकारौ भवतः।
अत्रापि पूर्ववद्बहुत्वे एवाप्रसिद्धतास्तीत्यवधेयम्।) लूछ़। जीविता। लाछ़। जीविताः। लूछ़ख्। जीविता त्वम्। लाछ़व। जीविता यूयम्। लूछ़स्-जीविताहम्। लाछ-वयं जीविताः। लस धातोः ओव् आदयः प्रत्ययाः (३९ सूत्रेण) तेषां छुह् आदय आदेशाः छहोर्लोपश्च (९६ सूत्रेण) पुंकर्तृ प्रत्ययोकारस्य स्त्रियां च (सू० १०)। इति उकारस्य ऊमात्रादेशः। इकारस्य यत् (सू० ११) इति यः। लसश्च स्त्रियाम् (सू० ६७) इति सकारस्य थकारः। तवर्गस्याप्रसिद्धः (सू० ७१) इति थकारस्य छकारः। अप्रसिद्धचवर्गादकारः (सू० १२) इति सूत्रेण प्रत्यययकारस्याकारः। अनेन उपधायाः क्रमात् अप्रसिद्धौ ऊकार-आकारौ।

लस-अच्छी तरह जीने में, इस स्त्रीलिङ्ग का एकवचन और बहुवचन में क्रम से उपधा के अप्रसिद्ध 'ऊकार-आकार' होते हैं। यहां भी पहले की तरह बहुवचन में ही अप्रसिद्धता है, यह जानना। लूछ़-जीविता-जिन्दा है (स्त्री०)। लाछ़-जीविताः-वे जिन्दा हूं (स्त्री०)। लूछ़ख्-जीविता त्वम्-तू जीवित है (स्त्री०)। लाछ़्व-जीविता यूयम्-तुम जीवित हो (स्त्री०)। लूछ़स्-जीविताहम्-मैं जीवित हूं (स्त्री०) लाछ-वयं जीविताः-हम जीवित हैं (स्त्री०)। लस धातु से 'ओव्' आदि प्रत्यय (३९) सूत्र से, उन्हें छुह् आदि आदेश और 'छ-ह' का लोप (९६) सूत्र से। कर्तृ प्रत्ययोकारस्य स्त्रियां च (सू० से १० से 'उकार' को 'ऊ' मात्र आदेश। इकारस्यय यत् (सू० ११) से 'य'। लसश्च स्त्रियाम् (सू० ६७) से 'सकार' को 'थकार'। तवर्गस्याप्रसिद्धः (सू० ७२) से 'थकार' को 'छकार'। अप्रसिद्धचवर्गादकारः

(सू० १२) से प्रत्यय 'यकार' को 'अकार'। इससे उपधा को क्रम से अप्रसिद्ध 'ऊकार-अकार'।

सामान्यपूर्णयोरन्तिमः सर्वत्र ॥ २९ ॥

